विविध जैन ग्रंथोद्धृत–

ॐ नमः श्री पार्श्वनाथाय

जैन सूक्तसंदोहः

मङ्गलानि

नमो अरिहंताणं, नमो सिद्धाणं, नमो आयरियाणं, नमो उवज्झायाणं, नमो लोए सव्वसाहूणं।
एसो पंच नमुक्कारो सव्वपावप्पणासणो। मंगलाणं च सव्वेसिं, पढमं हवइ मंगलं ॥

तीआणागयवट्टमाणअरिहा, सव्वेवि सुक्खावहा, पाणीणं भवियाण संतु सययं तित्थंकरा ते जिणा ।
जेसिं मेरुगिरिम्मि वासवगणा देवगया सगया, भत्तीए पकुणंति जम्मणमहं सोवण्णकुम्भाईहिं ॥ १ ॥

पूर्णानन्दमयं महोदयमयं कैवल्यचिद्दृग्मयं, रूपातीतमयं स्वरूपरमणं स्वाभाविकीश्रीमयम् ।
ज्ञानोद्योतमयं कृपारसमयं स्याद्वादविद्यालयं, श्रीसिद्धाचलतीर्थराजमनिशं वन्देऽहमादीश्वरम् ॥ २ ॥

वन्दे पुव्वविदेहभूमिमहिलालंकारहारोवमं, देवं भत्तिपुरस्सरं जिणवरं सीमंधरं सामियं ।
पाया जस्स जिणेसरस्स भवभीसंदेहसंतासणा, पोआभा भवसायरंमि निवडंताणं जणाणं सया ॥ ३ ॥

वीरः सर्वसुरासुरेन्द्रमहितो वीरं बुधाः संश्रिताः, वीरेणाभिहतः स्वकर्मनिचयो, वीराय नित्यं नमः ।

वीरात्तीर्थमिदं प्रवृत्तमतुलं वीरस्य घोरं तपो, वीरे श्रीधृतिकीर्तिकान्तिनिचयः श्रीवीर ! भद्रं दिश ॥ ४ ॥
अर्हन्तो भगवन्त इन्द्रमहिताः सिद्धाश्च सिद्धिस्थिताः, आचार्या जिनशासनोन्नतिकराः, पूज्या उपाध्यायकाः ।
श्रीसिद्धान्तसुपाठका मुनिवरा रत्नत्रयाराधकाः, पश्चैते परमेष्ठिनः प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥ ५ ॥

सम्यग्दर्शनम् १

या देवे देवताबुद्धिर्गुरौ च गुरुतामतिः । धर्मे च धर्मधीः शुद्धा, सम्यक्त्वमिदमुच्यते ॥ १ ॥ योग० प्र० २ श्लो० २
रुचिर्जिनोक्ततत्त्वेषु, सम्यक्श्रद्धानमुच्यते। जायते तन्निसर्गेण, गुरोरधिगमेन वा ॥२॥ योग० पृ० ३८ श्लो० १७ (प्र.स.)
शमैः शाम्यति क्रोधादीनपकारे महत्यपि । लक्ष्यते तेन सम्यक्त्वं तदाद्यं लक्षणं भवेत् ॥ ३ ॥ उ० भा० १ पृ० ८५
मानुष्यकर्मभूम्यार्यदेशकुलकल्पताऽऽयुरुपलब्धौ। श्रद्धा कथकश्रवणेषु सत्स्वपि सुदुर्लभा बोधिः ॥ ४ ॥ प्र० श्लो० १६२
मानुष्यमार्यदेशश्च, जातिः सर्वाक्षपाटवम् । आयुश्च प्राप्यते तत्र, कथञ्चित् कर्मलाघवात् ॥ ५ ॥
प्राप्तेषु पुण्यतः श्रद्धा—कथक—श्रवणेष्वपि। तत्त्वनिश्चयरूपं तद्, बोधिरत्नं सुदुर्लभम् ॥६॥ योग० प्र० ४ श्लो० १०८,१०९
सम्यक्त्वरत्नान्न परं हि रत्नं, सम्यक्त्वमित्रान्न परं हि मित्रम् ।
सम्यक्त्वबन्धोर्न परो हि बन्धुः, सम्यक्त्वलाभान्न परो हि लाभः ॥ ७ ॥ सूक्तमुक्तावलि अधिकार ५५ श्लो० ८
गुणानामेक आधारो रत्नानामिव सागरः। पात्रं चारित्रवित्तस्य, सम्यक्त्वं श्लाघ्यते न कैः ? ॥८॥ सु० अ० ५५ श्लो० २
वरं नरकवासोऽपि, सम्यक्त्वेन समायुतः । न तु सम्यक्त्वहीनस्य, निवासो दिवि राजते ॥ ९ ॥ त० श्लो० ४

मन शुद्धिश्च सम्यक्त्वे, सत्येव परमार्थत', तद्विना मोहगर्भा सा, प्रत्यपायानुबन्धिनी ॥१०॥ अ० प्र० श्लो १
सम्यक्त्वसहिता एव, शुद्धा दानादिका क्रिया। तासा मोक्षफले प्रोक्ता यदस्य सहकारिता ॥११॥ अ० प्र० श्लो० २
उपशामिकमेक च पर क्षायोपशमिकम्। तृतीय क्षायिक तुर्यं, सास्वादनं च वेदकम् ॥१२॥ हिं० स० श्लो० १०
शमसवेगनिर्वेदानुकम्पास्तिक्यलक्षणै। लक्षणैः पञ्चभि सम्यक्, सम्यक्त्वमुपलक्ष्यते ॥१३॥यो०पृ० ६३,श्लो०१५ (प्र स)
आन्तर्मौहूर्तिक सम्यग्दर्शन प्राप्नुवन्ति यत्। निसर्गहेतुकमिद सम्यक्श्रद्धानमुच्यते ॥१४॥उ० भाग १,पृ० ९ (प्र स)
गुरूपदेशमालम्ब्य, प्रादुर्भवति देहिनाम्। यत्तु सम्यक्श्रद्धानं, तत् स्यादधिगमज परम् ॥१५॥उ० भाग १, पृ.९ (प्र स)
चैत्यद्रव्यक्षति साध्वीशीलभङ्गर्षिघातने। तथा प्रवचनोड्डाहो मूलाग्निर्बोधिशाखिन• ॥१६॥

त्रिषष्टी० पर्व ८, सर्ग १० श्लो० २८

शका काक्षा विचिकित्सा, जैनादन्यस्य संस्तुति। तत्सस्तवोऽपि पचैन, सम्यक्त्वदूषणानि च ॥१७॥ हिं स श्लो० ३९
सम्यक्त्वेन हि युक्तस्य, ध्रुव निर्वाणसगम। मिथ्यादृशोऽस्य जीवस्य, ससारे भ्रमण सदा ॥ १८ ॥ त० श्लो० ४१
धनेन हीनोऽपि धनी मनुष्यो, यस्यास्ति सम्यक्त्वधन प्रधानम्।
धन भवेदेकभवे सुखाय, भवेऽनन्तसुखी सुदृष्टि• ॥ १९ ॥ सूक्तमुक्तावलि, अधिकार ५५, श्लो० ६
रुचि' श्रुतोक्ततत्त्वेषु, सम्यक् श्रद्धानमुच्यते। जायते तन्निसर्गेण, गुरोरधिगमेन वा ॥ २० ॥
तथाह्यनाद्यन्तभवावर्तवर्तिषु देहिषु। ज्ञानदृष्ट्या धृतिवेद्यान्तरायाभिधकर्मणाम् ॥ २१ ॥
सागरोपमकोटीनां, कोट्यस्त्रिंशत्परा स्थिति'। विंशतिर्गोत्रनाम्नोश्च, मोहनीयस्य सप्तति ॥ २२ ॥ युग्मम् ॥

ततो गिरिसरिद्ग्रावघोलनान्यायतः स्वयम् । क्षीयन्ते सर्वकर्माणि, फलानुभवतः क्रमात् ॥ २३ ॥
एकोनत्रिंशदेकोनविंशत्येकोनसप्ततीः । सागराणां कोटिकोटीः, स्थितिमुन्मूल्य कर्मणाम् ॥ २४ ॥
देशोनैकावशिष्टाब्धिकोटीकोटौ तु जन्मिनः । यथाप्रवृत्तिकरणाद्, ग्रंथिदेशं समियूति ॥ २५ ॥
रागद्वेषपरिणामो, दुर्भेदो ग्रन्थिरुच्यते । दुरुच्छेदो दृढतरः, काष्ठादेरिव सर्वदा ॥ २६ ॥
तीराभ्यर्णान्महापोता, इव वातसमाहताः । रागादिप्रेरिता केऽपि, व्यावर्त्तन्ते ततः पुनः ॥ २७ ॥
तत्रैव तत्परिणामविशेषादासतेऽपरे । स्थलस्खलितगमनान्यंभांसि सरितामिव ॥ २८ ॥
अपरे ये पुनर्भव्या, भाविभद्रा शरीरिणः । आविष्कृत्य परं वीर्यमपूर्वकरणेन ते ॥ २९ ॥
अतिक्रामन्ति सहसा, तं ग्रंथिं दुरतिक्रमम् । अतिक्रान्तमहाध्वानो, घट्टभूमिमिवाध्वगाः ॥ ३० ॥
अथानिवृत्तिकरणादन्तरकरणे कृते । मिथ्यात्वं विरलीकृत्य, चतुर्गतिकजन्तवः ॥ ३१ ॥
आंतर्मुहूर्तिकं सम्यग्दर्शनं प्राप्नुवन्ति यत् । निसर्गहेतुकमिदं, सम्यक्श्रद्धानमुच्यते ॥ ३२ ॥ युग्मम् ॥
गुरूपदेशमालम्ब्य, भव्यानामिह देहिनाम् । सम्यक्श्रद्धानं तु यत्तद्, भवेदाधिगमोद्भवम् ॥ ३३ ॥
तच्च स्यादौपशमिकं, सास्वादनमथापरम् । क्षायोपशमिकं वेद्यं, क्षायिकं चेति पञ्चधा ॥ ३४ ॥
तत्रौपशमिकं भिन्नकर्मग्रन्थेः शरीरिणः । सम्यक्त्वलाभे प्रथमेऽन्तर्मुहूर्तं प्रजायते ॥ ३५ ॥
तथोपशान्तमोहस्योपशमश्रेणियोगतः । मोहोपशमजमौपशमिकं तु द्वितीयकम् ॥ ३६ ॥
त्यक्तसम्यक्त्वभावस्य, मिथ्यात्वाभिमुखस्य च । तथाभ्युदीर्णानंतानुबंधिकस्य शरीरिणः ॥ ३७ ॥

य सम्क्त्वपरिणाम–उत्कर्षेण पडावलि' । जघन्ये नैकसमयस्तत् सास्वादनमीरितम् ॥ ३८ ॥ युग्मम् ॥
अथ तृतीय मिथ्यात्वमोहक्षयशमोद्भवम् । सम्यक्त्वपुद्गलोदयपरिणामवतो भवेत् ॥ ३९ ॥
वेदक नाम सम्यक्त्व, क्षपकश्रेणिमीयुप । अनतानुवन्धिना तु, क्षये जाते शरीरिणः ॥ ४० ॥
मिथ्यात्वस्याथ मिश्रस्य, सम्यग्नाते परिक्षये । क्षायिकसम्मुखीनस्य, सम्यक्त्वान्त्याशभोगिन ॥ ४२ ॥ युग्मम् ॥
शुभभावस्य प्रक्षीणसप्तकस्य शरीरिण । सम्यक्त्वं क्षायिक नाम, पचमं जायते पुन. ॥ ४२ ॥
सम्यग्दर्शनमेतच्च, गुणतस्त्रिविधं भवेत् । रोचक दीपक चैव, कारक चेति नामत. ॥ ४३ ॥
तत्र श्रुतोक्ततत्त्वेपु, हेतूदाहरणैर्विना । दृढा या प्रत्ययोत्पत्तिस्तद्रोचकमुदीरितम् ॥ ४४ ॥
दीपक तद्यद् येपामपि सम्यक्त्वदीपकम् । कारकं सयमतप प्रभृतीना तु कारकम् ॥ ४५ ॥
शमसवेगनिर्वेदानुकपाऽऽस्तिक्यलक्षणै' । लक्षणै पचभि सम्यक्, सम्यक्त्व तत्तु लक्ष्यते ॥ ४६ ॥
अनन्तानुवन्धिकपायाणामनुदय' शम' । स प्रकृत्या कपायाणा, विपाकेक्षणतोऽपि वा ॥ ४७ ॥
ध्यायत' कर्मविपाकं, ससारासारतामपि । यत् स्याद्विपयवैराग्य, स संवेग इतीरितः ॥ ४८ ॥
संसारवास कारैव, वधनान्येव वधन । स सवेगस्य चिन्तेयं, या निर्वेदः स उच्यते ॥ ४९ ॥
एकेन्द्रियप्रभृतीना, सर्वेपामपि देहिनाम् । भवाब्धौ मज्जता क्लेश पश्यतो हृदयार्द्रता ॥ ५० ॥
तद्दु खैर्दुखितत्व च, तत्प्रतीकारहेतुपु । यथाशक्तिप्रवृत्तिश्चेत्यनुकम्पाऽभिधीयते ॥ ५१ ॥ युग्मम् ॥
तत्त्वान्तराकर्णनेऽपि, या तत्त्वेष्वार्हतेपु तु । प्रतिपत्तिर्निराकांक्षा, तदास्तिक्यमुदीरितम् ॥ ५२ ॥

सम्यग्दर्शनमित्युक्तं, प्राप्तावस्य क्षणादपि । मत्यज्ञानं पुराऽभूयत् , तन्मतिज्ञानतां व्रजेत् ॥ ५३ ॥
जन्मिनो यत् श्रुताज्ञानं, तत् श्रुतज्ञानतां भजेत् । निर्भंगज्ञानमवधिज्ञानभावं च गच्छति ॥ ५४ ॥
(विंशतेः चतुःपञ्चाशत् पर्यन्ताः श्लोकाः त्रिषष्ठिगतप्रथमजिनदेशनायाः)

सम्मद्दिट्ठी जीवो विमाणवज्जं न बंधए आउं ! जइ नवि सम्मत्तजढो, अहव न बद्धाउओ पुव्विं ॥ ५५ ॥
दानानि शीलानि तपांसि पूआ, सत्तीर्थयात्रा प्रवरा दया च । सुश्रावकत्वं व्रतधारकत्वं, सम्यक्त्वमूलानि महाफलानि॥५६॥
बालः पश्यति लिङ्गं, मध्यमबुद्धिर्विचारयति वृत्तम् । आगमतत्त्वं तु सुधीः, परीक्षते सर्वयत्नेन ॥ ५७ ॥
पक्षपातो न मे वीरे, न द्वेषः कपिलादिषु । युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः ॥ ५८ ॥
कालो सहाव नियई, पुव्वकयं पुरिसकारणं पंच । समवाए सम्मत्तं, एगंते होइ मिच्छत्तं ॥ ५९ ॥
जा गंठी ता पढमं, गंठी समइच्छमे भवे बीअं । अनिअट्टिकरणं पुण, सम्मत्तपुरक्खडे जीवे ॥ ६० ॥
सम्मत्तंमि उ लद्धे पलियपुहुत्तेण सावओ हुज्जा । चरणोवसमखयाणं सागरसंखंतरा होंति ॥ ६१ ॥
संवेगसंज्ञा शिवसंपदिच्छा, निर्वेदनामा तु भवाद् विरागः। कृतापराधेऽपि शमः शमत्वं, दया तु जीवेषु सदाऽनुकम्पा ॥६२॥
कृपाप्रशमसंवेग–निर्वेदास्तिक्यलक्षणाः । गुणा भवन्ति यच्चित्ते स स्यात् सम्यक्त्वभूषितः ॥ ६३ ॥
यथा चतुर्भिः कनकं परीक्ष्यते, निघर्षणच्छेदनतापताडनैः। तथैव धर्मो विदुषा परीक्ष्यते, सत्येन शीलेन तपोदयागुणैः॥६४॥

निस्सग्गुवएसरुई आणरुई सुत्तबीअरुईमेव । अभिगमवित्थाररुई किरियासखेवधम्मरुई ॥ ६५ ॥
यस्याऽस्ति देवो हृदि मोहजेता, गुरुश्च पञ्चेन्द्रियवैरिजैत । धर्मश्च दुष्कमजयैकतान , स एव शुद्रोऽपि जय लभेत ॥६६ ॥
समत्त सामाइय सतोसो सजमो अ सज्झायं । पच सयारा जस्स न पयारो तस्स ससारे ॥ ६७ ॥
गुणानामेक आधारो, रत्नानामिव सागर' । पात्र चारित्रवित्तस्य, सम्यक्त्व श्लाघ्यते न कै ॥ ६८ ॥
दानानि शीलानि तपासि पूजा, सत्तीर्थयात्रा प्रवरा दया च । सुश्रावकत्व व्रतपालन च, सम्यक्त्वपूर्वाणि महाफलानि ॥ ६९ ॥
सम्यक्त्वरत्नान्न परं हि रत्न, सम्यक्त्वमित्रान्न पर हि मित्रम् ।
सम्यक्त्वबन्धोर्न परो हि बन्धु , सम्यक्त्वलाभान्न परो हि लाभ ॥ ७० ॥
आरंभे नत्थि दया महिलासगेण नासए बभ । सकाए सम्मत्त पव्वज्जा अत्थगहणेण ॥ ७१ ॥
ज सक्कइ तं कीरइ ज न सक्कइ तयमि सद्दहणा । सद्दहमाणो जीवो वच्चइ अयरामर ठाण ॥ ७२ ॥
सम्यक्त्वसहिता एव शुद्धा दानदिका क्रिया । तासा मोक्षफले प्रोक्ता, यदस्य सहकारिता ॥ ७३ ॥
कुर्वन्निवृत्तिमप्येव, कामभोगास्त्यजन्नपि दु खस्योरो ददानोऽपि, मिथ्यादृष्टिर्न सिध्यति ॥ ७४ ॥
कनीनिकेव नेत्रस्य, कुसुमस्यैव सौरभम् । सम्यक्त्वमुच्यते सार , सर्वेषां धर्मकर्मणाम् ॥ ७५ ॥
तत्त्वश्रद्धानमेतच्च, गदित जिनशासने । सर्वे जीवा न हन्तव्या , सूत्रे तत्त्वमितीष्यते ॥ ७६ ॥
अथवेद यथा तत्त्वमाज्ञयैव तथाऽखिलम् । नयानामपि तत्त्वाना-मिति श्रद्धोदितार्थत' ॥ ७७ ॥

देव २

निरातङ्को निराकाङ्क्षो, निर्विकल्पो निरञ्जनः। परमात्माऽक्षयोऽत्यक्षो, ज्ञेयोऽनन्तगुणोऽव्ययः ॥१॥ वि० उ० १२ श्लो ३३

भवबीजाङ्कुरजनना रागाद्याः क्षयमुपागता यस्य । ब्रह्मा वा विष्णुर्वा, हरो जिनो वा नमस्तस्मै ॥२॥

वीतरागस्तोत्र (हेमचंद्र), प्रकाश २१, श्लो० ४४

महाज्ञानं भवेद्यस्य, लोकालोकप्रकाशकम् । महादया दमो ध्यानं, महादेवः स उच्यते ॥ ३ ॥

रागद्वेषौ महामल्लौ, दुर्जयौ येन निर्जितौ । महादेवं तु तं मन्ये, शेषा वै नामधारकाः ॥ ४ ॥

महाक्रोधो महामानो, महामाया महामदः । महालोभो हतो येन, महादेवः स उच्यते ॥५॥ महादेवस्तोत्रः

यस्य निखिलाश्च दोषा न सन्ति सर्वे गुणाश्च विद्यन्ते । ब्रह्मा वा विष्णुर्वा, हरो जिनो वा नमस्तस्मै ॥ ६ ॥

वीतरागो जिनो देवो रागद्वेषविवर्जितः । हतमोहमहामल्लः, केवलज्ञानदर्शनः ॥७॥ पार्श्व० (गद्य) पृ० ८२ (प्र० स०)

सम्यक्त्वमोहनीयं क्षपयत्यष्टावतः कषायांश्च । क्षपयति ततो नपुंसकवेदं स्त्रीवेदमथ तस्मात् ॥ ८ ॥

हास्यादि ततः षट्कं क्षपयति तस्माच्च पुरुषवेदमपि । संज्वलनानपि हत्वा, प्राप्नोत्यथ वीतरागत्वम् ॥ ९ ॥

प्रशमरति, श्लो० २६०, २६१

जिनेन्द्रप्रणिधानेन, गुरूणां वन्दनेन च । न तिष्ठति चिरं पापं, छिद्रहस्ते यथोदकम् ॥ १० ॥

बलं जगद्ध्वंसन रक्षणक्षम, कृपा न सा सङ्गमके कृतागसि ।
इतीव सञ्चिन्त्य विमुच्य मानस, रूपेन रोषस्तव नाथ! निर्ययौ ॥ ११ ॥

अशोकवृक्ष सुरपुष्पवृष्टिर्दिव्यध्वनिश्चामरमासन च । भामडल दुन्दुभिरातपत्रं, सत्प्रातिहार्याणि जिनेश्वराणाम् ॥१२॥

किं कर्पूरमय सुधारसमय किं चन्द्ररोचिर्मयं, किं लावण्यमय महामणिमय कारुण्यकेलिमयम् ।
विश्वानन्दमयं महोदयमय शोभामय चिन्मय, शुक्लध्यानमयं वपुर्जिनपतेर्भूयाद्भवालम्बनम् ॥ १३ ॥

नमस्तुभ्य जगन्नाथ! त्रैलोक्याम्भोजभास्कर! ससारमरुकल्पद्रो! विश्वोद्धारणबान्धव! ॥ १४ ॥

देव! त्व तु सदा नामि-सतक्षानमेकवारिद' । मोहान्धकारमूढानां एकदीपस्त्वमेव हि ॥ १५ ॥

जिनधर्मविनिर्मुक्तो, माऽभूव चक्रवर्त्यपि । चेटोऽपि दरिद्रोऽपि, जिनधर्माधिवासित ॥ १६ ॥

नेन्द्र श्रेणिनताप्रतापभवन भव्याङ्गिनेत्रामृत, सिद्धान्तोपनिषद्विचारचतुरै प्रीत्या प्रमाणीकृता ।
मूर्ति स्फूर्तिमती सदा विजयते जैनेश्वरी विस्फुरन्, मोहोन्मादघनप्रमादमदिरामत्तैरनालोकिता ॥ १७ ॥

नेत्रानन्दकरी भवोदधितरी श्रेयस्तरोर्मञ्जरी, श्रीमद्धर्ममहानरेन्द्रनगरी व्यापल्लताधूमरी ।
हर्षोत्कर्षशुभप्रभावलहरी रागद्विषा जित्वरी, मूर्ति श्रीजिनपुङ्गवस्य भवतु श्रेयस्करी देहिनाम् ॥ १८ ॥

ये मूर्तिं तव पश्यत शुभमयीं ते लोचने लोचने, या ते वक्ति गुणावलिं निरुपमां सा भारती भारती ।
या ते न्यञ्चति पादयोर्वरदयो' सा कन्धरा कन्धरा, यत्ते ध्यायति नाथ! वृत्तमनघ त मानस मानसम् ॥ १९ ॥

अन्यथा शरणं नास्ति, त्वमेव शरण मम । तस्मात् कारुण्यभावेन, रक्ष रक्ष जिनेश्वर! ॥ २० ॥

अद्य मे सफलं जन्म, अद्य मे सफला क्रिया । अद्य मे सफलं गात्रं, जिनेन्द्र ! तव दर्शनात् ॥ २१ ॥
दर्शनात् दुरितध्वंसः, वन्दनाद् वाञ्छितप्रदः । पूजनात् पूरकः श्रीणां, जिनः साक्षात्सुरद्रुमः ॥ २२ ॥
जिने भक्तिर्जिने भक्तिर्जिने भक्तिर्दिने दिने । सदा मेऽस्तु सदा मेऽस्तु, सदा मेऽस्तु भवे भवे ॥ २३ ॥
नमो दुर्वाररागादि–वैरिवारनिवारिणे । अर्हते योगिनाथाय महावीराय तायिने ॥ २४ ॥
त्वां त्वत्फलभूतान् सिद्धांस्त्वच्छासनरतान् मुनीन् । त्वच्छासनं च शरणं प्रतिपन्नोऽस्मि भावतः ॥ २५ ॥
तव प्रेष्योऽस्मि दासोऽस्मि सेवकोऽस्म्यस्मि किङ्करः । ओमिति प्रतिपद्यस्व नाथ ! नातः परं ब्रुवे॥ २६ ॥
नारका अपि मोदन्ते, यस्य कल्याणपर्वसु । पवित्रं तस्य चारित्रं, को वा वर्णयितुं क्षमः ॥ २७ ॥
श्रीपार्श्वो धरणेन्द्रसेवितपदः पार्श्वं स्तुवे भक्तितः, पार्श्वेन प्रतिबोधितश्च कमठः पार्श्वाय कुर्वेऽर्चनत् ।
पार्श्वात् चिन्तितकार्यसिद्धिरखिला पार्श्वस्य तेजो महत्, श्रीपार्श्वे प्रकटप्रभाव इह नः श्रीपार्श्व ! सौख्यं कुरु ॥ २८ ॥
श्रीशत्रुञ्जयभूषणं जिनवरं श्रीनाभिभूपात्मजं, सेन्द्रैर्नाकिवरैर्नरेन्द्रनिकरैर्भक्त्या प्रणुन्नैर्नतम् ।
ज्ञानं यस्य त्रिकालवस्तुविषयं लोकेत्तरामासकम्, सर्वेषां हितदं कृपारसमयं वन्दे तमादीश्वरं ॥ २९ ॥
श्रीपार्श्वं तीर्थनाथं प्रशमरसमयं केवलानन्दयुक्तं, वामेयं पार्श्वयक्षैः सुरवरसहितैः सेवितं भूरिभक्त्या ।
यस्य स्नात्राभिषेक पृथुतर कमलै र्निर्जरा यादवाः स्युः, ख्यातं शङ्खेश्वरं तं त्रिभुवनविहितख्यातकीर्तिं नमामि ॥ ३० ॥
श्राद्धः श्रोता सुधीर्वक्ता, युज्येयातां यदीश ! तत् । त्वच्छासनस्य साम्राज्य–मेकच्छत्रं कलावपि ॥ ३१ ॥
वीतरागस्तोत्र नवमप्रकाश श्लो० ३

कुदेव ३

ये स्त्रीशस्त्राक्षसूत्रादिरागाद्यङ्ककलङ्किता । निग्रहानुग्रहपरास्ते देवा स्युर्न मुक्तये ॥१॥ यो० प्र० २, श्लो० ४६
सरागोऽपि हि देवश्चेद् गुरुरब्रह्मचार्यपि। कृपाहीनोऽपि धर्मः स्यात्, कष्ट नष्ट हहा! जगत् ॥५॥ यो०प्र०श्लो० १४

गुरु ४

"गु" शब्दस्त्वन्धकार स्याद् "रु" शब्दस्तन्निवारक । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते ॥ १ ॥
धर्मज्ञो धर्मकर्ता च, सदा धर्मपरायण । सत्त्वेभ्य सर्वशास्त्रार्थदेशको गुरुरुच्यते ॥ २ ॥ कु० पृ० ५१ (प्र स.)
महाव्रतधरा धीरा भैक्ष्यमात्रोपजीविनः । सामायिकस्था धर्मोपदेशका गुरवो मता ॥ ३ ॥ अजितनाथचरित्रे
एकमप्यक्षर यस्तु, गुरु शिष्ये निवेदयेत्। पृथिव्यां नास्ति तद्द्रव्य, यद्दत्त्वा ह्यनृणी भवेत् ॥ ४ ॥
एकाक्षरप्रदातारं, यो गुरु नाभिमन्यते। शुनीयोनिशत गत्वा, चाण्डालेष्वपि जायते॥५॥अत्रि० अ०,१ श्लो० ९,१०
विना गुरुभ्यो गुणनीरधिभ्यो, जानाति धर्मं न विचक्षणोऽपि ।
यथाऽर्थसार्थं गुरुलोचनोऽपि, दीप विना पश्यति नान्धकारे ॥ ६ ॥ कुमारपालप्रबन्ध पृ० ४६ (आत्मा० स०)

शुभोपदेशदातारो, वयोवृद्धा बहुश्रुताः । कुशला धर्मशास्त्रेषु, पर्युपास्या मुहुर्मुहुः ॥ ७ ॥
अभ्युत्थानादियोगश्च, तदन्ते निभृतासनम् । नामग्रहश्च नास्थाने, नावर्णश्रवणं क्वचित् ॥ ८ ॥
अक्षरस्यापि चैकस्य, पदार्धस्य पदस्य च । दातारं विस्मरन् पापी, किं पुनर्धर्मदेशिनाम् ॥९॥ उ० भाग १,पृ० १७८
उपदेशः शुभो नित्यं दर्शनं धर्मचारिणाम् । स्थाने विनय इत्येतत्साधुसेवाफलं महत् ॥ १० ॥ धर्मबन्धु पृ० ५३
विदलयति कुबोधं बोधयत्यागमार्थं, सुगतिकुगतिमार्गौ पुण्यपापे व्यनक्ति ।
अवगमयति कृत्याकृत्यभेदं गुरुर्यो, भवजलनिधिपोतस्तं विना नास्ति कश्चित् ॥ ११ ॥
पूर्वं वीरजिनेश्वरेऽपि भगवत्याख्याति धर्मं स्वयं, प्रज्ञावत्यभयेऽपि मन्त्रिणि न यां कर्तुं क्षमः श्रेणिकः ।
अक्लेशेन कुमारपालनृपतिस्तां जीवरक्षां व्यधात्, पीत्वा यस्य वचः सुधां स परमः श्री हेमसूरिर्गुरुः ॥ १२ ॥
सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः । अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ॥ १३ ॥

धर्म ५

स धर्मो यो दयायुक्तः, सर्वप्राणिहितप्रदः । स एवोत्तारणे शक्तो भवाम्भोधेः सुदुस्तरात् ॥ १ ॥ तत्त्वामृत, श्लो ६५
वचः सत्यं गुरौ भक्तिः, शक्त्या दानं दया दमः । अधर्मः पुनरेतस्माद्विपरीतोऽसुखावहः ॥ २ ॥ पृ० ४ (प्र. स.)

पञ्चैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् । अहिंसा सत्यमस्तेयं, त्यागो मैथुनवर्जनम् ॥३॥ अष्टक १३ श्लो० २

अहिंसासूनृतास्तेय-ब्रह्माकिञ्चनतामय । केवल्युपज्ञ परमो धर्मश्च शरण मम ॥४॥ त्रि० प० १० स १२ श्लो ३९८

अहिंसा सत्यमस्तेय, त्यागो मैथुनवर्जनम् । पञ्चस्वेतेषु धर्मेषु, सर्वे धर्मा प्रतिष्ठिता ॥५॥ म०शा० अ० १३ श्लो ३०

कथमुत्पद्यते धर्म ? कथ धर्मो विवर्धते ? । कथ च स्थाप्यते धर्म ? कथ धर्मो विनश्यति ? ॥ ६ ॥

महाभारत, शांतिपर्व, पाद १, अ० १९, श्लो० ८७

सत्येनोत्पद्यते धर्मो दयादानेन वर्धते । क्षमाया स्थाप्यते धर्मो लोभाद्धर्मो विनश्यति ॥ ७ ॥

महाभारत, शातिपर्व पाद १, अ १९, श्लो० १०१

धर्मो मङ्गलमुत्कृष्ट, धर्म स्वर्गापवर्गद । धर्म ससारकान्तारोलङ्घने मार्गदेशक ॥८॥ त्रि० पर्व १, सर्ग०१, श्लो १४६

धनदो धनार्थिना प्रोक्त. कामिना सर्वकामद । धर्म एवापवर्गस्य, पारम्पर्येण साधकः ॥९ ॥ धर्मबिन्दु अ० १

सुखार्थं सर्वभूतानां, मता सर्वा प्रवृत्तय । सुख नास्ति विना धर्मं, तस्माद्धर्मपरो भवेत् ॥ १० ॥

धर्मश्च नावसीदेत, कपालेनापि जीवत. । आढ्योऽस्मीत्यवगन्तव्य, धर्मवित्ता हि साधव ॥११॥ श्राद्धविधि पृ० १००

आहारनिद्राभयमैथुन च, सामान्यमेतत्त् पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो, धर्मेण हीना पशुभि समाना ॥ १२ ॥

सयम सूनृत शौचं, ब्रह्माकिञ्चनता तप । क्षान्तिर्मार्दवमृजुता, मुक्तिश्च दशधा स तु ॥१३ ॥ यो० प्र० ४, श्लो० ९३

धृति क्षमा दमोऽस्तेय, शौचमिन्द्रियनिग्रह । धीर्विद्या सत्यमक्रोधो, दशक धर्मलक्षणम् ॥ १४ ॥

दश लक्षणानि धर्मस्य, ये विप्राः समधीयते । अधीत्य चानुवर्तन्ते, ते यान्ति परमां गतिम् ॥ १५ ॥
मनुस्मृति अ० ६ श्लो० ९२, ९३

दानं सुपात्रे विशदं च शीलं, तपो विचित्रं शुभभावना च ।
भवार्णवोत्तारणयानपात्रं, धर्मं चतुर्धा मुनयो वदन्ति ॥१६॥ उपदेशप्रासाद (भाषांतर), भाग ४, पृ० ५३ (प्र. स.)
दुर्गतिप्रपतज्जन्तुधारणाद्धर्म उच्यते । दानशीलतपोभावभेदात् स तु चतुर्विधः ॥१७॥ त्रि० प० १, स० १ श्लो० १५२
क्षणे हि समतिक्रान्ते, सद्धर्मपरिवर्जिते । आत्मानं मुषितं मन्ये, कषायेन्द्रियतस्करैः ॥१८॥ तत्त्वामृत श्लो० ६०
मृता नैव मृतास्तेऽत्र, ये नरा धर्मकारिणः । जीवन्तोऽपि मृतास्ते वै, ये नराः पापकारिणः॥१९॥ तत्त्वामृत श्लो० ६३
धर्मस्य दुर्लभो ज्ञाता, सम्यग्वक्ता ततोऽपि च । श्रोता ततोऽपि श्रद्धावान् कर्ता कोऽपि ततः सुधीः॥ २० ॥
दुःखं पापात् सुखं धर्मात्, सर्वशास्त्रेषु संस्थितिः। न कर्तव्यमतः पापं कर्तव्यो धर्मसञ्चयः॥२१॥ शा०स०स्त०१श्लो०३
धर्मस्य फलमिच्छन्ति, धर्मं नेच्छन्ति मानवाः । फलं पापस्य नेच्छन्ति, पापं, कुर्वन्ति सादराः ॥ २२ ॥
ते धत्तूरतरुं वपन्ति भवने प्रोन्मूल्य कल्पद्रुमं, चिन्तारत्नमपास्य काचशकलं स्वीकुर्वते ते जडाः ।
विक्रीय द्विरदं गिरीन्द्रसदृशं क्रीणन्ति ते रासभं, ये लब्धं परिहृत्य धर्ममधमा धावन्ति भोगाशया ॥२३॥ सि०श्लो० ३
अनन्तदुःखः संसारो मोक्षोऽनन्तसुखः पुनः। तयोस्त्यागपरिप्राप्तिहेतुर्धर्मं विना न हि ॥२४॥ त्रि० पर्व १, स० २३, श्लो० २७
न हिंस्यात् सर्वभूतानि, नानृतं वा वदेत् क्वचित् । नाहितं नाप्रियं ब्रूयान्न स्तेनः स्यात् कथञ्चन ॥ २५ ॥
वराहपुराण अ० १६, पृ० ५५३

ब्रह्मचर्यमहिंसा च, सत्यमास्तेयवर्जनम् । व्रतेश्चैतानि चत्वारि, चरितव्यानि नित्यश ॥ २६ ॥ विष्णुभक्तिचन्द्रोदय
अशाश्वतानि गात्राणि, विभवो नैव शाश्वत । नित्य सनिहितो मृत्यु , कर्तव्यो धर्मसंग्रह ॥ २७ ॥

वेदव्यासस्मृति, अ० ४, श्लो० १९

धर्माज्जन्म कुले कलङ्करहिते जाति. सुधर्मात्परा, धर्मादायुरखण्डित गुरुबल धर्माच्च नीरोगता ।
धर्माद्वित्तमनिन्दित निरुपमा भोगा सुकीर्ति सुधी , धर्मादेव च देहिना प्रभवत स्वर्गापवर्गावपि ॥ २८ ॥

धर्मकल्पद्रुम, पृ० १, श्लो० ३७ (दे ला)

दीर्घमायुर्यशश्चारु, शुद्धि बुद्धि शुभा श्रियम् । प्राज्य राज्य सुख शश्वद् दत्ते धर्मसुरद्रुम. ॥ २९ ॥

सूक्तरत्नावली, पृ० ४७, श्लो० ४९६ (आत्मा स)

स्याद्वादो विद्यते यस्मिन् , पक्षपातो न विद्यते । नास्त्यन्यपीडन किञ्चिज्जैनधर्म' स उच्यते ॥ ३० ॥
बौद्धानामृजुसूत्रतो मतमभूद्वेदान्तिना सङ्ग्रहात् , साङ्ख्याना तत एव नैगमनयाद्योगश्च वैशेषिक ।
शब्दब्रह्मविदोऽपि शब्दनयत. सर्वैर्नयैर्गुम्फिता, जैनी दृष्टिरितीह सारतरता प्रत्यक्षमुद्वीक्ष्यते ॥ ३१ ॥ अध्यात्मसार
जिनधर्मविनिर्मुक्तो मा भूव चक्रवर्त्यपि । स्या चेटोऽपि दरिद्रोऽपि, जिनधर्माधिवासितः ॥ ३२ ॥

योगशास्त्र, पृ० २६९, श्लो० १४१ (प्र स)

जिनशासनस्य सारो, जीवदया निग्रह' कषायाणाम् । साधर्मिकवात्सल्य, भक्तिश्च तथा जिनेन्द्राणाम् ॥३३॥ धर्मबिन्दु
जैनो धर्मो दयामूलो, जन्म सुश्रावके कुले । गुरूणा पादभक्तिश्च, विना पुण्यं न प्राप्यते ॥ ३४ ॥

पूज्यपूज्या दया दानं तीर्थयात्रा जपस्तपः । श्रुतं परोपकारश्च, मर्त्यजन्मफलाष्टकम् ॥३५॥ सू० द्वा० १, श्लो० २

देवपूजा गुरूपास्तिः, स्वाध्यायः संयमस्तपः । दानं चेति गृहस्थानां, षट् कर्माणि दिने दिने ॥३६॥ सू० द्वा० १ श्लो० ४

माणुस्सं विग्गहं लद्धुं, सुइ धम्मस्स दुल्लहा । जं सोच्चा पडिवज्जन्ति तवं खन्तिमहिंसयं ॥३७॥ उ० तृ० गा० ८

दानं वित्ताद्दतं वाचः, कीर्तिधर्मौ तथाऽऽयुषः । परोपकरणं कायादसारात्सारमुद्धरेत् ॥ ३८ ॥ सू० द्वा० १, श्लो० १२

बुद्धेः फलं तत्त्वविचारणं च, देहस्य सारं व्रतधारणं च ।
अर्थस्य सारं किल पात्रदानं, वाचः फलं प्रीतिकरं नराणाम् ॥३९॥ सूक्तमुक्तावली द्वा० १, श्लो १३

जिनेन्द्रपूजा गुरुपर्युपास्तिः, सत्त्वानुकम्पा शुभपात्रदानम् । गुणानुरागः श्रुतिरागमस्य, नृजन्मवृक्षस्य फलान्यमूनि ॥४०॥
सूक्तमुक्तावली, द्वार १ श्लो० १४

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणमनं, मुखे सत्या वाणी श्रुतमवितथं च श्रवणयोः ।
हृदि स्वच्छा वृत्तिर्विजयिभुजयोः पौरुषमहो, विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥४१॥ सू० द्वार १ श्लो० १६

पिता योगाभ्यासो विषयविरतिः सा च जननी, विवेकः सोदर्यः प्रतिदिनमनीहा च भगिनी ।
प्रिया क्षान्तिः पुत्रो विनय उपकारः प्रियसुहृत्, सहायो वैराग्यं गृहमुपशमो यस्य स सुखी ॥४२॥ सू० द्वार १, श्लो० १७

धैर्यं यस्य पिता क्षमा च जननी भ्राता मनःसंयमः, सूनुः सत्यमिदं दया च दुहिता शान्तिः स्वयं गेहिनी ।
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनं, यस्यैतानि कुटुम्बिनो वद सखे! तस्याद्विनः क्वासुखम् ॥ ४३ ॥
सूक्त० द्वार १ श्लो० १८

दव श्रेणिकवत्प्रपूनय गुरु वन्दस्व गोविन्दवद्, दान शीलतप प्रसङ्गसुभगा चाभ्यस्य सद्भावनाम् ।
श्रेयासश्च सुदर्शनश्च भगवानाद्य स चक्री यथा, धर्म्ये कर्मणि कामदेनवदहो चेतश्चिर स्थापय ॥४४॥सू० द्वार १ श्लो० २९
जन्तूनामवन जिनेशगहनं भक्त्यागमाऽऽकर्णनं, साधूनां नमन मदापनयन सम्यग्गुरोर्माननम् ।
मायाया क्षन । क्रुधश्च शमन लोभद्रुमो न्मूलन, चेत' शोधनमिन्द्रियाश्वन्मन यत्तत् शिवोपायनम् ॥४५॥ सू०द्वार १, श्लो०३०
त्रैकाल्य जिनपूजन प्रतिदिन सङ्घस्य सम्मानन, स्वाध्यायो गुरुसेवन च विधिना दान तथाऽऽवश्यकम् ।
शक्त्या न व्रतपालन वरतपो ज्ञानस्य पाठस्तथा, सैप श्रावकपुङ्गवस्य कथितो धर्मो जिनेन्द्रागमे ॥ ४६ ॥
सूक्त० द्वार १, श्लो० ३२

जत्थ य विसयविराओ, कसायचाओ गुणेसु अणुराओ ।
किरिआसु अप्पमाओ, सो धम्मो सिवसुहोवाओ ॥ ४७ ॥ सूक्त० द्वार १, श्लो० ४६
पच्चक्खाण पूआ पडिकमणं पोसहो परुवयारो । पच पयारा जस्स उ न पयारो तस्स संसारो ॥४८॥ सू० द्वार ६, श्लो० ४९
अनित्यानि शरीराणि, विभवो नैव शाश्वत । नित्य सनिहितो मृत्यु, कर्तव्यो धर्मसग्रह' ॥५०॥
सूक्त० द्वार ६, श्लो० १२

अङ्कस्थाने भवेद्धर्म शून्यस्थान तत' परम् । अङ्कस्थाने पुनर्भ्रष्टे, सर्वं शून्यमिद भवेत् ॥५१॥ सूक्त० द्वार ६ श्लो० २२
त्यज दुर्जनसंसर्गं, भज साधुसमागमम् । कुरु पुण्यमहोरात्र स्मर नित्यमनित्यताम् ॥ ५२ ॥ सूक्त० द्वार ६ श्लो० २९
आयुर्वर्षशत नृणा परिमित रात्र्या तदर्धीकृत । तस्यार्द्धस्य कदाचिदर्द्धमधिक वार्द्धक्यबाल्ये गतम् ।

शेषं रोगवियोगशोकमदनक्रोधादिभिर्व्याकुल-स्यायुर्याति नरस्य तत्र कतमो यो धर्मकर्मक्षणः ? ॥ ५३ ॥
बालः प्रायो रमणाऽऽसक्तास्तरुणः प्रायो रमणीरक्तः । वृद्धः प्रायश्चिन्तामग्नस्तदहो धर्मे कोऽपि न लग्नः ॥ ५४ ॥
सूक्त० द्वार ६, श्लो० ४९

धर्मो मातेव पुष्णाति, धर्मः पाति पितेव च । धर्मः सखेव प्रीणाति, धर्मः स्निह्यति बंधुवत् ॥ ५५ ॥
सूक्त० द्वार ६, श्लो० ५०

धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्बलं, धर्मेणैव भवन्ति निर्मलयशो विद्यार्थसंपत्तयः ।
कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते, धर्मः सम्यगुपासितो भवति हि स्वर्गापवर्गप्रदः ॥ ५६ ॥
दुर्गतिप्रपतत्प्राणि-धारणाद्धर्म उच्यते । संयमादिर्दशविधः, सर्वज्ञोक्तो विमुक्तये ॥ ५७ ॥
क्रिधर्मो दययैकधा निजगदे ज्ञानक्रियाभ्यां द्विधा, ज्ञानाद्यैस्त्रिविधश्चतुर्विधतया ख्यातो व्रतैः पञ्चधा ।
षोढावश्यकपालनेन नयतः सप्ताष्टधा मातृभिः, सतत्त्वैर्नवधा तथा दशविधः क्षान्त्यादिभिर्निर्मलः ॥ ५८ ॥
पात्रे दानं गुरुषु विनयः सर्वसत्त्वानुकम्पा, न्याय्या वृत्तिः परहितविधावादरः सर्वकालम् ।
कार्यो न श्रीमदपरिचयः सङ्गतिः सत्सु सम्यग्, राजन् सेव्यो विशदमतिना सैष सामान्य धर्मः ॥ ५९ ॥

ज्ञान ६

विषयप्रतिभासं चात्मपरिणतिमत्तथा । तत्त्वसंवेदनं चैव, ज्ञानमाहुर्महर्षयः ॥ १ ॥ अष्टक. ज्ञानाष्टक. श्लो० १

यथावस्थिततत्त्वानां, सक्षेपाद्विस्तरेण वा । योऽवबोधस्तमत्राहु , सम्यग्ज्ञान मनीषिण' ॥ २ ॥ यो पृ ३६ श्लो १६
निर्वाणपदमप्येक, भाव्यते यन्मुहुर्मुहु । तदेव ज्ञानमुत्कृष्ट, निर्बन्धो नास्ति भूयसा ॥ ३ ॥ ज्ञा ज्ञानाष्टक श्लो. २
स्वभावलाभसस्कारकारण ज्ञानमिष्यते । ध्यान्ध्यमानमतस्त्वन्यत्, तथा चोक्त महात्मना ॥ ४ ॥
वादाश्च प्रतिवादाश्च, वदन्तोऽनिश्चितास्तथा । तत्त्वान्त नैव गच्छन्ति, तिलपीलकवद् गतौ ॥५॥ ज्ञा ज्ञा श्लो ३-४
ज्ञानाजीर्णमृता' केचिज्ज्ञानदग्धास्तथाऽपरे । अन्ये तु ज्ञानवाहिका', केचिज्ज्ञानमया पुन. ॥ ६ ॥
अस्ति चेद् ग्रथिभिद् ज्ञान, कि चित्रैस्तन्त्रयन्त्रणै । प्रदीपा क्वोपयुज्यन्ते, तमोघ्नी दृष्टिरेव चेत् ? ॥७॥ ज्ञा ज्ञा ६
मिथ्यात्वशैलपक्षच्छिज्ज्ञानदम्भोलिशोभित । निर्भय शक्रवद्योगी, नदत्यानन्दनन्दने ॥८॥ ज्ञा ज्ञानाष्टक श्लो ७
पीयूषमसमुद्रोत्थ, रसायनमनौषधम् । अनन्यापेक्षमैश्वर्य, ज्ञानमाहुर्मनीषिण ॥ ९ ॥ ज्ञा ज्ञानाष्टक श्लो ८
ज्ञान तृतीय पुरुषस्य नेत्र, समस्ततत्त्वार्थविलोकदक्षम् ।
तेजोऽनपेक्ष विगतान्तराय, प्रवृत्तिमत् सर्वजगत्त्रयेऽपि ॥१०॥ सुभाषितरत्नसदोह श्लो १९४
ज्ञान स्यात् कुमतान्धकारतरणिर्ज्ञान जगल्लोचन, ज्ञान नीतितरङ्गिणीकुलगिरिर्ज्ञान कषायापहम् ।
ज्ञान निर्वृतिवश्यमन्त्रममल ज्ञान मन पावन, ज्ञान स्वर्गगतिप्रयाणपटह ज्ञान निदान श्रियः ॥११॥सु० श्लो० ७
एतत्सम्यग्दर्शनमनधिगमविपर्ययौ तु मिथ्यात्वम् । ज्ञानमथ पञ्चभेद, तत्प्रत्यक्ष परोक्ष च ॥ १२ ॥ प्र० श्लो० २२४
तत्र परोक्ष द्विविध श्रुतमाभिनिबोधिकं च विज्ञेयम् । प्रत्यक्ष चावधिमन पर्यायौ केवल चेति ॥ १३ ॥ प्र० श्लो० २२५
सामायिकविशुद्धात्मा, सर्वथा घातिकर्मण' । क्षयात्केवलमाप्नोति, लोकालोकप्रकाशकम् ॥ १४ ॥ अ के श्लो० १

एतस्मिन् सततं यत्नः, कुग्रहत्यागतो भृशम् । मार्गश्रद्धादिभावेन, कार्य आगमतत्परैः ॥ १५ ॥ अ. ज्ञा. श्लो० ८०
ज्ञानाभ्यासः सदाकार्यो ध्यानेनाध्ययनेन च । तपसो रक्षणं चैव, यदीच्छेद्धितमात्मनः ॥ १६ ॥ तत्वामृत श्लो० ९
निःसङ्गो निर्ममः शान्तो, निरीहः संयमे रतः । यदा योगी भवेदन्तस्तत्त्वमुद्भासते तदा ॥ १७ ॥ यो. प्र. श्लो० २९
आत्मानमात्मना वेत्ति, मोहत्यागाद्य आत्मनि । तदेव तस्य चारित्रं, तज्ज्ञानं तच्च दर्शनं ॥१८॥ यो. प्र० ४ श्लो० २
यदा सर्वं परित्यज्य, निःसङ्गो निष्परिग्रहः । निश्चिन्तश्च चरेद् धर्मं, ब्रह्म सम्पद्यते तदा ॥ १९ ॥आ. उ. काण्ड ७८
जानन्ति केचिन्न तु कर्तुमीशाः, कर्तुं क्षमा ये न च ते विदन्ति ।
जानन्ति तत्त्वं प्रभवन्ति कर्तुं, ते केऽपि लोके विरला भवन्ति ॥ २० ॥ हृदयप्रदीप, श्लो. २
अवशेन्द्रियचित्तानां, हस्तिस्नानमिव क्रिया । दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ॥ २१ ॥
ज्ञानं मददर्पहरं माद्यति यस्तेन तस्य को वैद्यः ।
अमृतं यस्य विषायति, तस्य चिकित्सा कथं क्रियते ॥ २२ ॥ उत्तराध्ययनसूत्रटीका (कमलसंयम) पृ. ७६
तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः । तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ॥२३॥
ज्ञानाद्विदन्ति खलु कृत्यमकृत्यजातं, ज्ञानाच्चरित्रममलं च समाचरन्ति ।
ज्ञानाच्च भव्यभविनः शिवमाप्नुवन्ति, ज्ञानं हि मूलमतुलं सकलश्रियां तत् ॥ २४ ॥ सूक्त. अधिकार ४३. श्लो. ६
ज्ञानदानेन जानाति, जन्तुस्तस्य हिताहितम् । वेत्ति जीवादितत्त्वानि, विरतिं च समश्नुते ॥ २५ ॥
ज्ञानदानादवाप्नोति, केवलज्ञानमुज्ज्वलम् । [illegible] खिलं लोकं, लोकाग्रमधिगच्छति ॥ २६ ॥

आकालमियमाज्ञा, त हेयोपादेयगोचरा । आश्रव सर्वथा हेय उपादेयश्च सवर. ॥ २७ ॥
दान धर्मानभिनेभ्यो वाचनादेशनादिना । ज्ञानसाधनदान च, ज्ञानदानमितीरितम् ॥ २८ ॥
मिथ्याज्ञान समस्त तत्, इहलोकोपयोगि यत् । रागद्वेषादयो यस्मात्, प्रवर्धन्ते शरीरिणाम् ॥ २९ ॥ त्रि दे
मज्जत्यज्ञ किलाज्ञाने विष्ठायामिव शूकर । ज्ञानी निमज्जति ज्ञाने मराल इव मानसे ॥ ३० ॥
निर्वाणपदमप्येक भाव्यते यन्मुहुर्मुहु' । तदेव ज्ञानमुत्कृष्ट निर्बन्धो नास्ति भूयसा ॥ ३१ ॥
स्वभावलाभसंस्कारकारण ज्ञानमिष्यते । ध्यान्ध्यमात्रमतस्त्वन्यत्तथा चोक्त महात्मना ३२ ॥
स्वद्रव्य-गुण-पर्याय चर्या वर्या परान्यथा । इति दत्तात्मस तुष्टिर्मुष्टिज्ञानस्थितिर्मुने' ॥ ३३ ॥
मिथ्यात्वशैलपक्षच्छिज्ज्ञानदम्भोलिशोभित' । निर्भय शक्रवद् योगी नन्दत्यानन्दनन्दने ॥ ३४ ॥ ज्ञान०
यानपात्रसम ज्ञान, बूडता भववारिधौ । मोहान्धकारसहारे, ज्ञान मार्तण्डमण्डलम् ॥ ३५ ॥ सुभाषित स श्लो ६२
ज्ञानस्य ज्ञानिनो वाऽपि, निन्दाप्रद्वेषमत्सरै' । उपघातैश्च विघ्नैश्च, ज्ञानघ्न कर्म बध्यते ॥ ३६ ॥ सु स श्लो. ५६६
ज्ञान कर्मगहीध्रभेदकुलिश शसन्ति मोहापह, ज्ञान भूषणमङ्गिना वरधन ज्ञान जगद्दीपनम् ।
एतत्तत्त्वमतत्त्वमेतदपरं ज्ञानेन विज्ञायते, लोकालोकनिलोकनैकपटव स्युर्ज्ञानदानाज्जना' ॥ ३७ ॥

अज्ञान—७

अज्ञानतमसाच्छन्नो मूढान्त करणो नर । न जानाति कुतो कोऽह, क्वाह गन्ता किमात्मकः ॥ १ ॥

अज्ञानं खलु भो कष्टं, क्रोधादिभ्योऽपि सर्वपापेभ्यः । अर्थं हितमहितं वा, न वेत्ति येनावृतो लोकः ॥२ ॥अ.श्लो० ३
आहारनिद्राभयमैथुनानि, सामान्यमेतत्पशुभिर्नराणाम् । ज्ञानं विशेषः खलु मानवानां, ज्ञानेन हीनाः पशवो मनुष्याः ॥ ३ ॥
अज्ञानी क्षपयेत् कर्म, यज्जन्मशतकोटिभिः । तज्ज्ञानी तु त्रिगुप्तात्मा, निहन्त्यन्तर्मुहूर्तके ॥ ४ ॥ त. श्लो० १९०
मिथ्याज्ञानं समस्तं तदिहलोकोपयोगि यत् । रागद्वेषादयो यस्मात् प्रवर्धन्ते शरीरिणाम् ॥५॥ सु० सू० पृ. ६ श्लो. ३३

चारित्र ८

सर्वसावद्ययोगानां, त्यागश्चारित्रमिष्यते । कीर्तितं तदहिंसादिव्रतभेदेन पञ्चधा ॥ १ ॥ यो. प्र० ३९ श्लो० १८ प्र.स.
अथवा पञ्चसमितिगुप्तित्रयपवित्रितम् । चरित्रं सम्यक्चारित्रमित्याहुर्मुनिपुङ्गवाः ॥२॥ यो. पृ० ३३ श्लो० ३४ (प्र. स.)
सद्दर्शनज्ञानबलेन भूता, पापक्रियाया विरतिस्त्रिधा या ! जिनेश्वरैस्तद्गदितं चरित्रं, समस्तकर्मक्षयहेतुभूतम् ॥३॥ सु०२१०
सामायिकमित्याद्यं छेदोपस्थापनं द्वितीयं तु । परिहारविशुद्धिकं सूक्ष्मसम्परायं यथाख्यातम् ॥४॥ प्र. श्लो० २२८
पञ्चास्रवाद्विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः । दण्डत्रयविरतिश्चेति, संयमः सप्तदशभेदः ॥ ५ ॥ प्र. श्लो० १७२
चारित्ररत्नान्न परं हि रत्नं, चारित्रवित्तान्न परं हि वित्तम् ।
चरित्रलाभान्न परो हि लाभश्चारित्रयोगान्न परो हि योगः ॥ ६ ॥ प.ए, पृ० १६ श्लो० १४८
सद्दर्शनज्ञानतपोदयाद्याश्चारित्रभाजः सफलाः समस्ताः । व्यर्थाश्चरित्रेण विना भवन्ति ज्ञात्वेह सन्तश्चरिते यतन्ते ॥७॥
सम्यक्त्वं भावयेत् क्षिप्रं, सज्ज्ञानं चरणं तथा । कृच्छ्रात् सुचरितं प्राप्तं, नृत्वं याति निरर्थकम् ॥ ८ ॥ त. श्लो० ४६

दीक्षा गृहीता दिनमेकमेव, येनोग्रचित्तेन शिव स याति । न वत् कदाचित् तदवश्यमेव, वैमानिक स्यात् त्रिदशप्रधान'॥८॥
पर्व० मौन० पृ १६ श्लोक १४९

नो दुष्कर्मप्रयासो न युवतिसुतस्वामिदुर्वाक्यदु'ख, राजाद्रौ न प्रणामोऽशनवसनधनस्थानचिन्ता न चैव ।
नानाप्तिर्लोकपूजा प्रशमसुखरति प्रेत्य मोक्षाद्यवाप्ति', श्रामण्येऽमी गुणा स्युस्तदिह सुमतयस्तत्र यत्न कुरुध्वम् ॥९॥
मिथ्या वक्तुं न हि जानमि, सार किंचित्तन कथयामि । गुप्तित्रितय समिती पञ्च, यावज्जीवं खलु मा मुञ्च ॥ १० ॥
पञ्चाश्रवाद्विरमण पञ्चेन्द्रियनिग्रह कपायजय । दण्डत्रयविरतिश्चेति, सयम सप्तदशभेद. ॥ ११ ॥
जयणाय धम्मजणणी, जयणा धम्मस्स पालणी होइ । तवपुड्ढीकरीजयणा, एगतसुहावहा जयणा ॥१२ ॥
कपाया यस्य नो छिन्ना, यस्य नात्मवश मन' । इन्द्रियाणि न गुप्तानि, प्रव्रज्या तस्य निष्फला ॥ १३ ॥

९ मुनी–योगी

पूर्णो मग्न स्थिरोऽमोहो ज्ञानी शान्तो जितेन्द्रिय । त्यागी क्रियापरस्तृप्तो निर्लेपो निस्पृहो मुनि ॥ १ ॥
विद्याविवेकसम्पन्नो मध्यस्थो भयवर्जित । अनात्मशसकस्तत्त्वदृष्टि' सर्वसमृद्धिवान् ॥ २ ॥
ध्याता कर्मविपाकानामुद्विग्नो भववारिधे । लोकसंज्ञाविनिर्मुक्त. शास्त्रदृग् निष्परिग्रह ॥ ३ ॥
शुद्धानुभववान् योगी नियागप्रतिपत्तिमान् । भावार्चाध्यानतपसा भूमि. सर्वनयाश्रित. ॥ ४ ॥
स्पष्ट निष्टङ्कितं तत्त्व अष्टकैः प्रतिपन्नवान् । मुनिर्महोदय ज्ञानसार समधिगच्छति ॥ ५ ॥

निर्विकारं निराबाधं ज्ञानसारमुपेयुषाम् । विनिवृत्तपराशानां मोक्षोऽत्रैव महात्मनाम् ॥ ६ ॥

सावद्ययोगविरतो, गौरवत्रयवर्जितः । त्रिगुप्तः पञ्चसमितो, रागद्वेषविनाकृतः ॥ ७ ॥

निर्ममो नगरवसत्यंगोपकरणादिषु । ततोऽष्टादशशीलांगसहस्रधारणोद्धुरः ॥ ८ ॥

निरन्तरं यथाशक्ति, नानाविधतपः परः । संयमं सप्तदशधा, धारयन्नपिखण्डितम् ॥ ९ ॥ सुभाषितसंग्रहात्

निरीहा निरहङ्कारा, निर्ममाः समचेतसः । महाव्रतधरा धीराः, साधवः शरणं मम ॥१०॥ त्रिषष्ठी पर्व १० श्लो. ३९७

न यस्य मित्रं न च कोऽपि शत्रु-र्निजः परो वाऽपि न कश्चनास्ते ।
न चेंद्रियार्थेषु रमेत चेतः, कषायमुक्तं परमः स योगी ॥ ११ ॥ अ. कल्पद्रुम, अधिकार १, श्लो० ९

समः शत्रौ च मित्रे च, तथा मानापमानयोः । शीतोष्णसुखदुःखेषु, समः सङ्गविवर्जितः ॥१२॥ भ. अ. १३ श्लो. १४

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः, स्थितधीर्मुनिरुच्यते ॥ १३ ॥ भ. अ. २ श्लो. ५६

जीवितं यस्य धर्मार्थं, धर्मो ज्ञानार्थमेव च । ज्ञानं च ध्यानयोगार्थं, सोऽचिरान्मुच्यते नरः ॥१४॥ यति. श्लो. ११

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला, रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तराऽतिगहना प्रोत्तुङ्गचिन्तातटी, तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥१५॥ वै. श्लो. १०

धांधवधनेन्द्रियसुखत्यागात्, त्यक्तभयविग्रहः साधुः । त्यक्तात्मा निर्ग्रन्थस्त्यक्ताहंकारममकारः ॥१६॥ प्र. श्लो. १७३

अहंकारं बलं दर्पं, कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥१७॥ भ. अ. १८ श्लो. ५३

१० महाव्रतानि

प्राणातिपात नो कुर्यात्, कर्मबन्धनिबन्धनम् । स्वप्राणवत् परप्राणपरित्राणपरो भवेत् ॥ १ ॥
न मृषा जातु भाषेत, किं तु भाषेत सनृतम् । परपीडा परिहरन्नात्मपीडामिवागतान् ॥ २ ॥
अदत्तं नाददीतार्थं चाल्पमप्यगोपम नृणाम् । अर्थं हि हरता तेषा, वध एव कृतो भवेत् ॥ ३ ॥
मैथुन न विदध्यान्न, बहुजीवोपमर्दकम् । ब्रह्मचर्यरतो नर, परब्रह्मनिबन्धनम् ॥ ४ ॥
परिग्रह न कुर्याच्च, परिग्रहवशेन हि । गौरिवाधिकभारेण, विधुरो निपतत्यध ॥ ५ ॥
एतान् प्राणातिपातादीन्, सूक्ष्मांस्त्यक्तु न चेत्क्षमा । त्यजेयुर्नादरास्तर्हि, सूक्ष्मत्यागेऽनुरागिण ॥ ६ ॥ त्रि म दे

११ पञ्च समितय

ईर्याभाषैषणाऽऽदाननिक्षेपोत्सर्गसज्ञिका । पञ्चाहु समितीस्तिस्रो गुप्तीस्त्रियोगनिग्रहात् ॥१॥ यो प्र १ श्लो ३५
लोकातिवाहिते मार्गे, चुम्बिते भास्वदंशुभि । जन्तुरक्षार्थमालोक्य, गतिरीर्या मता सताम् ॥२॥ यो प्र १ श्लो ३६
अवद्यत्यागतः सर्वजनीनं मितभाषणम् । प्रिया वाचयमाना सा, भाषासमितिरुच्यते ॥ ३ ॥ यो प्र १ श्लो ३७
द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् । मुनिर्यदन्नमादत्ते, सैषणा समितिर्मता ॥ ४ ॥ यो प्र १ श्लो ३८ (प्र.स)
आसनादीनि सवीक्ष्य, प्रतिलिख्य च यत्नत । गृह्णीयान्निक्षिपेद्वा यत्, साऽऽदानसमिति स्मृता ॥५॥ यो प्र ४–३९
कफमूत्रमलप्राय, निर्जन्तुजगतीतले । यत्नाद्यदुत्सृजेत्साधु, सोत्सर्गसमितिर्भवेत् ॥ ६ ॥ यो प्र १ श्लो. ४०

१२ त्रिगुप्तयः

विमुक्तकल्पनाजालं, समत्वे सुप्रतिष्ठितम् । आत्मारामं मनस्तज्ज्ञैर्मनोगुप्तिरुदाहृता ॥ १ ॥ यो. प्र. १ श्लो. ४१ प्र.स.
संज्ञादिपरिहारेण, यन्मौनस्यावलम्बनम् । वाग्वृत्तेः संवृतिर्वा या, सा वाग्गुप्तिरिहोच्यते ॥२॥ यो. प्र. १, श्लो. ४२
उपसर्गप्रसङ्गेऽपि, कायोत्सर्गजुषो मुनेः । स्थिरीभावः शरीरस्य, कायगुप्तिर्निगद्यते ॥ ३ ॥
शयनासननिक्षेपाऽऽदानचङ्क्रमणेषु यः । स्थानेषु चेष्टानियमः, कायगुप्तिस्तु साऽपरा ॥४॥ यो. प्र. १, श्लो. ४३, ४४

१३ अहिंसा

न यत्प्रमादयोगेन, जीवितव्यपरोपणम् । त्रसानां स्थावराणां च, तदहिंसाव्रतं मतम् ॥१॥ त्रि. पर्व १, स. ३, श्लो. ६२२
श्रूयतां धर्मसर्वस्वं, श्रुत्वा चैवावधार्यताम् । आत्मनः प्रतिकूलानि, परेषां न समाचरेत् ॥२॥ यो. द्वि. प्र. श्लो. २०
निरर्थिकां न कुर्वीत, जीवेषु स्थावरेष्वपि । हिंसामहिंसाधर्मज्ञः, काङ्क्षन्मोक्षमुपासकः ॥३॥ यो. द्वि. प्र. श्लोक २१
अमेध्यमध्ये कीटस्य, सुरेन्द्रस्य सुरालये । समाना जीविताकाङ्क्षा, समं मृत्युभयं द्वयोः ॥ ४ ॥ इ. स. श्लोक ३०
मातेव सर्वभूताना-महिंसा हितकारिणी । अहिंसैव हि संसार-मरावमृतसारणिः ॥५॥ यो. द्वि. प्र. श्लोक ५०
अहिंसादुःखदावाग्नि-प्रावृषेण्यघनावली । भवभ्रमिरुगार्त्ताना-महिंसा परमौषधी ॥६॥ यो. द्वि. प्र. श्लोक ५१
सर्वयज्ञेषु यद्दानं, सर्वतीर्थेषु यत् फलम् । सर्वदानफलं वाऽपि, तन्न तुल्यमहिंसया ॥ ७ ॥ ग. स. अ. १६ श्लोक ८
दीर्घमायुः परं रूप-मारोग्यं श्लाघनीयता । अहिंसायाः फलं सर्वं, किमन्यत् कामदैव सा ॥८॥ यो. द्वि. प्र. श्लो.५२

न हिंसयति यो जन्तून्, मनोवाक्कायहेतुभि । जीवितार्थापनयनै , प्राणिभिर्न स हिंस्यते ॥ ९ ॥
म. शा पर्व, अ १७४ श्लोक २७

थूला सुहुमा जीवा सकप्पारभओ भवे दुविहा । सावराह निरवराह सानिक्खा चेव निरविक्खा ॥ १० ॥
शरीरी म्रियता मा वा ध्रुव हिंसा प्रमादत । दयैव यतमानस्य वधेऽपि प्राणिना क्वचित् ॥११॥ सु स पृ १६६
अहिंसा सर्वजीवेषु, सर्वज्ञै परिभाषितम् । इद हि मूल धर्मस्य, शेषस्तस्यैव विस्तर ॥ १२ ॥
यदि गावा तोये तरति तरणिर्यद्युदयति, प्रतीच्या सप्तार्चिर्यदि भवति शैत्य कथमपि ।
यदि क्ष्मापीठ स्यादुपरि सकलस्यापि जगत , प्रसूते सत्त्वाना तदपि न वध क्वापि सुकृतम् ॥ १३ ॥ सिन्दूरप्रकर २६

१४ दया

धर्मो जीवदयातुल्यो, न क्वापि जगतीतले । तस्मात् सर्वप्रयत्नेन, कार्या जीवदयाऽङ्गिभि ॥१॥ हेमचन्द्रसूरि
धर्मतत्त्वमिद नेय, भुवनत्रयसमतम् । यद्दया सर्वभूतेषु, त्रसेषु स्थावरेषु च ॥२॥ पार्श्वनाथ च सर्ग १ श्लोक ५६२
अहिंसालक्षणो धर्मोऽधर्मश्च प्राणिना वध । तस्माद्धर्मार्थिभिर्लोकै, कर्त्तव्या प्राणिना दया ॥३॥
म शा पर्व अ ३३, श्लो ४२

सर्व वेदा न तत् कुर्यु, सर्व यज्ञाश्च भारत ! । सर्व तीर्थाभिषेकाश्च, यत् कुर्यात् प्राणिना दया ॥४॥ म अ अ ११४-१८
न सा दीक्षा न सा भिक्षा, न तद्दान न तत्तप । न तद् ध्यान न तन्मौन दया यत्र न विद्यते ॥५॥ सू मु पृ १४३ श्लो.१०

सर्वसत्त्वे दयां मैत्रीं, यः करोति सुमानसः। जयत्यसावरीन् सर्वान्, बाह्याभ्यन्तरसंस्थितान् ॥६॥ तत्त्वामृत श्लो. २६३
दयां विना देव-गुरुक्रमार्चास्तपांसि सर्वेन्द्रिययन्त्रणानि ।
दानानि शास्त्राध्ययनानि सर्वं, सैन्यं गतस्वामि यथा वृथैव ॥७॥ उपदेशतरङ्गिणी पृ० २३७
अहिंसापूर्वको धर्मो, यस्मात्सर्वहिते रतः। यूका-मत्कुण-दंशादींस्तस्मात्तानपि रक्षयेत् ॥८॥ जैन पृ. १९१ श्लो. ९४
दयाभूतेषु वैराग्यं विधिवद् गुरुपूजनम्। विशुद्धा शीलवृत्तिश्च पुण्यं पुण्यानुबन्ध्यदः ॥९॥ हरिभद्रीय अष्टकम्

१५ अभयदानम्

मार्यमाणस्य हेमाद्रिं, राज्यं वाऽथ प्रयच्छतु । तदनिष्टं परित्यज्य, जीवो जीवितुमिच्छति ॥१॥ यो. (प्र. सभा) पृ. ७१
हेम-धेनु-धरादीनां, दातारः सुलभा भुवि । दुर्लभः पुरुषो लोके, यः प्राणिष्वभयप्रदः ॥२॥ भा.पु.स्कन्ध २, अ.७-९३
यो दद्यात् काञ्चनं मेरुं, कृत्स्नां चैव वसुन्धराम्। एकस्य जीवितं दद्यान्न च तुल्यं युधिष्ठिर! ॥३॥
मा. पु. स्क. ८ अ. ११ श्लोक ५३

यो ददाति सहस्राणि, गवामश्वशतानि च। अभयं सर्वसत्त्वेभ्यस्तद्दानमतिरिच्यते ॥४॥ म. शा. अ. ३०४ श्लोक ५
दत्तमिष्टं तपस्तप्तं, तीर्थसेवा तथा श्रुतम्। सर्वेऽप्यभयदानस्य, कलां नार्हन्ति षोडशीम् ॥ ५॥ मा. पु. अ. ४ श्लो.१९
यो भूतेष्वभयं दद्याद्, भूतेभ्यस्तस्य नो भयम्। यादृग् वितीर्यते दानं, तादृगासाद्यते फलम् ॥६॥ यो. द्वि. प्र. ४८

१६ हिंसा

पञ्चेन्द्रियाणि त्रिविधं बल च उच्छ्वासनि'श्वासमथान्यदायु ।
प्राणा दशैत भगवद्भिरुक्तास्तेपा वियोगीकरण तु हिंसा ॥ १ ॥ उ श्रा स्त ५ व्या ६४

आत्मवत्सर्वभूतेषु, सुखदु खे प्रियाप्रिये । चिन्तयन्नात्मनोऽनिष्टां हिंसामन्यस्य नाचरेत् ॥२॥ यो द्वि प्र श्लो २०

दमो देव-गुरुपास्ति-र्दानमध्ययन तप । सर्वमप्येतदफल, हिंसां चेन्न परित्यजेत् ॥ ३ ॥ यो द्वि प्र श्लो ३१

अन्धे तमसि मज्जाम , पशुभिर्ये यजामहे । हिंसा नाम भवेद्धर्मो, न भूतो न भविष्यति ॥ ४ ॥ पू श्लो ८३

अनुमन्ता विशसिता, निहन्ता क्रयविक्रयी । सस्कर्त्ता चोपहर्त्ता च, खादकश्चेति घातका' ॥ ५ ॥ यो तृ प्र श्लो,२१

पङ्गु-कुष्ठि-कुणित्वादि, दृष्ट्वा हिंसाफल सुधी । निरागस्त्रसजन्तूनां, हिंसा सकल्पतस्त्यजेत् ॥६॥ त्रि.प १ स.३ श्लो६२९

१७ मांसत्यागः

सद्य' समुर्च्छितानन्तजन्तुसन्तानदूपितम् । नरकाध्वनि पाथेय, कोऽश्नीयात् पिशित सुधीः ॥१॥ यो तृ प्र श्लो ३३

मा स भक्षयिताऽमुत्र, यस्य मासमिहाद्म्यहम् । एतन्मासस्य मांसत्व, प्रवदन्ति मनीषिण ॥२॥ म. अ ५, श्लो ५५

मांसादनात्प्रणश्यन्ति, देहश्री· सुमति सुखम् । शौच सत्य यश' पुण्य, श्रद्धा-विश्वास-सद्गतिः ॥३॥ हिं मां श्लो १

तिल-सर्षपमात्र तु, मांस यो भक्षयेन्नर' । स एव नरक याति, यावच्चन्द्र-दिवाकरौ ॥४॥ म शां. अ १४ श्लो ३१

मासाशिनश्च दृश्यन्ते, रोगार्त्ता भृशदुर्बला' । अमांसादा नीरोगाश्च, बलवन्त सुखान्विता. ॥५॥ इ स. अ २७ श्लो.१०

१८ यज्ञम्

यूपं छित्वा पशून् हत्वा, कृत्वा रुधिरकर्दमात् । गमेनं गम्यते स्वर्गे, नरके केन गम्यते ॥१॥ म. शा. अ. १० श्लो. ११

नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया, सन्तुष्टस्तृणभक्षणेन सततं साधो ! न युक्तं तव ।
स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो, यज्ञं किं न करोषि मातृ–पितृभिः पुत्रैस्तथा बान्धवैः ॥२॥
धनपाल काव्य सर्ग० ७ श्लोक १६

सर्वसज्ञान् पशून् कृत्वा ध्यानाग्नावाहुतिं क्षिपेत् । कर्माणि समिधस्तत्र, यागोऽयं सुमहाफलः ॥३॥ तत्वा. श्लो. २५७

सत्यं यूपं तपो ह्यग्निः, कर्माणि समिधो मम । अहिंसामाहुतिं दद्याद्, एष यज्ञः सतां मतः ॥४॥ दानचन्द्रि. श्लो. ७९

१९ सत्यम्

प्रियं पथ्यं वचस्तथ्यं, सूनृतव्रतमुच्यते । तत्तथ्यमपि नो तथ्यमप्रियं चाहितं च यत् ॥१॥ नि. सर्ग. ३ श्लो. ६२३

अविसंवादनयोगः, काय–मनो–वागजिह्मता चैव । सत्यं चतुर्विधं तच्च, जिनवरमतेऽस्ति नान्यत्र ॥२॥ प्र. प्र. श्लो. १७४

न सत्यमपि भाषेत, परपीडाकरं वचः । लोकेऽपि श्रूयते यस्मात्, कौशिको नरकं गतः ॥३॥ यो. द्वि. प्र. श्लो. ६१

२० असत्यम्

कामाल्लोभाद्भयात्क्रोधात्, साक्षि–वादात्तथैव न । मिथ्या वदति यत्पापं, तदसत्यं प्रकीर्तितम् ॥१॥ गा. अ. १ श्लो. ३५

अभूतोद्भावन चाद्य, द्वितीय भूतनिह्नवम् । अर्थान्तरं तृतीय च, गर्हा नाम चतुर्थकम् ॥ २ ॥
एतच्चतुर्विधासत्य, श्वभ्रादिदु खहेतुकम् । ज्ञात्वाऽनृत व्रत ग्राह्य, येनास्ति सौख्यवैभवम ॥३॥ उ० स्त० ६, व्या० ७६
सूक्ष्मबादरभेदाभ्या, मृषावाद द्विधा स्मृतम् । तीव्रसकल्पज स्थूलं, सूक्ष्म हास्यादिसम्भवम् ॥४॥ उ०स्त ६, व्या० ७५
कन्या–गो–भूम्यलीकानि, न्यासापहरण तथा । कूटसाक्ष्य चपञ्चेति, स्थूलासत्यानि सत्यजेत् ॥५॥
त्रि० पर्व १ स० ३ श्लोक ६३१

सर्वलोकविरुद्ध यद्, यद् विश्वसितघातकम् । यद्विपक्षश्च पुण्यस्य, न वदेत् तदसूनृतम् ॥६॥ यो० द्वि० प्र० श्लो० ५५
एकत्रासत्यज पाप, पाप नि शेषमन्यत । द्वयोस्तुलाविधृतयोराद्यमेवातिरिच्यते ॥७॥ यो द्वि० प्र० श्लोक ६४
धर्महानिरविश्वासो, देहार्थव्यसन तथा । असत्यभाषिणा निन्दा, दुर्गतिश्चोपजायते ॥८॥ उ० सू० प्र० अ० २४
असत्यवक्तुर्भुवि पक्षपात, कुर्यान्न विद्वान् किल सङ्कटेऽपि ।
तेन भुव हि वसुराजवत्स, इहापवाद नरक परत्र ॥ १४ ॥ हिंगुल प्रक० मृषावादप्रक्रम श्लोक ४

२१ उत्सूत्रवचनम्

अविहिकया वरमकय, उस्सुयवयण वयति सव्वण्णू । जम्हा पायच्छित्त, अकए गुरुअ कए लहुअं ॥ १ ॥
आणाभग दट्ठु मज्झत्था ठिंति जे तुसिणिआ य । अविहिअणुमोयणाए तेसिंपि य होइ वयलोवो ॥२॥ सु० पृ० २४२

२२ अचौर्यम्

अनादानमदत्तस्यास्तेयव्रतमुदीरितम् । बाह्यप्राणा नृणामर्थो, हरता तं हता हि ते ॥१॥ त्रि० पर्व १०, स. ३ श्लो. ६२४
परार्थग्रहणे येषां, नियमः शुद्धचेतसाम् । अभ्यायान्ति श्रियस्तेषां, स्वयमेव स्वयंवराः ॥२॥ यो० द्वि० प्र. श्लो. ७४

२३ चौर्यम्

तदाद्यं स्वामिनाऽदत्तं, जीवादत्तं तथाऽपरम् । तृतीयं तु जिनादत्तं, गुर्वदत्तं, तुरीयकम् ॥१॥ उ. प्रा. भा. २ पृ. १७०
पतितं विस्मृतं नष्टं, स्थितं स्थापितमाहितम् । अदत्तं नाददीत स्वं, परकीयं क्वचित्सुधीः ॥२॥ यो० द्वि० प्र० श्लो० ६६
अयं लोकः परलोको, धर्मो धैर्यं धृतिर्मतिः। मुष्णता परकीयं स्वं, मुषितं सर्वमप्यदः ॥३॥ योगशास्त्र द्वि. श्लोक ६७
एकस्यैकं क्षणं दुःखं, मार्यमाणस्य जायते । सपुत्र-पौत्रस्य पुनर्यावज्जीवं हृते धने ॥४॥ योगशास्त्र द्वि. श्लो० ६८
दौर्भाग्यं प्रेष्यतां दास्यमङ्गच्छेदं दरिद्रिताम् । अदत्तात्तफलं ज्ञात्वा, स्थूलस्तेयं विवर्जयेत् ॥५॥ त्रि. पर्व १ सर्ग ३ श्लो० ६३२

२४ ब्रह्मचर्यम्

दिव्यौदारिककामानां, कृतानुमतिकारितैः। मनोवाक्कायतस्त्यागो, ब्रह्माष्टादशधा मतम् ॥१॥ योगशास्त्र प्र. श्लो० २३
दिव्यात्कामरतिसुखात् , त्रिविधं त्रिविधेन विरतिरिति नवकम् ।
औदारिकादपि तथा, तद् ब्रह्माष्टादशविकल्पम् ॥ २ ॥ प्रशमरति प्रकरण श्लोक १७७
संतोषः स्वेषु दारेषु, त्यागश्चापरयोषिताम् । प्रथयन्ति गृहस्थानां, चतुर्थं तदणुव्रतम् ॥५॥ उपदेश प्रा० भा० १ पृ०१८०

मात्रा स्वस्रा दुहित्रा वा, न विविक्तासनो भवेत् । बलवानिन्द्रियग्रामो, विद्वांसमपि कर्षति ॥६॥ मनु० अ० २, श्लो. २१५
कुण्डले नाभिजानामि, नाभिजानामि कङ्कणे । नूपुरे त्वभिजानामि, नित्य पादाब्जवन्दनात् ॥७॥ पद्मपुराण०
स्नानमुद्वर्तनाभ्यङ्ग, नख-केशादिसत्क्रियाम् । गन्ध-माल्य प्रदीप च, त्यजन्ति ब्रह्मचारिण. ॥८॥ श्रा० वृ० पृ० ३
य स्वदारेषु सन्तुष्ट, परदारपराङ्मुख । स गृही ब्रह्मचरित्वाद्, यतिकल्प पकल्पते ॥९॥ कुमारपाल पत्र ८४
एकरात्र्युषितस्यापि, या गतिर्ब्रह्मचारिण । न सा क्रतुसहस्रेण, वक्तु शक्या युधिष्ठिर ! ॥१०॥ योगवासिष्ठ श्लो. २९
प्राणभूत चरित्रस्य, परब्रह्मैककारणम्। समाचरन् ब्रह्मचर्यं, पूजितैरपि पूज्यते ॥११॥ योगशास्त्र द्वि. श्लोक १०४
चिरायुष सुसस्थाना, दृढसहनना नरा । तेजस्विनो महावीर्या, भवेयुर्ब्रह्मचर्यत ॥१२॥ योगशास्त्र द्वि श्लो० १०५
देवदाणवगन्धव्वा जक्खरक्खसकिन्नरा । बम्भयारिं नमसन्ति दुक्करं जे करन्ति त ॥ १३ ॥ उ० पो० गा० १६

२५ अब्रह्मचर्य-(मैथुनम्)

योनियन्त्रसमुत्पन्ना, सुसूक्ष्मा जन्तुराशय । पीड्यमाना विपद्यन्ते, यत्र तन्मैथुन त्यजेत् ॥१॥ योगशास्त्र द्वि श्लो० ७९
रम्यमापातमात्रे यत्, परिणामेऽतिदारुणम् । किंपाकफलसकाशं, तत् क सेवेत मैथुनम् ॥२॥ त्रि० पर्व स ३ श्लो. ७७
कम्प स्वेद श्रमो मूर्च्छा, भ्रमिर्ग्लानिर्बलक्षय । राजयक्ष्मादिरोगाश्च, भवेयुर्मैथुनोत्थिता ॥३॥
त्रि० पर्व १, सर्ग ३, श्लोक ७८
मेहुणसन्नारूढो, नवलक्ख हणेइ सुहुमजीवाणं । तित्थयरेण भणिय, सद्दहियव्वं पयत्तेण ॥ ४ ॥

सयसहस्साण नारीणं, पिट्टं फाडेइ निग्घिणा । सत्तठमासिए गब्भे, तप्फडंते निकत्तइ ॥ ५ ॥
तं तस्स जत्तियं पावं, तं नवगुणियमेलियं हुज्जा । एगित्थियजोगेणं, साहू बंधिज्ज मेहुणओ ॥६॥ संवोधसित्तरि
न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव, भूय एवाभिवर्धते ॥७॥ म. अ० २ श्लो० ९८
असंयमकृतोत्सेकान्, विषयान् विषसंनिभान् । निराकुर्यादखण्डेन, संयमेन महासतिः ॥८॥ यो. द्वि. प्र. श्लो० ८३
उपवासोऽवमौदर्यं, रसानां त्यजनं तथा । स्नानस्यासेवनं चैव, ताम्बूलस्य च वर्जनम् ॥ ९ ॥
असेवेच्छानिरोधस्तु, ज्ञानस्य स्मरणं तथा । एते हि निर्जरोपायाः, मदनस्य महारिपोः ॥ १० ॥ त. श्लो० ११६ ११७
दिवा पश्यति नो घूकः, काको नक्तं न पश्यति । अपूर्वः कोऽपि कामन्धो, दिवानक्तं न पश्यति ॥११॥ उ.भा. पृ.६३
विषस्य विषयाणां च पश्यतां महदन्तरम् । उपभुक्तं विषं हन्ति, विषयाः स्मरणादपि ॥ १२ ॥ उ. प्रा. स्तम्भ ७ व्या.८९
ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते । सङ्गात् संजायते कामः, कामात्क्रोधोऽभिजायते ॥ १३ ॥
क्रोधाद्भवति संमोहः, संमोहात् स्मृतिविभ्रमः। स्मृतिभ्रंशाद्बुद्धिनाशो, बुद्धिनाशात्प्रणश्यति ॥१४॥ भ.अ० २ श्लो.६२-६३

२६ परिग्रहम्

अध्यात्मविदो मूर्च्छां, परिग्रहं वर्णयन्ति निश्चयतः। तस्माद्वैराग्येप्सोराकिञ्चन्यं परो धर्मः ॥ १ ॥ प्र० प्र० श्लो. १७८
संसारमूलमारम्भास्तेषां हेतुः परिग्रहः । तस्मादुपासकः कुर्यादल्पमल्पं परिग्रहे ॥२॥ यो० द्वि० प्र० श्लो० ११०
असंतोषमविश्वासमारम्भं दुःखकारणम् । मत्वा मूर्च्छाफलं कुर्यात्, परिग्रहनियन्त्रणम् ॥३॥ त्रि. पर्व १ सर्ग ३ श्लो. ६३४

सङ्गाद् भवन्त्यसन्तोऽपि रागद्वेषादयो द्विष । मुनेरपि चलेच्चेतो यत् तेनान्दोलितात्मनः ॥४॥ यो० द्वि० प्र श्लो १०९
धर्मार्थं यस्य वित्तेहा, तस्यानीहा गरीयसी । प्रक्षालनाद्धि पङ्कस्य, दूरादस्पर्शन वरम् ॥५॥ पराशरस्मृति श्लो २३३
परिग्रहार्थमारम्भमसत्योपाद्वितन्वते । ससारवृद्धिस्तेनैव, गृह्णीत तदिद व्रतम् ॥६॥ उ० भा० अ० व्या० १०९
दोससयमूलजाल, पुव्वरिसिविवज्जिय जइ य त । अत्थ वहसि अणत्थ कीस अणत्थं तव चरसि ॥ ७ ॥
सग्रहे साग्रहा सन्ति, कीटाद्या अपि कोटिशः । दानेऽतिविदुरा प्रायो देवा अपि न केचन ॥८॥ सु० पृ० १६८
मूर्च्छाछन्नधिया सर्वं जगदेव परिग्रह । मूर्च्छया रहिताना तु, जगदेवापरिग्रह. ॥९॥ ज्ञा० प० श्लोक ८
चित्तेऽन्तर्ग्रंथगहने वहिर्निर्ग्रंथता वृथा । त्यागात् कचुकमात्रस्य, भुजङ्गो नहि निर्विषः ॥१० । ज्ञा० प० श्लो ४

२७ पञ्चमहाव्रतभावना

मनोगुप्त्येषणादेर्याभि समितिभि सदा । दृष्टान्नपानग्रहणेनाऽहिंसां भावयेत्सुधी ॥ १ ॥
हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम् । आलोच्य भाषणेनापि, भावयेत् सुनृत व्रतम् ॥ २ ॥
आलोच्यावग्रहं याञ्चाऽभीक्ष्णावग्रहयाचनम् । एतावन्मात्रमेवैतदित्यवग्रहधारणम् ॥ ३ ॥
समानधार्मिकेभ्यश्च तथावग्रहयाचनम् । अनुज्ञापितपानान्नासनमस्तेयभावना ॥ ४ ॥
स्त्रीषण्ढपशुमद्वेश्मासनकुड्यान्तरोज्झनात् । सरागस्त्रीकथात्यागात् प्राग्रतस्मृतिवर्जनात् ॥ ५ ॥
स्त्रीरम्याङ्गेक्षणस्वाङ्ग संस्कारपरिवर्जनात् । प्रणीतात्यशनत्यागाद्ब्रह्मचर्यं तु भावयेत् ॥ ६ ॥

स्पर्शे रसे च गन्धे च रूपे शब्दे च हारिणि । पञ्चसु हीन्द्रियार्थेषु, गाढं गार्द्ध्यस्य वर्जनम् ॥ ७ ॥
एतेष्वाऽमनोज्ञेषु सर्वथा द्वेषवर्जनम् । आकिञ्चन्यव्रतस्यैवं भावनाः पञ्च कीर्तिताः ॥८॥ हैमीययोगशास्त्रात्

२८ रात्रिभोजनम्

हिंस्यन्ते प्राणिनः सूक्ष्मा, यत्राशुच्यभिभक्ष्यते । तद्रात्रिभोजनं संतो, न कुर्वन्ति दयापराः ॥ १ ॥ सु, श्लो० ७६६
अस्तंगते दिवानाथे, आपो रुधिरमुच्यते । अन्नमांससमं प्रोक्तं, मार्कण्डेन महर्षिणा ॥२॥ मा० अ० ३४ श्लो० ५३
वासरे च रजन्यां च, यः खादन्नेव तिष्ठति । शृङ्गपुच्छपरिभ्रष्टः, स्पष्टं स पशुरेव हि ॥३॥ यो० तृ० प्र० श्लो० ६२
कण्डको दारुखण्डं च, वितनोति गलव्यथाम् । व्यञ्जनान्तर्निपतितस्तालु विध्यति वृश्चिकः ॥४॥ यो० प्र० ३ श्लो० ५१
मेधां पिपीलिका हन्ति, यूका कुर्याज्जलोदरम् । कुरुते मक्षिका वान्तिं, कुष्ठरोगं च कोलिकः॥५॥ यो० प्र० ३ श्लो. ५०
विलग्नस्तु गले वालः, स्वरभङ्गाय जायते । इत्यादयो दृष्टदोषाः, सर्वेषां निशि भोजने ॥ ६ ॥ यो० प्र० लो० ५२
उलूककाकमार्जारगृध्रशम्बरशूकराः । अहिवृश्चिकगोधाश्च, जायन्ते रात्रिभोजनात् ॥७॥ म० ज्ञा०अ० ७० श्लो० २०३

२९ अशुभध्यानम्

प्रमत्तश्चेन्द्रियार्थेषु, गृद्धो धर्मपराङ्मुखः । जिनोक्तमपुरस्कुर्वन्नार्तध्याने प्रवर्तते ॥ १ ॥ अ० प्र० ५ श्लो० ९२
राज्योपभोगशयनासनवाहनेषु, स्त्रीगन्धमाल्यमणिरत्नविभूषणेषु ।
इच्छाभिलाषमतिमात्रमुपैति मोहात्, ध्यानं तदार्त्तमिति तत् प्रवदन्ति तज्ज्ञाः ॥ २ ॥

सच्छेदनैर्दहनभञ्जनमारणैश्च, बन्धप्रहारदमनैर्विनिकृन्तनैश्च ।
यो याति रागमुपयाति च नानुकम्पां, ध्यान तु रौद्रमिति तत्प्रवदन्ति तज्ज्ञा ॥ ३ ॥

३० धर्मध्यानम्

सूत्रार्थसाधनमहाव्रतधारणेषु, बन्धप्रमोक्षगमनागमहेतुचिन्ता ।
पञ्चेन्द्रियव्युपरमश्च दया च भूते, ध्यान तु धर्ममिति तत्प्रवदन्ति तज्ज्ञा' ॥ १ ॥ योगतारा० पृ० १६, श्लो० ७४
धर्मध्याने भवद् भाव, क्षायोपशमिकादिक । लेश्या' क्रमविशुद्धा स्यु, पीतपद्मसिता' पुन. ॥२॥ यो प्र १०, श्लो १६
आज्ञाऽपायविपाकाना, सस्थानस्य च चिन्तनात् । इत्थ वा ध्येयभेदेन, धर्म्यं ध्यान चतुर्विधम् ॥३॥ यो प्र १० श्लो.७
आज्ञा या पुरस्कृत्य, सर्वज्ञानामबाधिताम् । तत्त्वतश्चिन्तयेदर्थांस्तदाज्ञाध्यानमुच्यते ॥ ४ ॥ यो० प्र० १० श्लो ८
रागद्वेषकषायाद्यैर्जायमानान् विचिन्तयेत् । यत्रापायास्तदपायविचयध्यानमिष्यते ॥५॥ यो० प्र० १० श्लो० १०
प्रतिक्षणसमुद्भूतो यत्र कर्मफलोदय' । चिन्त्यते चित्ररूप' स, विपाकविचयो मत ॥६॥ यो० प्र० १० श्लो १२
अनाद्यनन्तस्य लोकस्य, स्थित्युत्पत्तिव्ययात्मन । आकृतिं चिन्तयेद् यत्र, सस्थानविचय' स तु ॥७॥ यो प्र १० श्लो १४
इन्द्रियै समाकृष्य, विषयेभ्य. प्रशान्तधी । धर्मध्यानकृते तस्मान्मन कुर्वीत निश्चलम् ॥८॥ यो० पृ. ३६६ श्लो० ६

३१ वीतरागसुखम्

भोगसुखै' किमनित्यैर्भयबहुलै' काङ्क्षितै' परायत्तै । नित्यमभयमात्मस्थ प्रशमसुख तत्र यतितव्यम् ॥ १ ॥

यत्सर्वविषयकाङ्क्षोद्भवं सुखं प्राप्यते सरागेण। तदनन्तकोटीगुणितं मुधैव लभते विगतरागः ॥ २ ॥
सम्यग्दृष्टिर्ज्ञानी ध्यानतपोबलयुतोऽप्यनुपशान्तः। तं लभते न गुणं यं प्रशमगुणमुपासितो लभते ॥ ३ ॥
नैवास्ति राजराजस्य, तत्सुखं नैव देवराजस्य। यत्सुखमिहैव साधोर्लोकव्यापाररहितस्य ॥ ४ ॥ प्रशमरतिप्रकरणात्

३२ मोक्षसाधनानि

देवो दलितरागारिः, गुरुस्त्यक्तपरिग्रहः। धर्मः प्रगुणकारुण्यो, मुक्तिमूलमिदं मतम् ॥ १ ॥ सू. पृ० ४७ श्लो. ४९२
निर्ममत्वं विरागाय, वैराग्याद्योगसन्ततिः। योगात्सञ्जायते ज्ञानं, ज्ञानान्मुक्तिः प्रजायते ॥ २ ॥
शुद्धस्फटिकसङ्काशो, निष्कलश्चात्मनाऽऽत्मनि। परमात्मेति स ज्ञातः, प्रदत्ते परं पदम् ॥३॥ यो. प्र. १ श्लो० ४
सम्यग्विरक्तिर्ननु यस्य चित्ते, सम्यग्गुरुर्यस्य च तत्त्ववेत्ता। सदाऽनुभूत्या दृढनिश्चयो यस्तस्यैव सिद्धिर्न हि चापरस्य॥४॥
हृदयप्रदीप पृ० २०५ श्लो० ४
अयमात्मैव संसारः, कषायेन्द्रियनिर्जितः। तमेव तद्विजेतारं, मोक्षमाहुर्मनीषिणः ॥ ५ ॥ यो.पृ० २७९ श्लो० ५
न ज्ञानं केवलं मुक्त्यै, न क्रिया केवला भवेत्। संयोगादुभयोः सम्यग् मुक्तिमाहुर्मनीषिणः ॥ ६ ॥ ध. पृ० २३
नैतद्भुतं भवति वा, भविष्यति न जातुचित्। यदर्हन्तोऽन्यसाहाय्यादर्जयन्ति हि केवलम् ॥ ७ ॥
केवलं केवलज्ञानं, प्राप्नुवन्ति स्ववीर्यतः। स्ववीर्येणैव गच्छन्ति, जिनेन्द्राः परमं पदम् ॥८॥ म. स. ३ श्लो.३० ३१
नाणं च दंसणं चेव चरित्तं च तवो तहा। एस मग्गुत्ति पन्नत्तो, जिणेहिं वरदंसिहिं ॥ ९ ॥ उ. अ. श्लो. २

णादसणिस्स नाण नाणेन विणा न हुति चरणगुणा । अगुणिस्स नत्थि मुक्खो, नत्थि अम्मुक्खस्स निव्वाण ॥ १० ॥
नाणेण जाणई भावे, सम्मत्तेण य सद्दहे । चरित्तेण निगिण्हाई, तवेण परिसुज्झई ॥११॥ उ अ २८, श्लो ३० ३५

३३ श्रावक धर्म

जिनो देव' कृपा धर्मो गुरवो यत्र साधव' । श्रावकत्वाय कस्तस्मै न श्लाघेताऽमूढधी ॥ १ ॥ यो श्लो १४०
सावद्ययोगविरतिश्चारित्र मुक्तिकारणम् । सर्वात्मना यतीन्द्राणा देशत स्यादगारिणाम् ॥ २ ॥ (योगशास्त्र)
देशचारित्रविरत्तो विरतानामुपासक । भवस्वरुप जानान श्रावको जीवितावधि ॥ ३ ॥
श्रद्धालुतां श्राति जिनेन्द्रशासने, धनानि क्षेत्रेपु वपत्यानारतम् ।
करोति पुण्यानि सुसाधुसेवनादतोऽ—पि त श्रावकमाहुरुत्तमा. ॥ ४ ॥ सूक्तामुक्तावली पृ० ४५
देवपूजा गुरुपास्ति स्वाध्याय' सयमस्तप । दान चेति गृहस्थाना पट् कर्माणि दिने दिने ॥९॥ सूक्तमुक्तावली
स्थूलवधानृतचौर्यपरस्त्रीरत्यरतिवर्जित' सततम् दिग्व्रतमूर्ध्व–(मिह ?) देशावकाशिकमनर्थविरतिं च ॥ १० ॥
सामायिक च कृत्वा पौषधमुपभोगपारिमाण च । न्यायागत च कल्प्य विधिवत्पात्रेपु विनियोज्यम् ॥ ११ ॥
चैत्यायतनप्रस्थापनानि च कृत्वा शक्तितः प्रयत' । पूजाश्च गन्धमाल्याधिवासधूपप्रदीपाद्या' ॥ १२ ॥
प्रशमरतिनित्यतृपितो जिनगुरुसाधुजनवन्दनाभिरत । सलेखना च काले योगेनाराध्य सुविशुद्धाम् ॥ १३ ॥
सद्भिर्गुणदोषज्ञैर्दोषानुत्सृज्य गुणलवा ग्राह्या. । सर्वात्मना च सततं प्रशमसुखायैव यतितव्यम् ॥१४॥ प्रशमरतिप्रकरणात्

३४ दिशापरिमाणम्

दशस्वपि कृता दिक्षु, यत्र सीमा न लङ्घ्यते । ख्यातं दिग्विरतिरिति, प्रथमं तद् गुणव्रतम् ॥१॥ यो. तृ. प्र. श्लो. १
जगदाक्रममाणस्य, प्रसरल्लोभवारिधेः । स्खलनं विदधे तेन, येन दिग्विरतिः कृता ॥ २ ॥ यो. तृ. प्र. श्लो. ३
चराचराणां जीवानां, विमर्दननिवर्तनात् । तप्तायोगोलकल्पस्य, सद्व्रतं गृहिणोऽप्यदः ॥ ३ ॥ यो. तृ. प्र. श्लो. २

३५ भोगोपभोगविरमणम्

भोगोपभोगयोः संख्या, शक्त्या यत्र विधीयते । भोगोपभोगमानं तद्, द्वैतीयिकं गुणव्रतम् ॥१॥ यो.शा.पृ.१५७श्लो.४
सकृदेव भुज्यते यः, स भोगोऽन्नस्रगादिकः । पुनः पुनः पुनर्भोग्य, उपभोगोऽङ्गनादिकः ॥ २ ॥

३६ अभक्ष्यत्यागः

अनन्तकायसन्धाने बहु बीजं चाभक्ष्यकम् । आमगोरसमिश्रं च, द्विदलं सूक्ष्मसत्त्वजम् ॥ उ. प्रा. भा. २ पृ. ५१
तुच्छफलं च वन्ताकं, रसेन चलितं तथा । अज्ञातफलमेतानि, ह्यभक्ष्याणि द्वाविंशतिः ॥ २ ॥ उ. प्रा. भा.२ पृ.५२
रसैश्चलितं निःस्वादं द्व्यक्षाणां योनिस्थानकम् । पर्युषितं कुत्सितान्नं भक्षणाद्दुःखमाप्नुयात् ॥ ३ ॥ उ. प्रा. भा.२ पृ.५३
मद्यं मांसं नवनीतं मधूदुम्बरपञ्चकम् । अनन्तकायमज्ञातफलं रात्रौ च भोजनम् ॥ ४ ॥ यो. तृ. प्र. श्लो. ६
आमगोरससम्पृक्तं द्विदलं पुष्पितौदनम् । दध्यहर्द्वितयातीतं, कुथितान्नं च वर्जयेत् ॥ ५ ॥ यो. तृ. प्र. श्लो. ७

३७ पञ्चदशकर्मादानानि

अंगार-वन शकट भाटक-स्फोटक जीविका। दन्त-लाक्षा-रस-केश विषवाणिज्यकानि च ॥ १ ॥
यन्त्रपीडा निर्लाञ्छनमसतीपोषण तथा। दवदान सर शोष इति पञ्चदश त्यजेत् ॥ २ ॥ उ स्तम्भ ९ व्या १२३

३८ अनर्थदंडव्रतम्

शरीराद्यर्थदण्डस्य, प्रतिपक्षतया स्थित । योऽनर्थदण्डस्तत्त्यागस्तृतीय तु गुणव्रतम् ॥ १ ॥ उ प्रा स्त ९ व्या० १३१
आर्त्त रौद्रमपध्यान, पापाकर्मोपदेशिता। हिंसोपकारिदान च, प्रमादाचरणं तथा ॥ २ ॥ यो तृ प्र श्लो ७३
सयुक्ताधिकरणत्व मुपभोगातिरिक्तता। मौखर्यमथ कौकुच्यं, कदर्पोऽनर्थदण्डगा' ॥३॥ उ प्रा स्त. १० व्या० १३६

३९ सामायिकव्रतम्

त्यक्तार्त्तरौद्रध्यानस्य, त्यक्तसावद्यकर्मण । मुहूर्तं समता या ता, विदु सामायिकव्रतम् ॥ १ ॥ यो तृ. प्र. श्लो ८२
समता सर्वभूतेषु, सयमः शुभभावना। आर्त्तरौद्रपरित्याग-स्तद्धि सामायिक व्रतम् ॥ २ ॥ अष्टाह्निका
सामायिक स्यात् त्रैविध्य, सम्यक्त्व च श्रुत तथा। चारित्र तृतीय तच्च, गृहिकमनगारिकम् ॥ ३ ॥ उ.स्त १० व्या.१४०
कायवाङ्मनसा दुष्ट-प्रणिधानमनादर। स्मृत्यनुपस्थापन च, स्मृता॰ सामायिकव्रते ॥ ४ ॥ यो प्र २०१ श्लो ११६
कर्म जीव च सश्लिष्ट, परिज्ञातात्मनिश्चय । विभिन्नीकुरुते साधु', सामायिकशलाकया ॥ ५ ॥ यो प्र ६ श्लो ५२

तप्येद्वर्षशतैर्यश्च एकापादस्थितो नरः । एकेन ध्यानयोगेन, कलां नार्हति षोडशीम् ॥ ६ ॥ उ. भा. २ पृ. १०१
रागादिध्वान्तविध्वंसे, कृते सामायिकांशुना । स्वस्मिन् स्वरूपं पश्यन्ति, योगिनः परमात्मनः ॥७॥ यो.पृ.२९५ श्लो.५३
सामायिकव्रतस्थस्य गृहिणोऽपि स्थिरात्मनः । चन्द्रावतंसकस्येव, क्षीयते कर्म संचितम् ॥ ८ ॥ यो. तृ. प्र. श्लो.८३
दिवसे दिवसे लक्खं, देइ सुवण्णस्स खंडियं एगो । एगो पुण सामाइयं, करेइ न पहुप्पए तस्स ॥९॥ संबोधसित्तरी

४० देशावगाशिकं

दिग्व्रते परिमाणं यत्, तस्य संक्षेपणं पुनः । दिने रात्रौ च देशाव-काशिकव्रतमुच्यते ॥ १ ॥ यो. तृ. प्र. श्लो. ८४
प्रेष्यप्रयोगानयनं, पुद्गलक्षेपणं तथा । शब्दरूपानुपातो च, व्रते देशावकाशिके ॥२ ॥ उ. भा. स्त. १० व्या. १४६

४१ पौषधव्रतम्

चतुष्पर्व्यां चतुर्थादि-कुव्यापारनिषेधनम् । ब्रह्मचर्यं क्रियास्नाना-दित्यागः पौषधव्रतम् ॥ १ ॥ यो. तृ. पृ. श्लो. ८५
पोषं धर्मस्य धत्ते यत्, तद्भवेत् पौषधव्रतम् । तच्चतुर्धा समाख्यात-माहारपौषधादिकम् ॥ २॥ उ. भा. २ पृ. ११६
अहोरात्रदिवारात्रि-भेदात् त्रेधा च पौषधः । तत्र चत्वारि कार्याणि, विचार्याणि विचक्षणैः ॥ ३ ॥ उ. प. १० श्लो.२८
चतुर्थादि तपः पाप-व्यापारपरिवर्जनम् । ब्रह्मचर्यं परित्यागः, शरीरसंस्कृतेरपि ॥ ४ ॥ उ. प. १० श्लो. २९

४२ उपवासः

त्यक्तभोगोपभोगस्य, सर्वारम्भविमोचिनः । चतुर्विधाशनत्याग, उपवासो मतो जिनैः ॥ १ ॥ सु. श्लो. ८०९

कषायविषयाहार-स्त्यागो यत्र निधीयते । उपवास स विनेय', शेष लङ्घनक विदु' ॥ २ ॥

उपावृत्तस्य पापेभ्यो, यस्तु वासो गुणै सह । उपवास स विज्ञेय , सर्वभोगविवर्जित ॥ ३ ॥ मा, श्लो १७

कर्मेन्धन यदज्ञानात् सचित जन्मकानने । उपवासशिखी सर्वं, तद्भस्मीकुरुते क्षणात् ॥ ४ ॥ सु श्लो ८११

४३ पर्वतिथि

शुभायु कर्मबन्धाय, पर्वपालनमङ्गिनाम् । तेन सद्ध्यानदानादि विषये स्थापयेन्मन ॥ १ ॥ उ प १० श्लो २१

अष्टमी कर्मघाताय, सिद्धिलाभा चतुर्दशी । पञ्चमी केवलज्ञाना, तस्मात्त्रितयमाचरेत् ॥ २ ॥ मौ श्लो ८९

द्वितीया पञ्चम्यष्टम्येकादशी चतुर्दशी पञ्च तिथय । एता' श्रुततिथयो गौतमगणधरेण भणिता' ॥ ३ ॥

द्वितीया द्विविधे धर्मे, पञ्चमी ज्ञाने चाष्टमी कर्मणि। एकादश्यङ्गाना चतुर्दशी चतुर्दशपूर्वाणाम्॥ ४॥ सु पृ १० श्लो १-२

४४ पर्वाराधनम्

सामायिकावश्यकपौषधानि, देवार्चनस्नानविलेपनानि । ब्रह्मक्रियादानदयामुखानि, भव्याश्चतुर्मासकमण्डनानि ॥ १॥

सूक्तमुक्तावलि पृ० १० श्लो. ५

व्याख्यानश्रवण जिनालयगतिर्नित्य गुरोर्वन्दनम् , प्रत्याख्यानविधानमागमगिरा चित्ते चिरं स्थापनम् ।

कल्पाकर्णनमात्मशक्तितपसा सवत्सराराधन, श्राद्धे श्लाघ्यतपोधनादिति फलं लभ्य चतुर्मासके ॥ २॥ सू. पृ.१० श्लो. ६

४५ अतिथिसंविभागव्रतम्

अतिथिभ्योऽशनावास-वासःपात्रादिवस्तुनः यत्प्रदानं तदतिथि-संविभागव्रतं भवेत् ॥ १ ॥ उ. स्त. ११ व्या. १६३
पश्य सङ्गमको नाम सम्पदं वत्सपालकः । चमत्कारकरीं प्राप, मुनिदानप्रभावतः ॥ २ ॥ यो. तृ. पृ. श्लो. ८८

४६ अनित्यभावना

अनित्यत्वाशरणते भवमेकत्वमन्यताम्, अशौचमाश्रवं चात्मन्, संवरं परिभावय ॥ १ ॥
कर्मणो निर्जरां धर्म-सूक्ततां लोकपद्धतिम् । बोधिदुर्लभतामेता, भावयन् मुच्यसे भवात् ॥ २ ॥
आयुर्वायुतरत्तरङ्गतरलं लग्नापदः सम्पदः, सर्वेऽपीन्द्रियगोचराश्च चटुलाः सन्ध्याभ्ररागादिवत् ।
मित्रस्त्रीस्वजनादिसङ्गमसुखं स्वप्नेन्द्रजालोपमम्, तत्किं वस्तु भवे भवेदिह मुदामालम्बनं यत्सताम् ॥ ३ ॥
अम्भोधीनपि शोषयन्ति चतुरो येऽनन्तवीर्यान्विता, ये मेरुन् दलयन्ति वज्रकठिनैर्मुष्टिप्रहारैरपि ।
दण्डीकृत्य सुराचलं वसुमतीं छत्राकृतिं कुर्वते, तावत्तेऽपि जनाः कृतान्तवदने कालेन सर्वे गताः ॥ ४ ॥
यत्प्रातस्तन्न मध्याह्ने, यन्मध्याह्ने न तन्निशि । निरीक्ष्यते भवेऽस्मिन् ही! पदार्थानामनित्यता ॥५॥ यो.प्र.४ श्लो.५७
याति कालो गलत्यायुर्विभूतिरतिचञ्चला । प्रियेषु क्षणिकं प्रेम, कथं धर्मेऽवधीरणा ॥ ६ ॥
चेतोहरा युवतयः स्वजनोऽनुकूलः, सद्बांधवाः प्रणयगर्भगिरश्च भृत्याः ।

गर्जन्ति दन्तिनिवहास्तरलास्तुरङ्गा', समीलने नयनयोर्न हि किञ्चिदस्ति ॥ ७ ॥ वै श्लो ४३
अनित्यं यौवन रूप, जीवित द्रव्यसचय' । आरोग्य प्रियसवासो, गृध्येत्तत्र न पण्डित ॥८॥ म शा अ.२०३ श्लो ४
इन्द्रचापसमा भोगा , सपदो जलदोपमा' । यौवन जलरेखेव, सर्वमेतदशाश्वतम् ॥ ९ ॥ तत्त्वामृत श्लो० १५२
जीवित विद्युता तुल्य, सयोगा स्वप्नसन्निभा । सन्ध्यारागसम स्नेह , शरीर तृणविन्दुवत् ॥१०॥ त श्लो. १५१
सर्वे क्षयान्ता निचया , पतनान्ता' समुच्छ्रया' । सयोगा विप्रयोगान्ता, मरणान्तं हि जीवितम् ॥ ११ ॥
यौवन जीवित चित्त, छाया लक्ष्मीश्च स्वामिता। चञ्चलानि षडेतानि, ज्ञात्वा धर्मरतो भवेत् ॥ १२ ॥
इत्यनित्यं जगद्वृत्त, स्थिरचित्त प्रतिक्षणम् । तृष्णा कृष्णाहिमन्त्राय निर्ममत्वाय चिन्तयेत् ॥१३॥ यो. प्र ४ श्लो.६६

४७ अशरणभावना

ये षट्खण्डमहीमहीनतरसा निर्जित्य बभ्राजिरे, ये च स्वर्गभुजो भुजोर्जितमदा मेदुर्मुदा मेदुरा' ।
तेऽपि क्रूरकृतान्तवक्त्ररदनैर्निर्दल्यमाना हठा–दत्राणा· शरणाय हा दश दिश' प्रेक्षन्त दीनाननाः ॥ १ ॥
तावदेव मदविभ्रममाली, तावदेव गुणगौरवशाली । यावदक्षमकृतान्तकटाक्षै र्नेक्षितो विशरणो नरकीटः ॥ २ ॥
प्रतापैर्व्यापन्न गलितमथ तेजोभिरुदितै–र्गत धैर्योद्योगै· श्लथितमथ पुष्टेन वपुषा ।
प्रवृत्त तद्द्रव्यग्रहणविषये बान्धवजनैर्जने कीनाशेन प्रसभमुपनीते निजवशम् ॥ ३ ॥ शा द्वि प्र.
अहनि अहनि भूतानि गच्छन्ति यममन्दिरम् । शेषा· स्थिरत्वमिच्छन्ति किमाश्चर्यमतः परम् ॥ ४ ॥

अस्मिन् महामोहमये कटाहे सूर्याग्निना रात्रिदिवेन्धनेन । मासर्तुदर्वी परिघट्टनेन भूतानि कालः पचतीति वार्ता ॥ ५ ॥

४८ संसार भावना

इतो लोभः क्षोभं जनयति दुरन्तो दव इवो–ल्लसल्लाभाम्भोधिः कथमपि न शक्यः शमयितुम् ॥
इतस्तृष्णाऽक्षाणां तुदति मृगतृष्णेव विफला, कथं स्वस्थैः स्थेयं विविधभयभीमे भववने ॥ १ ॥
गलत्येका चिन्ता भवति पुनरन्या तदधिका, मनोवाक्काये हा विकृतिरतिरोपान्तरजसः ॥
विपद्गर्तावर्ते झटिति पतयालोः प्रतिपदं, न जन्तोः संसारे भवति कथमप्यर्तिविरतिः ॥ २ ॥
सहित्वा सन्तापानशुचिजननीकुक्षिकुहरे, ततो जन्म प्राप्य प्रचुरतकष्टक्रमहतः ॥
सुखाभासैर्यावत् स्पृशति कथमप्यर्तिविरतिं, जरा तावत्कायं कवलयति मृत्योः सहचरी ॥ ३ ॥
विभ्रान्तचित्तो बत बम्भ्रमीति, पक्षीव रुद्धस्तनुपञ्जरेऽङ्गी। नुन्नो नियत्याऽतनुकर्मतन्तु–सन्दानितः सन्निहितान्तकौतुः॥४॥
अनन्तान्पुद्गलावर्तानन्तानन्तरूपभृत् । अनन्तशो भ्रमत्येव जीवोऽनादिभवार्णवे ॥ ५ ॥ शा० वृ० प्रकाशात्
यः पिता स भवेत्पुत्रो यः पुत्रः स भवेत् पिता । या कान्ता सा भवेन्माता, या माता साऽपि सा भवेत् ॥ ६ ॥
वृद्धस्य मृतभार्यस्य, पुत्राधीनधनस्य च । स्नुषावाक्येन दग्धस्य जीवितान्मरणं वरम् ॥ ७ ॥
भ्राताऽसि तनुजन्माऽसि, वरस्यावरजोऽसि च । भ्रातृव्योऽसि पितृव्योऽसि, पुत्रपुत्रोऽसि चार्भक ! ॥ ८ ॥
यश्च बालक ! ते पिता स मे भवति सोदरः। पिता पितामहो, भर्ता तनयः श्वसुरोऽपि च ॥ ९ ॥

या च बालक! ते माता सा मे माता पितामही। भ्रातृजाया वधू श्वश्रू', सपत्नी च भवत्यहो ॥१०॥ सु० पृ १०८-१०९
रम्भागर्भसम सुखी शिखिशिखा वर्णाभिरुच्चैरय। सूचिभि प्रतिरोममेदितवपुस्तारुण्यपुण्य पुमान् ॥
दु ख यल्लभते तदष्टगुणित स्त्रीकुक्षिमध्यस्थितौ, सपद्येत ततोऽप्यनन्तगुणित जन्मक्षये प्राणिनाम् ॥ ११ ॥
पापी रूपविवर्जितो गतरूपो यो नारकादागत, तिर्यग्योनिसमागतश्च कपटी नित्य बुभुक्षातुर ।
मानी ज्ञानविवेकबुद्धिकलितो यो मर्त्यलोकागतो, यस्तु स्वर्गसमागत' स सुभग. प्राज्ञ' कवि' श्रीयुतः ॥ १३ ॥
सुभाषितसूक्तसग्रह पृष्ट १११

४९ एकत्व भावना

एक एव भगवानयमात्मा, ज्ञानदर्शनतरङ्गसरङ्ग । सर्वमन्यदुपकल्पितमेतद्, व्याकुलीकरणमेव ममत्वम् ॥ १ ॥
अबुधै परभावलालसा–लसदज्ञानदशावशात्मभि' । परवस्तुषु हा स्वीकीयता, विषयावेशवशाद् विकल्प्यते ॥ २ ॥
कृतिनां दयितेति चिन्तनम्, परदारेषु यथा विपत्तये । विविधार्तिभयावह तथा, परभावेषु ममत्वभावनम् ॥ ३ ॥
अधुना परभावसवृतिं हर चेत. परितोऽवगुण्ठिताम् । क्षणमात्मविचारचन्दन–द्रुमवातोर्मिरसा स्पृशन्तु माम् ॥४॥
एकता समतोपेता–मेनामात्मन् विभावय । लभस्व परमानन्द–सम्पद नमिराजवत् ॥ ५ ॥ श्रीशान्त सु० च० प्र०
यद्वद् द्रुमे महति पक्षिगणा विचित्रा, कृत्वाश्रय हि निशि यान्ति पुन प्रभाते ॥
तद्वज्जगत्यसकृदेव कुटुम्बजीवा., सर्वे समेत्य पुनरेव दिशो भजन्ते ॥ ६ ॥ (उत्तराध्ययन टीका)

एकोऽहं न च मे कश्चित् स्वः परो वाऽपि विद्यते। यदेको जायते जन्तुर्म्रियते चैक एव हि॥७॥ सु० सं० पृ० ११२

५० अन्यत्वभावना

आत्मनः सर्वमप्येतदन्यत्तदिह तत्कृते, कृत्वा कर्म भवाब्धौ स्वं, पातयत्यबुधो जनः ॥ १ ॥
यत्रान्यत्वं शरीरस्य, वैसदृश्याच्छरीरिणः । धनबन्धुसहायानां तत्रान्यत्वं न दुर्वचम् ॥ २ ॥
यो देह धनबन्धुभ्यो, भिन्नमात्मानमीक्षते । क्व शोकशंकुना तस्य, हन्तातङ्कः प्रतन्यते ? ॥ ३ ॥
आत्मदेहादिभावानां, यद्यन्यत्वं स्फुटं ननु । ततो देहप्रहारादौ, कथमात्मा प्रपीड्यते ॥ ४ ॥ त्रि. श्री.
एक उत्पद्यते जन्तुरेक एव विपद्यते । कर्माण्यनुभवत्येकः प्रचितानि भवान्तरे ॥ ५ ॥ यो. प्र. ४ श्लो. ६८
भिन्नः शरीरतो जीवो जीवाद्भिन्नश्च विग्रहः । विदन्निति वपुर्नाशेऽप्यन्तः खिद्येत कः कृती ॥ ६ ॥ उ. अ. २
ज्ञानदर्शनचारित्रकेतनां चेतनां विना । सर्वमन्यद्विनिश्चित्य यतस्व स्वहिताप्तये ॥ ७ ॥ शा. प्र. ५

५१ अशुचित्वभावना

सच्छिद्रो मदिराघटः परिगलत्तल्लेशसङ्गाशुचिः, शुच्यामृद्य मृदा बहिः स बहुशो धौतोऽपि गङ्गोदकैः ।
नाधत्ते शुचितां यथा तनुभृतां कायो निकायो महा–बीभत्सास्थिपुरीषमूत्ररजसां नायं तथा शुद्ध्यति ॥ १ ॥
स्नायं स्नायं पुनरपि पुनः स्नान्ति शुद्धाभिरद्भि–र्वारं वारं बत समलतनुं चन्दनैरर्चयन्ते ।
मूढात्मानो वयमपमलाः प्रीतिमित्याश्रयन्ते, नो शुध्यन्ते कथमवकरः शक्यते शोद्धुमेवम् ॥ २ ॥

कर्पुरादिभिरर्चितोऽपि लशुनो नो गाहते सौरभ, नाजन्मोपकृतोऽपि हन्त पिशुन' सौजन्यमालम्बते ।
देहोऽप्येष तथा जहाति न नृणा, स्वाभाविकीं विस्रतां, नाभ्यक्तोऽपि विभूषितोऽपि बहुधा पुष्टोऽपि विश्वस्यते ॥३॥
यदीयसंसर्गमवाप्य सद्यो भवेच्छुचीनामशुचित्वमुच्चै । अमेध्ययोनेर्वपुषोऽस्य शौचसङ्कल्पमोहोऽयमहो महीयान् ॥ ४ ॥
इत्यवेत्य शुचिवादमतथ्यम् पथ्यमेव जगदेकपवित्रम्, शोधन सकलदोषमलानाम्, धर्ममेव हृदये निदधीथा ॥५॥ शा म
वसारुधिरमांसास्थियकृद्विण्मूत्रपूरिते। वपुष्यशुचिनिलये मूर्छां कुर्वीत क सुधी. ॥६॥ म च सर्ग १ श्लो २५२

५२ आश्रवभावना

यथा सर्वतो निर्झरैरापतद्भि , प्रपूर्येत सद्य पयोभिस्तटाक' ।
तथैवाश्रवै कर्मभि सम्भृतोऽङ्गी, भवेद्व्याकुलश्चञ्चल पङ्किलश्च ॥ १ ॥
यावत्किञ्चिदिवानुभूय तरसा कर्मेह निर्जीर्यते, तावच्चाश्रवशत्रवोऽनुसमय सिञ्चन्ति भूयोऽपि तत् ।
हा कष्ट कथमाश्रवप्रतिभटा शक्या निरोद्धु मया, ससारादतिभीषणान्मम हहा मुक्ति कथ भाविनी ॥ २ ॥
मिथ्यात्वाऽविरतिकषाययोगसञ्ज्ञाश्चत्वार सुकृतिभिराश्रवा प्रदिष्टा ।
कर्माणि प्रतिसमय स्फुटैरमीभिर्बध्नन्तो भ्रमवशतो भ्रमन्ति जीवा ॥ ३ ॥
इन्द्रियाव्रतकषाययोगजा', पञ्च पञ्च चतुरन्विता त्रय' । पञ्चविंशतिरसत्क्रिया इति, नेत्रवेदपरिसङ्ख्ययाऽप्यमी ॥४॥
इत्याश्रवाणामधिगम्य तत्त्वम्, निश्चित्य सत्त्व श्रुतिसन्निधानात् ।

एषां निरोधे विगलद्विरोधे, सर्वात्मना द्राग् यतितव्यमात्मन् ॥ ५ ॥ शान्तसुधारस सप्तमप्रकाशात्

५३ संवरभावना

येन येन य इहाश्रवरोधः, सम्भवेन्नियतमौपयिकेन। आद्रियस्व विनयोद्यतचेतास्तत्तदान्तरदृशा परिभाव्य ॥१॥
संयमेन विषयाविरतत्वे, दर्शनेन वितथाभिनिवेशम्। ध्यानमार्त्तमथ रौद्रमजस्रम्, चेतसः स्थिरतया च निरुन्ध्याः ॥२॥
क्रोधं क्षान्त्या मार्दवेनाभिमानम्, हन्या मायामार्जवेनोज्ज्वलेन।
लोभं वारांराशि रौद्रं निरुध्याः, सन्तोषेण प्रांशुना सेतुनेन ॥ ३ ॥
गुप्तिभिस्तिसृभिरेवमजय्यान्, त्रीन् विजित्य तरसाधमयोगान्। साधुसंवरपथे प्रयतेथा, लप्स्यसे हितमनीहितमिद्धम् ॥४॥
एवं रुद्धेष्वमलहृदयैराश्रवेष्वाप्तवाक्य—श्रद्धाचञ्चत्सितपटपटुः सुप्रतिष्ठानशाली।
शुद्धैर्योगैर्जवनपवनैः प्रेरितो जीवपोतः, स्रोतस्तीर्त्वा भवजलनिधेर्याति निर्वाणपुर्याम् ॥५॥ शान्त अ. प्रस्तावात्

५४ निर्जराभावना

यन्निर्जरा द्वादशधा निरुक्ता, तद्द्वादशानां तपसां विभेदात्।
हेतुप्रभेदादिह कार्यभेदः, स्वातन्त्र्यतस्त्वेकविधैव सा स्यात् ॥ १ ॥
काष्ठोपलादिरूपाणां, निदानानां विभेदतः। वह्निर्यथैकरूपोऽपि, पृथग्रूपो विवक्ष्यते ॥ २ ॥

निर्जरापि द्वादशधा, तपोभेदैस्तथोदिता । कर्मनिर्जरणात्मा तु, सैकरूपैव वस्तुत' ॥ ३ ॥
निकाचितानामपि कर्मणा यद्, गरीयसा भूधरदुर्धराणाम्। विभेदने वज्रमिवातितीव्रम्, नमोऽस्तु तस्मै तपसेऽद्भुताय ॥४॥
किमुच्यते सत्तपस प्रभाव, कठोरकर्मार्जितकिल्बिषोऽपि। दृढ प्रहारीव निहत्य पापम्, यतोऽपवर्गं लभतेऽचिरेण ॥५॥
यथा सुवर्णस्य शुचिस्वरूपम्, दीप्त कृशानु' प्रकटीकरोति। तथात्मन कर्मरजो निहत्य, ज्योतिस्तपस्तद्विशदीकरोति ॥६॥
बाह्येनाभ्यन्तरेण प्रथितनकुभिदा जीयते येन शत्रु-श्रेणी बाह्यान्तरङ्गा भरतनृपतिवद्भावलब्धद्रढिम्ना ।
यस्मात्प्रादुर्भवेयु प्रकटितविभवा लब्धय सिद्धयश्च, वन्दे स्वर्गापवर्गार्पणपटुसतत तत्तपो विश्ववन्द्यम् ॥७॥ शा. न प्र

५५ लोकस्वरूपभावना

सप्ताधोऽधो विस्तृता या पृथिव्यश्छत्राकारा सन्ति रत्नप्रभाद्या,
ताभि पूर्णो योऽस्त्यधोलोक एतौ पादौ यस्य व्यायतौ सप्तरज्जू ॥ १ ॥
तिर्यग्लोको विस्तृतो रज्जुमेकाम्, पूर्णो द्वीपैरर्णवान्तैरसङ्ख्यै ।
यस्य ज्योतिश्चक्रकाञ्चीकलापम्, मध्ये कार्श्यं श्रीविचित्रं कटित्रम् ॥ २ ॥
लोकोऽथोर्ध्वे ब्रह्मलोके द्युलोके, यस्य व्याप्तौ कूर्परौ पञ्चरज्जू ।
लोकस्यान्तो विस्तृतो रज्जुमेका, सिद्धज्योतिश्चित्रको यस्य मौलि ॥ ३ ॥
यो वैशाखस्थानकस्थायिपाद, श्रोणीदेशे न्यस्तहस्तद्वयश्च ।

कालेऽनादौ शश्वदूर्ध्वंदमत्वाद्, विश्राणोऽपि श्रान्तमुद्रामखिन्नः ॥ ४ ॥
सोऽयं ज्ञेयः पूरुषो लोकनामा, षड्द्रव्यात्माऽकृत्रिमोऽनाद्यनन्तः। धर्माधर्माकाशकालात्मसंज्ञैर्द्रव्यैः, पूर्णः सर्वतः पुद्गलैश्च॥५॥
रङ्गस्थानं पुद्गलानां नटानाम्, नानारूपैर्नृत्यतामात्मनां च ।
कालोद्योगस्वस्वभावादिभावैः, कर्मातोद्यैर्नर्तितानां नियत्या ॥ ६ ॥
एवं लोको भाव्यमानो विविक्त्या, विज्ञानां स्यान् मानसस्थैर्यहेतुः ।
स्थैर्ये प्राप्ते मानसे चात्मनीना, सुप्राप्यैवाध्यात्मसौख्यप्रसूतिः ॥ ७ ॥ शान्तसुधारसएकादशप्रकाशात्

५६ बोधिदुर्लभभावना

यस्माद्विस्मापयितसुमनःस्वर्गसम्पद्विलासाः, प्राप्तोल्लासाः पुनरपि जनिः सत्कुले भूरिभागे ।
ब्रह्माद्वैतप्रगुणपदवीप्रापकं निःसपत्नम्, तद्दुष्प्रापं भृशगुरुधियः सेव्यतां बोधिरत्नम् ॥ १ ॥
अनादौ निगोदान्धकूपे स्थिताना—मजस्रं जनुर्मृत्युदुःखार्दितानाम् ।
परीणामशुद्धिः कुतस्तादृशी स्याद्, यया हन्त तस्माद्विनिर्यान्ति जीवः ॥ २ ॥
ततो निर्गतानामपि स्थावरत्वं, त्रसत्वं पुनर्दुर्लभं देहभाजाम् ।
त्रसत्वेऽपि पञ्चाक्षपर्याप्तसंज्ञि—स्थिरायुष्यवद्दुर्लभं मानुषत्वम् ॥ ३ ॥
तदेतन्मनुष्यत्वमाप्यापि मूढो महामोहमिथ्यात्वमायोपगूढः ।

भमन् दूरमग्नो भवागाधगर्ते, पुन क्व प्रपद्येत तद्बोधिरत्नम् ॥ ४ ॥ शान्तसुधारस द्वादशप्रकाशात्

५७ धर्मभावना

दान च शील च तपश्च भावो, धर्मश्चतुर्धा जिननाथवेन । निरूपितो यो जगता हिताय, स मानसे मे रमतामजस्रम् ॥१॥
सत्यक्षमामार्दवशौचसङ्गत्यागाऽऽर्जवब्रह्मविमुक्तियुक्त. । यः सयम किं च तपोऽवगूढश्चारित्रधर्मो दशधाऽयमुक्त' ॥२॥
यस्य प्रभावादिह पुष्पदन्तौ, विश्वोपकाराय सदोदयेते । ग्रीष्मोष्मभीष्मामुदितस्तडित्वान्, काले समाश्वासयति क्षितिं च ॥३॥
उल्लोलकल्लोलकलाविलासैर्न प्लावयत्यम्बुनिधि' क्षितिं यत् । न घ्नन्ति यद्व्याघ्रमरुद्दवाद्या, धर्मस्य सर्वोऽप्यनुभाव एष' ॥४॥
प्राज्य राज्य सुभगदयिता, नन्दनानन्दनानाम्, रम्यं रूप सरसकविता–चातुरी सुस्वरत्वम् ।
नीरोगत्व गुणपरिचय सज्जनत्व सुबुद्धिम्, किं नु ब्रूम फलपरिणतिं धर्मकल्पद्रुमस्य ॥ ५ ॥ शा दश०

५८ मैत्र्यादिभावना

परहितचिन्ता मैत्री परदु'खविनाशिनी तथा करुणा । परसुखतुष्टिर्मुदिता, परदोपोपेक्षणमुपेक्षा ॥१॥ ध अ.४, २२६ पृ.
मैत्री परस्मिन् हितधीः समग्रे, भवेत् प्रमोदो गुणपक्षपातः । कृपा भवार्त्ते प्रतिकर्तुमीहो–पेक्षैव माध्यस्थ्यमवार्यदोषे ॥२॥
अध्यात्मकल्पद्रुम, अधिकार १ श्लो. १२
मा कार्षीत् कोऽपि पापानि, मा च भूत् कोऽपि दु खित. । मुच्यता जगदप्येपा, मतिर्मैत्री निगद्यते ॥३॥ यो. प्र ४ श्लो. ११८

सर्वेऽपि सन्तु सुखिनः, सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु, मा कश्चित्पापमाचरेत् ॥ ४ ॥ ध. अ.३ सू.२१२
अपास्ताशेषदोषाणां, वस्तुतत्त्वावलोकिनाम् । गुणेषु पक्षपातो यः, स प्रमोदः प्रकीर्तितः ॥५॥ यो. प्र.४ श्लो. ११९
दीनेष्वर्त्तेषु भीतेषु, याचमानेषु जीवितम् । प्रतीकारपरा बुद्धिः, कारुण्यमभिधीयते ॥६॥ यो. प्र.४ श्लो. १२०
क्रूरकर्मसु निःशङ्कं, देवतागुरुनिन्दिषु । आत्मशंसिषु योपेक्षा, तन्माध्यस्थ्यमुदीरितम् ॥ ७ ॥ यो. प्र.४ श्लो १२१
मैत्री सकलसत्त्वेषु, प्रमोदो गुणशालिषु । माध्यस्थ्यमविनेयेषु, करुणा सर्वदेहिषु ॥ ८ ॥
धर्मकल्पद्रुमस्यैता, मूलं मैत्र्यादिभावनाः । यैर्न ज्ञाता न चाभ्यस्ताः, स तेषामतिदुर्लभः ॥ ९ ॥ यो.प्र.२ श्लो. ६,७

५९ दानम्

उपार्जितानामर्थानां, त्याग एव हि रक्षणम् । तडागोदरसंस्थानां, परिवाहोऽम्भसामिव ॥ १ ॥ जै. पंच पृ० ४
यद्दासि विशिष्टेभ्यो, यच्चाश्नासि दिने दिने । तत्ते वित्तमहं मन्ये, शेषं कस्यापि रक्षसि ॥ २ ॥ चे. अ.४ श्लो.१६
देयं भोज ! धनं धनं सुविधिना नो संचितव्यं कदा, श्रीकर्णस्य बलस्य विक्रमनृपस्याद्यापि कीर्तिर्यतः ।
येनेदं बहुपाणिपादयुगलं घृष्यन्ति भो मक्षिका, अस्माकं मधु दानभोगरहितं नष्टं चिरात् संचितम् ॥३॥ उ.पृ.१० श्लो. ३२
भिक्षुका नैव याचन्ते, बोधयन्ति दिने दिने । दीयतां दीयतां किञ्चिददातुः फलमीदृशम् ॥ ४ ॥
संग्रहैकपरः प्रायः, समुद्रोऽपि रसातलम् । दाता तु जलदः पश्य, भुवनोपरि गर्जति ॥ ५ ॥ प्र. पृ. १४० श्लोक १
अशनादीनि दानानि धर्मोपकरणानि च, साधुभ्यः साधुयोग्यानि देयानि विधिना बुधैः ॥ ६ ॥ उ. टीका

उपाश्रयो येन दत्तो मुनीना गुणशालिनाम्। तेन ज्ञानाद्युपष्टम्भदायिना प्रददे न किम्॥ ७ ॥ उ. सू अ १ पृ १२
सुरर्द्धि सुकुलोत्पत्तिर्भोगलब्धिश्च जायते। साधूना स्थानदानेन, क्रमान्मोक्षश्च लभ्यते॥ ८ ॥ उ. अ ३ पृ १२
इय मोक्षफले दाने, पात्रापात्रविचारणा। दयादान तु सर्वज्ञै, कुत्रापि न निषिध्यते॥ ९ ॥ पा स ६ श्लो ५४
चतु सागरपर्यन्ता, यो दद्यात्पृथिवीमिमाम्। एकश्च जीवित दद्यात्तयोरभयदोऽधिक ॥ १० ॥ क श्लो ६९
दीयते म्रियमाणस्य कोटिर्जीवितमेन च। धनकोटिं न गृह्णीयात्, सर्वो जीवितुमिच्छति॥ ११ ॥ यो श्लो २७
अन्नदानात्पर नास्ति, विद्यादान ततोऽधिकम्। अन्नेन क्षणिका तृप्तिर्यावज्जीव तु विद्यया॥ १२ ॥
ज्ञानवान् ज्ञानदानेन, निर्भयोऽभयदानत। अन्नदानात्सुखी नित्यो निर्व्याधिर्भेषिजाद् भवेत्॥ १३॥ वि स ११ श्लो ८६३
व्याजे स्याद्द्विगुण वित्त, व्यवसाये चतुर्गुणम्। क्षेत्रे दशगुण प्रोक्त, पात्रेऽनन्तगुण भवेत्॥ १४ ॥ उ पृ १२ श्लो ४०
फल यच्छति दातृभ्यो, दान नात्रास्ति सशय। फलं तुल्य ददात्येतदाश्चर्य त्वनुमोदकम्॥ १५ ॥ उ, भा. २ पृ १५०
सपत्तौ नियम शक्तौ, सहन यौवने व्रतम्। दारिद्र्ये दानमत्यल्पमपि लाभाय जायते॥ १६ ॥
पश्चाद्दत्त परैर्दत्त लभ्यते वा न लभ्यते। स्वहस्तेन च यद्दत्त, लभ्यते तन्न सशय ॥ १७ ॥
मा मस्था क्षीयते वित्त, दीयमान कदाचन। कूपारामगवादीनां, ददतामेव सम्पद ॥ १८ ॥
अदत्तदानाच्च भवेद्दरिद्री दरिद्रभावाद्वितनोति पापम्। पाप हि कृत्वा नरक प्रयाति, पुनर्दरिद्री पुनरेव पापी ॥१९॥
दान भोगोनाशस्तिस्रो गतयो भवन्ति वित्तस्य। यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥ २० ॥
कियदिदमधिकं मे यद् द्विजायार्थयित्रे, कवचमरमणीय कुण्डले चार्पयामि॥ २१ ॥

अकरुणमवकृत्य द्राक् कृपाणेन निर्यद्बहलरुधिरधारं मौलिमावेदयामि ॥ २२ ॥

जीवितव्यं ददानेन, दत्तं त्रिभुवनं ततः । हरता तत्तु सर्वस्वं, हृतं शून्यीकृतं जगत् ॥२३॥ पा. सर्ग २ श्लो. ४८

यत्तु प्रत्युपकाराय, फलमुद्दिश्य वा पुनः। दीयते हि परिक्लिष्टं, तद् दानं राजसं स्मृतम् ॥२४॥ पा. सर्ग ६ श्लो.५४५

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं, तद्दानं तामसं स्मृतम् ॥२५ ॥ पार्श्वनाथ च. सर्ग ६, ५४६

धणसत्थवाहजम्मे, जं धयदाणं कयं सुसाहूणं । तकारणमुसभजिणो, तेलुक्क—पियामहो जाओ ॥ २६ ॥

कयणाइ दिन्नदाणो, जम्मंतरगहियपुन्नकिरियाणो । तित्थयरचक्करिद्धिं, संपत्तो संतिनाहोवि ॥ २७ ॥

दाऊण खीरदाणं, तवेण सुसिअंग साहुणो धणिअं । जणजणियचमकारो, संजाओ सालिभद्दो वि ॥ २८॥ देवे. दान.

पात्रे धर्मनिबन्धनं तदपरे प्रोद्यद्दयाख्यापकम्, मित्रे प्रीतिविवर्धकं रिपुजने वैरापहारक्षमम् ॥

भृत्ये प्रीतिविवर्धकं नरपतौ सन्मानपूजाप्रदम्, भट्टादौ च यशस्करं वितरणं न क्वाऽप्यहो निष्फलम् ॥२९॥ सि. प्र.

दारिद्र्यनाशनं दानं, शीलं दुर्गतिनाशनम् । अज्ञाननाशिनी प्रज्ञा, भावना भवनाशिनी ॥ ३० ॥ सुभाषित सं०

भीमः- मूर्खतपस्वी राजेन्द्र ! विद्वांश्च वृषलीपतिः । उभौ तौ तिष्ठतो द्वारे, कस्य दानं प्रदीयते ॥ ३१ ॥

युधिष्ठिरः- सुखासेव्यं तपो भीम ! विद्या कष्टदुराचरी । विद्वांसं पूजयिष्यामि, तपोभिः किं प्रयोजनम् ॥ ३२ ॥

कृष्णः- न विद्यया केवलया, तपसा चापि पात्रता । यत्र वृत्तमुभे चेमे, तद्धि पात्रं प्रचक्षते ॥ ३३ ॥

अभयं सुपत्तदाणं अणुकंपा उचिअं च कित्तिदाणं च । दोहिवि मुक्खो भणियो तिण्णेवि भोगादियं दिंति ॥३४॥

उत्तमोऽप्रार्थितो दत्ते, मध्यमः प्रार्थितः पुनः । याचकैर्याच्यमानोऽपि, दत्ते न त्वधमाधमः ॥ ३५ ॥

कर्णस्त्वच शिबिर्मांसं, जीव जीमूतवाहनः । ददौ दधीचिरस्थीनि, नास्त्यदेयं महात्मानाम् ॥ ३६ ॥ सू पृ. ६७-६८
नेव दार पिहावेह, भुजमाणो सुसावओ । अणुकपा जिणिंदेहिं, सड्ढाण न निवारिया ॥ ३७ ॥ सु. पृ १८ श्लो.१५
पाकारेणोच्यते पापं, त्रकारस्त्राणवाचक । अक्षरद्वयसयोगे, पात्रमाहुर्मनीषिण (मनस्विन') ॥३८॥ सु सू पृ २१ श्लो २
मिथ्यादृष्टिसहस्रेषु, वरमेको ह्यणुव्रती । अणुव्रतिसहस्रेषु, वरमेको महाव्रती ॥ ३९ ॥
महाव्रतिसहस्रेषु, वरमेको जिनाधिप' । जिनाधिपसम पात्र, न भूत न भविष्यति ॥४० ॥ सु सू पृ २२ श्लो १७ १८
अनादरो विलम्बश्च वैमुख्य विप्रिय वच' । पश्चात्तापश्च दातु स्यात्, दानदूषणपञ्चकम् ॥ ४१ ॥
आनन्दाश्रूणि रोमाञ्च बहुमान प्रिय वच । तथानुमोदना पात्रे, दानभूषणपञ्चकम् ॥ ४२ ॥

६० शीलम्

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक् सयमो, ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपस क्षमा प्रभवितुर्धर्मस्य निर्व्याजता, सर्वेषामपि सर्वकारणमिद शील पर भूषणम् ॥१॥ भ नी श्लो ८०
अमरा' किङ्करायन्ते, सिद्धय सहसङ्गता । समीपस्थायिनी सपच्छीलालङ्कारशालिनाम् ॥२॥ उ प्रा भा. १ पृ १८८
वर प्रवेशो ज्वलिते हुताशने, न चापि भग्नं चिरसञ्चितव्रतम् ॥
वरं हि मृत्यु सुविशुद्धचेतसो, न चापि शीलस्खलितस्य जीवितम् ॥ ३ ॥ सूत्रकृताङ्ग पत्र ६३,
यां चिन्तयामि सततं मयि सा विरक्ता, साऽप्यन्यमिच्छति जन स जनोऽन्यसक्त ।

अस्मत्कृते च परितुष्यति काचिदन्या, धिक् तां च तं च मदनं च इमां च मां च ॥४॥ भ. नीति श. श्लो. २
व्रतानामपि शेषाणां, चतुर्थव्रतभङ्गके । लीलया भेदतामाहुस्तस्माद्दुःशीलतां त्यजेत् ॥५॥ उ. प्रा. भा. १ पृ. १८७
चालणिजलेण चंपाइ, जीइ उग्घाडिअं दुवारतियं । कस्स न हरेइ चित्तं, तीए चरिअं सुभद्दाण ॥ ६ ॥
थुणिउं तस्स न सक्का, सड्ढस्स सुदंसणस्स गुणनिवहं । जो विसमसंकडेसुवि, पडिओवि अखंडसीलधणो ॥ ७ ॥
वेआल–भूअ–रक्खस, केसरि–चित्तय–गइंद–सप्पाणं । लीलाइ दलइ दप्पं, पालंतो निम्मलं सीलं ॥ ८ ॥ श्री शीलकुल०
श्रीमन्नेमिजिनो दिनोऽघतमसां जम्बुप्रभुः केवली, सम्यग्दर्शनवान् सुदर्शनगृही स स्थूलभद्रो मुनिः ।
सच्चंकारी सरस्वती च सुभगा सीता सुभद्रादयः, शीलोदाहरणे जयन्ति जनितानन्दा जगत्यद्भुताः ॥ ९ ॥
काएण बंभचेरं, धरंति भव्वाउ जे असुद्धमणा । कप्पंमि बंभलोए, ताणं नियमेण उववाओ ॥ १० ॥
सीतया दुरपवादभीतया, पावके स्वतनुराहुतीकृता । पावकस्तु जलतां जगाम, यत्तत्र शीलमहिमा विजृम्भितम् ॥११॥सू.पृ.७१
वेश्या रागवती सदा तदनुगा षड्भिरसैर्भोजनम्, शुभ्रं धाम मनोहरं वपुरहो ! नव्यो वयः संगमः ।
कालोऽयं जलदाविलस्तदपि यः, कामं जिगायाऽऽदरात्, तं वन्दे युवतिप्रबोधकुशलं श्रीस्थूलभद्रं मुनिम् ॥ १२ ॥
श्रीनन्दिषेणरथनेमिमुनिश्वरार्द्रबुद्ध्या त्वया मदन ! रे ! मुनिरेष दृष्टः ।
ज्ञातं न नेमिमुनिजम्बूसुदर्शनानां, तुर्यो भविष्यति निहत्य रणाङ्गणे माम् ॥ १३ ॥ सु. सूक्त. पृ. २४, २५ श्लो.१, ४
मनसि वचसि काये जागरे स्वप्नमध्ये, यदि मम पतिभावो राघवादन्यपुंसि ।
तदिह दह शरीरं पावक पावकेदं, सुकृतविकृतभाजां येन लोकैकसाक्ष्यः ॥ १४ ॥

हे लोकपाला लोकाश्च सर्वे श्रृणुत यद्यहम् । अन्यमम्यलपं रामात्, तदग्निर्मा दहत्वयम् ॥ १५ ॥
अन्यथा तु सुखस्पर्शो वारीनास्त्वित्युदीर्य सा । झम्पा स्मृतनमस्कारा ददौ तस्मिन् हुताशने ॥ १६ ॥
आस्खलद्वीचिनिचयमणिसोपानबन्धुरा । बद्धोभयतटा रत्नोपलैर्वापी बभूव सा ॥ १७ ॥
यस्य स्नेहो भय तस्य, स्नेहो दु.खस्य भाजनम् । स्नेहमूलानि दु खानि, तत्त्यक्त्वा च वसेत्सुखम् ॥१८॥

६१ तप

तप. सर्वाक्षसारग—वशीकरणवागुरा । कषायतापमृद्विका, कर्माजीर्णहरीतकी ।। १ ॥ आचा वर्ग १, श्लो ५४
यत्पूर्वार्जितकर्मशैलकुलिश, यत्कामदावानल—ज्वालाजालजल यदुग्रकरणग्रामाहिमन्त्राक्षरम् ॥
यत्प्रत्यूहतम समूहदिवस यल्लब्धिलक्ष्मीलता—मूल तद्द्विविध यथाविधि तपः कुर्वीत वीतस्पृह. ॥२॥ सि श्लो ८१
तप' सकललक्ष्मीणा, नियन्त्रणमशृङ्खलम् , दुरितप्रेतभूताना, रक्षामन्त्रो निरक्षर' ॥ ३ ॥ सू० पृ. २०७ श्लो २
यावत्स्वास्थ्य शरीरस्य, यावच्चेन्द्रियसपद' । तावद्युक्तं तप.कर्तुं, वार्धक्ये केवल श्रम. ॥ ४ ॥ त श्लो. १७
अद्यश्वीनविनाशस्य, शरीरस्य शरीरिणाम् । सकामनिर्जरासार, तप एव महत्फलम् ॥ ५ ॥ यो पृ० ११० श्लो० ३८
मल स्वर्णगत वह्निर्हंस क्षीरगत जलम् । यथा पृथक्करोत्येव, जन्तोः कर्ममल तपः ॥ ६ ॥ उ अ० २ पृ० ५८ श्लो,४५
अनशनमौनोदर्यं, वृत्तेः सक्षेपण तथा । रसत्यागस्तनुक्लेशो, लीनतेति बहिस्तप ॥७॥ त्रि. प १ स १ श्लो.१९८
प्रायश्चित्तं वैयावृत्त्य, स्वाध्यायो विनयोऽपि च । व्युत्सर्गोऽथ शुभध्यान, षोढेत्याभ्यन्तरं तप. ॥८॥ त्रि. प १ स १ श्लो १९९

निर्जराकरणे बाह्याच्छ्रेष्ठमाभ्यन्तरं तपः । तत्राप्येकातपत्रत्वं, ध्यानस्य मुनयो जगुः ॥ ९ ॥

यस्माद्विघ्नपरम्परा विघटते दास्यं सुराः कुर्वते, कामः शाम्यति दाम्यतीन्द्रियगणः कल्याणमुत्सर्पति ।
उन्मीलन्ति महर्द्धयः कलयति ध्वंसं च यत्कर्मणां, स्वाधीनं त्रिदिवं शिवं च भवति श्लाघ्यं तपस्तन्न किम् ? ॥ १० ॥
सिंदूरप्रकरण, श्लोक ८२

जिनेन्द्रचन्द्रोदितमस्तदूषणं,-कषायमुक्तं विदधाति यस्तपः ।
न दुर्लभं तस्य समस्तविष्टपे, प्रजायते वस्तु मनोज्ञमीप्सितम् ॥ ११ ॥ सुभाषितरत्नसन्दोह श्लोक ८९९

विरज्य विषयेभ्यो यैस्तेपे मोक्षफलं तपः । तैरेव फलमङ्गस्य, जगृहे तत्त्ववेदिभिः ॥ १२ ॥

श्रीमद्वीरजिनो दृढप्रहरणः स्वीयप्रतिज्ञादृढः, श्लाघ्यो बाहुबली बलोऽप्यविचलः सन्नन्दिषेणव्रती ।
आनन्दः सदुपासको व्रतरुचिः सा सुन्दरीत्यादयः, कर्मोन्मूलनकोविदेन तपसा देवासुरैर्वन्दिताः ॥ १३ ॥

पूजालाभप्रसिद्ध्यर्थं, तपस्तप्येत योऽल्पधीः । शोष एव शरीरस्य, न तस्य तपसः फलम् ॥ १४ ॥ सूक्त. पृ. ८०

ज्ञानमेव बुधाः प्राहुः कर्मणां तापनात्तपः । तदाभ्यन्तरमेवेष्टं बाह्यं तदुपबृंहकम् ॥ १५ ॥

यत्र ब्रह्म जिनार्चा च कषायाणां तथा हतिः । सानुबन्धा जिनाज्ञा च तत्तपः शुद्धमिष्यते ॥ १६ ॥

तदेव हि तपः कार्यं दुर्ध्यानं यत्र नो भवेत् । येन योगा न हीयन्ते क्षीयन्ते नेन्द्रियाणि वा ॥ १७ ॥

चक्रे तीर्थकरैः स्वयं निजगदे तैरेव तीर्थेश्वरैः, श्रीहेतुर्भवहारि दारितरुजं सन्निर्जराकारणम् ।
सद्यो विघ्नहरं हृषीकदमनं मांगल्यमिष्टार्थकृत्, देवाकर्षणमारदर्पदलनं तस्याद्विधेयं तपः ॥ १८ ॥ सु. श्लो. ११६

६२ भाव

निरुरुनसारिणीं प्रशमशर्मसजीवनीं, भवार्णवमहातरीं मदनदावमेघावलीम् ।
चलाक्षमृगवागुरा गुरुकषायशैलाशनिं, विमुक्तिपथवेसरीं भजत भावना किं परैः ॥ १ ॥ सि श्लो ८७
दानशीलतपः सपद्भावेन भवते फलम् । स्वादु प्रादुर्भवेद्भोज्ये, किं नाम लवणं विना ॥२॥ सू पृ २०९ श्लो ८
भावस्यैकाङ्गवीरस्य, सान्निध्याद्वहव शिवम् । ययुर्नैकोऽपि दानाद्यैर्भावहीनैर्धनैरपि ॥ ३ ॥ सू पृ २०९ श्लो ९
क्रियाशून्यस्य यो भावो भावशून्या च या क्रिया । अनयोरन्तरं दृष्टं, भानुखद्योतयोरिव ॥ ४ ॥ ज्ञानसार
द्वे तीर्थे तथा मन्त्रे, दैवज्ञे भेषजे गुरौ । यादृशी भावना यस्य, सिद्धिर्भवति तादृशी ॥ ५ ॥
भव्यैश्च भावना कार्या, भरतेश्वरवद्यथा । फलन्ति दानशीलाद्या वृष्ट्या यथेह पादपा ॥ ६ ॥ हिं भा श्लो १
सर्वतो देशतश्चैव, विरतिः सफला तथा । यदा भावयुता लोके, स्वर्गमोक्षसुखप्रदा ॥ ७ ॥ हिं भा श्लो ४
सर्वं नीप्सति पुण्यमीप्सति दया, धित्सत्यघं भित्सति । क्रोधं दित्सति दानशीलतपसा साफल्यमादित्सति ।
कल्याणोपचयं चिकीर्षति भवाम्भोधेस्तटं लिप्सति । मुक्तिस्त्रिं परिरिप्सते यदि जनस्तद् भावयेद् भावनाम् ॥८॥ सिं श्लो ८६
षट्खण्डराज्ये भरतो निमग्नस्ताम्बूलवस्त्रसविभूषणश्च । आदर्शहर्म्ये जटिते सुरत्नैर्ज्ञानं स लेभे वरभावतोऽत्र ॥९॥ हिं श्लो ५
दानं तपस्तथा शीलं, नृणां भावेन वर्जितम् । अर्थहानिस्तथा पीडा, कायक्लेशश्च केवलं ॥ १० ॥ सु श्लो १२०
सत्त्वेषु मैत्री गुणिषु प्रमोदं, क्लिष्टेषु जीवेषु कृपापरत्वम् । माध्यस्थ्यभावं विपरीतवृत्तौ, सदा ममात्मा विदधातु देव ! ॥११॥
सुभाषितसंग्रह श्लो ५३५

जा दव्वे होइ मइ अहवा, तरुणीपु रूववंतीसु । सा जइ जिणवरधम्मे, करयलमज्झे ठिआ सिद्धी ॥ १२॥
भावो धर्मस्य हृन्मित्रं, भावः कर्मेन्धनानलः । सत्कृत्यान्ने घृतं भावो, भावो वेत्री शिवश्रियः ॥ १३ ॥
वित्तेन दीयते दानं, शीलं सत्त्वेन पाल्यते । तपोऽपि तप्यते कष्टात्स्वाधीनोत्तमभावना ॥ १४ ॥
चक्री श्रीभरतो बलानुगमृगः श्रेयानिलापुत्रको, जीर्णश्रेष्ठिमृगावतीगृहपतिर्यो भावदेवाभिधः ।
सा श्लाघ्या मरुदेवता नवमुनिः श्रीचण्डरुद्रस्य चे–त्याद्याः कस्य न चित्रकारिचरिता भावेन संभूपिताः॥१५॥ सू पृ.८१
यन्मयोपार्जितं पुण्यं, जिनशासनसेवया । जिनशासनसेवैव, तेन मेऽस्तु भवे भवे ॥ १६ ॥
सुखस्य दुःखस्य न कोऽपि दाता, परो ददातीति कुबुद्धिरेपा ।
पुराकृतं कर्म तदेव भुज्यते, शरीर ! हे ! निस्तर यत्त्वया कृतम् ॥ १७ ॥
शत्रुर्दहति संयोगे, वियोगे मित्रमप्यहो ! । उभयोर्दुःखदायित्वात् को भेदः शत्रुमित्रयोः ॥१८॥ सु. पृ. २८ श्लो.२-३-४

६३ कपायदमनीभावना

चतुर्वर्गेऽग्रणीर्मोक्षो, योगस्तस्य च कारणम् । ज्ञानश्रद्धानचारित्र–रूपं रत्नत्रयं च सः ॥ १ ॥
तत्त्वानुगा मतिर्ज्ञानं, सम्यक्श्रद्धा तु दर्शनम् । सर्वसावद्ययोगानां, त्यागश्चारित्रमिष्यते ॥ २ ॥
आत्मैव दर्शनज्ञान–चारित्राण्यथवा यतेः । यत्तदात्मक एवैप, शरीरमधितिष्ठति ॥ ३ ॥
आत्मनमात्मना वेत्ति, मोहत्यागाद्य आत्मनि । तदेव तस्य चारित्रं, तद् ज्ञानं तच्च दर्शनम् ॥ ४ ॥

आत्माऽज्ञानभव दु खमात्मज्ञानेन हन्यते । तपसाऽप्यात्मविज्ञानहीनैश्छेत्तु न शक्यते ॥ ५ ॥
अयमात्मैव चिद्रूप, शरीरी कर्मयोगत । ध्यानाग्निदग्धकर्मा तु, सिद्धात्मा स्यान्निरञ्जन' ॥६ ॥
अयमात्मैव ससार, कपायेन्द्रियनिर्जित । तमेव तद्विजेतार, मोक्षमाहुर्मनीषिण ॥ ७ ॥
स्यु कपाया क्रोधमानमायालोभा शरीरिणाम् । चतुर्विधास्ते प्रत्येक, भेदै' सज्वलनादिभि ॥ ८ ॥
पक्ष सज्वलन' प्रत्या-ख्यानो मासचतुष्टयम् । अप्रत्याख्यानको वर्षं, जन्मानन्तानुबन्धक' ॥ ९ ॥
वीतरागयतिश्राद्धसम्यग्दृष्टित्वघातका । ते देवत्वमनुष्यत्वतिर्यक्त्वनरकप्रदा' ॥ १० ॥

६४ क्रोध

हरत्येकदिनेनैव, तेज पाण्मासिक ज्वर । क्रोध पुन क्षणेनापि, पूर्वकोट्यार्जित तप ॥ १ ॥
क्रोध परितापकर', सर्वस्योद्वेगकारक क्रोध' । वैरानुषगजनक क्रोध' क्रोध सुगतिहन्ता ॥२ ॥ प्रशमरति श्लो २३
क्षमी यत्कुरुते कार्यं, न तत्क्रोधवशगद । कार्यस्य साधनी प्रज्ञा, सा च क्रोधेन नश्यति ॥३॥ सु पृ २११ श्लो. १३
मासोपवासनिरतोऽस्तु तनोतु सत्य, ध्यान करोतु विदधातु बहिर्निवासम् ॥
ब्रह्मव्रत धरतु भैक्ष्यरतोऽस्तु नित्य, रोप करोति यदि सर्वमनर्थक तत् ॥ ४ ॥ सुभाषितरत्नसदोह श्लो. २९
जीवोपतापक क्रोध, क्रोधो वैरस्य कारणम् । दुर्गतेर्वर्तनी क्रोध, क्रोध शमसुखार्गला ॥५॥ यो. प्र० ४ श्लो ९
अवश्य नाशिनो बाह्य-स्याङ्गस्यास्य कृते तत' । कोप' कार्यो नान्तरङ्ग-ध्रुवधर्मधनापह' ॥६॥ उ स्त. टी पृ ६,

क्रोधो नाशयते बुद्धि-मात्मानं च कुलं धनम् । धर्मनाशो भवेत्कोपात्, तस्मात्तं परिवर्जयेत् ॥७॥ मा. अ. ७ श्लो. ५७
दुर्गतिप्रापणे पक्षो विपक्षः शुभकर्मणाम् । सपक्षः आपदः क्रोधः, स केनाद्रियते ततः? ॥८॥ हिंगुलाश.पृ० ६ श्लो. २
यो मित्रं मधुनो विकारकरणे संत्राससंपादने, सर्पस्य प्रतिबिम्बमङ्गदहने सप्तार्चिषः सोदरः ॥
चैतन्यस्य निषूदने विषतरोः सब्रह्मचारी चिरं, स क्रोधः कुशलाभिलापकुशलैः प्रोन्मूलमुन्मूल्यताम् ॥९॥ सिं. श्लो. ४५
रागं दृशोर्वपुषि कम्पमनेकरूपं, चित्ते विवेकरहितानि च चिंतितानि ।
पुंसाममार्गगमनं समदुःखजातं, कोपः करोति सहसा मदिरामदश्च ॥ १० ॥ सुभाषितरत्नसंदोह श्लो. २७
अपकारिणि कोपश्चेत्, कोपे कोपः कथं न ते ? । धर्मार्थकाममोक्षाणां, प्रसह्य परिपन्थिनि ॥११॥ उ० पृ० २२७
ज्वलदङ्गारवद्भाति, कायः प्रायोऽतिकोपिनः । मुखे छायान्तरे दाहः, सर्वेषां भीमदर्शनं ॥ १२ ॥ हि. पृ. ६ श्लो. ३
भ्रूभंगभंगुरमुखो विकरालरूपो, रक्तेक्षणो दशनपीडितदन्तवासाः ।
त्रासं गतोऽतिमनुजो जननिंद्यवेषः, क्रोधेन कंपिततनुर्भुवि राक्षसो वा ॥ १३ ॥ सुभाषितरत्नसंदोह. श्लो. ४०
क्रोधवह्निस्तदह्नाय, शमनाय शुभात्मभिः । श्रयणीया क्षमैकैव, संयमारामसारणिः ॥ १४ ॥ योगशास्त्र प्र. ४, श्लो. ११

६५ मानः माया च

विनयश्रुतशीलानां, त्रिवर्गस्य च घातकः । विवेकलोचनं लुम्पन्, मानोऽन्धङ्करणो नृणाम् ॥१॥ यो. प्र. ४ श्लो.१२
उत्सर्पयन् दोषशाखा, गुणमूलान्यधो नयन् । उन्मूलनीयो मानद्रु-स्तन्मार्दवसरित्प्लवैः ॥ २ ॥ यो. प्र. ४, श्लो. १४

अहकारो हि लोकाना, नाशाय न तु वृद्धये । यथा विनाशकाले स्यात्, प्रदीपस्य शिखोज्ज्वला ॥३॥ त श्लो २९८
श्रुतशीलविनयसदूषणस्य, धर्मार्थकामविघ्नस्य। मानस्य कोऽवकाश, मुहूर्तमपि पण्डितो दद्यात् ? ॥४॥ प्र. श्लो. २७
मा कुरु धनजनयौवनगर्वं, हरति निमेषात् काल' सर्वम्। मायामयमिदमखिल हित्वा, ब्रह्मपद प्रविशाशु विदित्वा ॥५॥
मोहमुद्गर [शंकराचार्य] श्लो ५

सम्पूर्णकुम्भो न करोति शब्दमर्धो घटो घोषमुपैति नूनम् ।
विद्वान् कुलीनो न करोति गर्वं, गुणैर्विहीना बहु जल्पयन्ति ॥ ६ ॥ हितोपदेश, पृ० १३ श्लो. १९
जातिलाभकुलैश्वर्यबलरूपतप श्रुतै । कुर्वन् मद पुनस्तानि, हीनानि लभते जन ॥ ७ ॥ यो. प्र० ४ श्लो० १३
ज्ञान मददर्पहर माद्यति यस्तेन तस्य को वैद्य' । अमृत यस्य विषायति, तस्य चिकित्सा कथ क्रियते ॥ ८ ॥
विद्ययैव मदो येषा, कार्पण्य विभवे सति । तेषा दैवाभिभूताना, सलिलादग्निरुत्थित. ॥ ९ ॥
अहकारे सति प्रौढे, वदत्येव गुणावली । अह कारे पतिष्यामि, समायाता त्वदतिकम् ॥ १० ॥
सा विद्या या मद हन्ति, सा श्रीर्याऽर्थिषु दीयते । धर्मानुसारिणी या च, सा बुद्धिरभिधीयते ॥ ११ ॥
उत्क्षिप्य टिट्टिभ पादमास्ते भङ्गभयाद्भुव' । स्वचित्तकल्पितो गर्व , माणिनां क्वोपयुज्यते ॥ १२ ॥ सूक्त. पृ. ३८
असूनृतस्य जननी परशु शीलशाखिन जन्मभूमिरविद्यानां माया दुर्गतिकरणम् ॥१२॥ यो० प्र० ४, श्लो० १९
दम्भो मुक्तिलतावह्नि—र्दम्भो राहु क्रियाविधौ । दौर्भाग्यकारण दम्भो, दम्भोऽध्यात्मसुखार्गला ॥ १३ ॥
दम्भेन व्रतमास्थाय, यो वाञ्छति परं पदम् । लोहनाव समारुह्य, सोऽब्धे' पारं यियासति ॥ १४ ॥

सुत्यजं रसलाम्पट्यं, सुत्यजं देहभूषणम् । सुत्यजाः कामभोगाद्या, दुस्त्यजं दम्भसेवनम् ॥ १५ ॥
स्व–दोषनिह्नवो लोक–पूजा स्याद् गौरवं तथा । इयतैव कदर्थ्यन्ते, दम्भेन वत वालिशाः ॥ १६ ॥
अब्जे हिमं तनौ रोगो, वने वह्निर्दिने निशा । ग्रन्थे मौर्ख्यं कलिः सौख्ये, धर्मे दम्भउपप्लवः ॥ १७ ॥
धर्मीति ख्यातिलोभेन, प्रच्छादितनिजाश्रवः । तृणाय मन्यते विश्वं, हीनोऽपि धृतकैतवः ॥ १८ ॥
आत्मोत्कर्षाच्चतो दम्भी, परेषां चापवादतः । बध्नाति कठिनं कर्म, बाधकं योगजन्मनः ॥ १९ ॥
आत्मार्थिना ततस्त्याज्यो, दम्भोऽनर्थनिबन्धनम् । शुद्धिः स्यादृजुभूतस्ये–त्यागमे प्रतिपादितम् ॥ २० ॥
अध्यात्मरतचित्तानां, दम्भः स्वल्पोऽपि नोचितः । छिद्रलेशोऽपि पोतस्य, सिन्धुं लङ्घयतामिव ॥ २१ ॥
दम्भलेशोऽपि मल्ल्यादेः, स्त्रीत्वानर्थनिबन्धनम् । अतस्तत्परिहाराय, यतितव्यं महात्मना ॥२२॥ अ. प्र. दम्भत्या०

६६ लोभः

सर्वेषामपि पापानां, निमित्तं लोभ एव हि । चातुर्गतिकसंसारे, भूयोभ्रमनिबन्धनम् ॥ १ ॥ ध. पृ. ४६
लोभात् क्रोधः प्रभवति, लोभात् कामः प्रजायते । लोभात् मोहश्च नाशश्च, लोभः पापस्य कारणम् ॥२ ॥ हि. मि श्लो.२७
आकरः सर्वदोषाणां, गुणग्रसनराक्षसः । कन्दो व्यसनवल्लीनां, लोभः सर्वार्थबाधकः ॥३॥ यो. प्र. ४ श्लो. १८
अहो लोभस्य साम्राज्य–मेकच्छत्रं महीतले । तरवोऽपि निधिं प्राप्य, पादैः प्रच्छादयन्ति यत् ॥ ४ ॥ प्र.४ श्लो.२
प्राप्योपशान्तमोहत्वं, क्रोधादिविजये सति । लोभांशमात्रदोषेण, पतन्ति यतयोऽपि हि ॥ ५ ॥ यो. प्र.४ श्लो.७

धनहीन नतमेक, सहस्त्रं शतवानपि । सहस्राधिपतिर्लक्ष, कोटिं लक्षेश्वरोऽपि च ॥ ६ ॥
कोटिश्वरो नरेन्द्रत्व, नरेन्द्रश्चक्रवर्तिताम् । चक्रवर्ती च देवत्व, देवोऽपीन्द्रत्वमिच्छति ॥ ७ ॥
इन्द्रत्वेऽपि हि सप्रासे, यदिच्छा न निवर्तते । मूले लघीयास्तल्लोभ , शराव इव वर्धते ॥८॥ यो प्र ४ श्लो १९-२०-२१
यथा लाभस्तथा लोभो, लाभाल्लोभ प्रवर्धते । मापद्वयाश्रित कार्य, कोटयाऽपि न हि निष्ठितम् ॥९॥ त्रि प १ स ३ श्लो ६
लोभाविष्टो नरो वित्त, विक्षते न स चापदम् । दुग्ध पश्यति मार्जारो, यथा न लगुडाहतिम् ॥ १० ॥
आत्मान धर्मकृत्य च, पुत्रदाराश्च पीडयन् । लोभाढ्य पितरौ भ्रातृन्, स कृपण इति स्मृत' ॥ ११ ॥
दातार कृपण मन्ये, मृत्वाऽप्यर्थं न मुञ्चति । अदाता हि धनत्यागी, धन हित्वा हि गच्छति ॥ १२ ॥
सगात् सजायते गृद्धिर्गृद्धो वाछति सचयम् । सचयात् वर्धते लोभो, लोभात्ससृतिवर्धनम् ॥१३ ॥ त श्लो २३४
जहा लाहो तहा लोहो लाहा लोहो पवड्ढइ। दोमासकणयकज्जं, कोडीए वि न निट्ठय ॥१४॥ छक्त पृ ५९ श्लो २
मूल मोहविषद्रुमस्य सुकृताम्भोराशिकुम्भोद्भव', क्रोधाग्नेररणि' प्रतापतरणि प्रतापतरणिप्रच्छादने तोयद' ।
क्रीडासद्म कलेर्विवेकशशिन. स्वर्भानुरापन्नदी सिन्धु' कीर्तिलताकलापकलभो लोभ पराभूयताम् ॥१५॥ सु पृ ५९ श्लो.८
कसिणपि जो इम लोय, पडिपुण्ण दलेज्ज एगस्स । तेणापि से न सतूसे, इइ दुप्पुरए इमे आया ॥१६॥ उ.अ गा.१६
सुवण्णरूपस्स य पव्वया भवे, सिया हु केलाससमा असखया ।
नरस्स लुद्धस्स न तेहिं किंचि, इच्छाउ आगाससमा अणन्तया ॥१७॥ उ न गा ४८

६७ आशा

आशैव राक्षसी पुंसामाशैव विषमञ्जरी। आशैव जीर्णमदिरा, धिगाशा सर्वदोषभूः ॥ १ ॥

रात्रिर्गमिष्यति भविष्यति सुप्रभातं, भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
एवं विचिन्तयति कोशगते द्विरेफे, हा हंत हंत नलिनीं गज उज्जहार ॥ २ ॥

अङ्गं गलितं पलितं मुण्डं, दशनविहीनं जातं तुण्डम्। वृद्धो याति गृहीत्वा दण्डं, तदपि न मुञ्चत्याशापिण्डम् ॥३ ॥
चर्पटमञ्जरी (शंकराचार्य) श्लो. ४

जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः। धनाशा जीविताशा च, जीर्यतोऽपि न जीर्यति ॥ ४ ॥ हितोपदेश

दिनयामिन्यौ सायं प्रातः, शिशिरवसन्तौ पुनरायातः। कालः क्रीडति गच्छत्यायुः, तदपि न मुञ्चत्याशावायुः ॥५ ॥
मोहमुद्गल (शंकराचार्य) श्लो० १३

आशायाः ये दासास्ते दासाः सर्वलोकस्य। आशा दासी येषां, तेषां दासायते लोकः ॥ ६ ॥

भूशय्या भैक्षमशनं, जीर्णं वासो वनं गृहम्। तथापि निःस्पृहस्याहो चक्रिणोऽप्यधिकं सुखम् ॥७॥ ज्ञा. नि. श्लो. ७

६८ रागद्वेषौ

ममकाराहंकारा–वेषां मूलं पदद्वयं भवति। रागद्वेषावित्यपि, तस्यैवान्यस्तु पर्यायः ॥ १ ॥ प्रशमरति श्लो. ३१

तिष्ठेद्वायुर्द्रवेदग्निर्ज्वलेज्जलमपि क्वचित्। तथापि ग्रस्तो रागाद्यैर्नाप्तो भवितुमर्हति ॥ २ ॥ त्रि. पर्व १० श्लो. ३७

रक्ष्यमाणमपि स्वान्त, समादाय मनाग् मिषम्। पिशाचा इव रागाद्या च्छलयन्ति मुहुर्मुहु. ॥३॥ यो च प्र श्लो ४७
इच्छा मूर्च्छा काम , स्नेहो गार्ध्यं ममत्वमभिनन्द । अभिलाष इत्यनेकानि रागपर्यायवचनानि ॥४॥ प्रशमरति श्लो १८
मनस्तत्र वचस्तत्र, जीवस्तत्रैव सवसेत् । नेत्रानलोकन रागस्तत्र यत्रोपतिष्ठते ॥ ५ ॥ हिंगुल रागप्रक्रम श्लो ३
कामरागस्नेहरागावीषत्करनिवारणौ । दृष्टिरागस्तु पापीयान्, दुरुच्छेद' सतामपि ॥ ६ ॥ वी. प्र ६, श्लो १०

६९ राग

अशक्य रूपमद्रष्टु, चक्षुर्गोचरमागतम् । रागद्वेषौ च यो तत्र, तौ बुध' परिवर्जयेत् ॥ १ ॥
अरिहतेसु अ रागो, रागो साहुसु बभयारीसु । एस पसत्थो रागो, अज्ज सरागाण साहूणं ॥ २ ॥
अक्खाण रसणी कमाण मोहनी तह वयाण बभनय । गुत्तीण य मणगुत्ती, चउरो दुक्खेण जिप्पंति ॥ ३ ॥
क्व याम कुत्र तिष्ठाम , किं कुर्म किं न कुर्महे । रागिणश्चिन्तयन्त्येव, नीरागा' सुखमासते ॥४ ॥ सू० पृ. ७२ ७३
रागो य दोसोविय कम्मबीय, कम्म च मोहप्पभव वयन्ति। कम्म च जाईमरणस्स मूल, दुक्खं च जाई मरण वयन्ति ॥५॥
दुक्ख हय जस्स न होइ मोहो, मोहो हओ जस्स न होइ तण्हा ।
तण्हा हया जस्स न होइ लोभो लोभो, हओ जस्स न किंचणाई ॥ ६ ॥ उत्तराध्ययनसूत्र, द्वात्रिंशाध्ययनात्
ईर्ष्या रोषो दोषो द्वेष', परिवादमत्सराख्याः । वैरप्रचण्डनाद्या नैके द्वेषस्य पर्याया ॥ ७ ॥

७० मोहः

अहं-ममेति मन्त्रोऽयं मोहस्य जगदा-न्ध्यकृत् । अयमेव हि नञः पूर्वः, प्रतिमन्त्रोऽपि मोहजित् ॥ १ ॥
शुद्धात्मद्रव्यमेवाहं, शुद्धज्ञानं गुणो मम । नान्योऽहं न ममान्ये, चेत्यदो मोहास्त्रमुल्बणम् ॥ २ ॥
यो न मुह्यति लग्नेषु, भावेष्वौदयिकादिषु । आकाशमिव पङ्केन, नाऽसौ पापेन लिप्यते ॥ ३ ॥
विकल्पचषकैरात्मा पीतमोहासवो ह्ययम् । भवोच्चतालमुत्तालप्रपञ्चमधिगच्छति ॥४॥ ज्ञान०

७१ ममतात्यागभावना

विषयैः किं परित्यक्तै-र्जागर्ति ममता यदि । त्यागात् कञ्चुकमात्रस्य, भुजङ्गो नहि निर्विषः ॥ १ ॥
कष्टेन हि गुणग्रामं, प्रगुणी कुरुते मुनिः । ममताराक्षसी सर्वं, भक्षयत्येकहेलया ॥ २ ॥
जन्तुकान्तं पशूकृत्य, द्रागविद्यौषधिबलात् । उपायैर्बहुभिः पत्नी, ममता क्रीडयत्यहो ॥ ३ ॥
माता पिता मे भ्राता मे, भगिनी वल्लभा च मे । पुत्राः सुता मे मित्राणि, ज्ञातयः संस्तुताश्च मे ॥ ४ ॥
जिज्ञासा च विवेकश्च, ममता नाशकावुभौ । अतस्ताभ्यां निगृह्णीया-देनामध्यात्मवैरिणीम् ॥५॥ अ. तु० ममतात्या०

७२ समता

वेदा यज्ञाश्च शास्त्राणि, तपस्तीर्थानि संयमः। समतायास्तुलां नैव, यान्ति सर्वेऽपि मेलिताः॥१॥ वि. उ.११ श्लो.७२

जानन्ति कामान्निखिला ससना, अर्थं नरा केऽपि च केऽपि धर्मम् ।
जैन च केचिद् गुरुदेवशुद्ध, केचित् शिव केऽपि च केऽपि साम्यम् ॥ २ ॥ अ ४ श्लो २५
शत्रौ मित्रे तृणे स्त्रैणे, स्वर्णेऽश्मनि मणौ मृदि । इहामुत्र सुखे दु खे, भवे मोक्षे समाशय ॥३॥ त्रि प १०स ३ श्लो ४३
स्वागम रागमात्रेण, द्वेपमात्रात्परागमम् । न श्रयामस्त्यजामो वा, किन्तु मध्यस्थया दृशा ॥४॥ ज्ञा म श्लो ७
पक्षपातो न मे वीरे, न द्वेप कपिलादिपु । युक्तिमद्वचन यस्य, तस्य कार्य॰ परिग्रह॰ ॥ ५ ॥ अष्टक (हरिभद्रसूरि)
न साम्येन विना ध्यान, न ध्यानेन विना च तत् । निष्कम्प जायते तस्माद्, द्वयमन्योऽन्यकारणम् ॥६॥ यो च प्र श्लो ११४
भावनाभिरविश्रान्तमिति भावितमानस । निर्मम सर्वभावेपु, समत्वमवलम्बते ॥७॥ यो च प्र श्लो ११०
प्रणिहन्ति क्षणार्धेन, साम्यमालम्ब्य कर्म तत् । यन्न हन्यान्नरस्तीव्रतपसा जन्मकोटिभि ॥ ८ ॥ यो च प्र श्लो ५१
रे रे चित्त कथ भ्रात , प्रधावसि पिशाचवत् । अभिन्न पश्य चात्मान, रागत्यागात्सुखी भव ॥ ९ ॥

७३ कलह

स्तोकोऽप्यग्निर्दहत्येव, काष्ठादिप्रभूत घनम् । क्लेशलेशोऽत्र तद्वच्च, वृद्धितस्तनुदाहक॰ ॥ १ ॥ हि क॰ श्लो २
आत्मान तापयेन्नित्य, तापयेच्च परानपि । उभयोर्दु खकृत्क्लेशो, यथोष्णरेणुका क्षितौ ॥ २ ॥ हि क श्लो॰ ४

७४ अभ्याख्यानम्

काचकामलदोपेण, पश्येन्नेत्रे विपर्ययम् । अभ्याख्यान वदेज्जिह्वा, तत्र रोग क उच्यते । १ ॥ हि अ श्लोक १

७५ परद्रोहः

ताडनं छेदनं क्लेशकरणं वित्तबन्धनम् । परेषां कुरुते यत्तु, परद्रोहः स उच्यते ॥१॥ मानसो० अ० २ श्लो० ३८
पैशून्यं परवादं च, गालिदानं च तर्जनम् । मर्मोद्घाटं विधत्ते यत्, परद्रोहः स उच्यते ॥ २॥ मा० अ० २, श्लो. ३९
तस्मात् परकृतो द्रोहो यश्चातीव सुदुःसहः । तस्मान्नरकदं घोरं, परद्रोहं विवर्जयेत् ॥३॥ मानसो० अ. २ श्लो० ४१

७६ पैशून्यम्

अन्यस्य तापनाद्यर्थं, पैशून्यं क्रियते जनैः । स्वात्मा हि तप्यते तेन, यदुग्रं स्यात्फलं च तत् ॥ १॥ हिं. पै. श्लो. ३
दानं च विफलं नित्यं, शौर्यं तस्य निरर्थकम् । पैशून्यं केवलं चित्ते, वसेद्यस्याऽयशो भुवि ॥ २ ॥ हि. पै. श्लो. ४
दानशीलतपोभावै–रस्यैधते वृषो भुवि । यस्य मनोवचःकायैः, पैशून्यं नाभिसंश्रयेत् ॥३॥ हि. पै० श्लो० २

७७ रतिअरतिः

आदौ रागस्तत द्वेषस्तस्मात् क्लेशपरम्परा । तद्वदादौ रतिश्चारतिस्ततः कर्मबन्धनम् ॥ १ ॥ हिं. रति० श्लो० २

७८ परपरिवादः

वक्तुं नैव क्षमा जीह्वा, यदि मूकस्य तद्वरम् । परं परापवादं च, जंजप्यते न तद्वरम् ॥१॥ हि. प. श्लो.२
परपरिभवपरिवादात्मोत्कर्षाच्च बध्यते कर्म । नीचैर्गोत्रं प्रतिभवमनेकभवकोटिदुर्मोचम् ॥२॥ प्र. श्लो. १००
सर्वमदस्थानानां, मूलोद्घातार्थिना सदा यतिना । आत्मगुणैरुत्कर्षः परपरिवादश्च संत्याज्यः ॥३॥ प्र. श्लो. ९९

र्गि ऽसि वशीकर्तुं, जगदेकेन कर्मणा । परापवादशसेभ्यश्चरंतीं गा निवारय ॥ ४ ॥ उ स्त ९ व्या १३३

७९ मायामृषावाद

मनस्यन्यद् वचस्यन्यद् मायामृषा च सोच्यते । कदाऽपि सुखदा न स्याद्विश्वे यथा पणांगना ॥ १ ॥ हिं म श्लो १

८० मिथ्यात्वम्

अदेवे देवबुद्धिर्या, गुरुधीरगुरौ च या । अधर्मे धर्मबुद्धिश्च, मिथ्यात्व तद्विपर्ययात् ॥१॥ यो पृ ५८ श्लो.३ (प्र स)
मिथ्यात्व परमो रोगो, मिथ्यात्व परम तम । मिथ्यात्व परम शत्रुर्मिथ्यात्व परम विषम् ॥ २॥ यो पृ ५८ प्र. स
नास्ति नित्यो न कर्ता च, न भोक्तात्मा न निर्वृत. । तदुपायश्च नेत्याहुर्मिथ्यात्वस्य पदानि षट् ॥३॥ अ प्र ४ श्लो ६०
स्वाध्यायेन गुरोर्भक्त्या, दीक्षया तपसा तथा । येन केनोद्यमेनैव, मिथ्यात्वशल्यमुद्धरेत् ॥४॥ हिं मि श्लो ३
मिथ्यात्वत्यागत शुद्ध, सम्यक्त्व जायतेऽङ्गिनाम्। अतस्तत्परिहाराय, यतितव्य महात्मना ॥५॥ अ. प्र ४ श्लो ५९

८१ क्षमा

क्षन्तव्यो मन्दबुद्धीना-मपराधो मनीषिणा । न हि सर्वत्र पाण्डित्य, सुलभ पुरुषा क्वचित् ॥ १ ॥
नरस्याभूषण रूप, रूपस्याभरण गुण । गुणस्याभूषण ज्ञान, ज्ञानस्याभूषण क्षमा ॥ २ ॥ मणिरत्नमाला श्लो० ५५
अद्विष्ट. सर्वभूताना, मैत्रः करुण एव च । निर्ममो निरहङ्कार , समदु'खसुख क्षमी ॥ ३ ॥ यतिधर्मसग्रह पृ० ३०

धर्मस्य दया मूलं, न चाक्षमावान् दयां समाधत्ते । तस्माद्यः क्षान्तिपरः, स साधयत्युत्तमं धर्मम् ॥४॥ प्रश० श्लो०१६८
क्षमया क्षीयते कर्म, दुःखदं पूर्वसंचितम् । चित्तं च जायते शुद्धं, विद्वेषभयवर्जितम् ॥ ५ ॥ तत्त्वामृत श्लो० २६९
क्षमा (खड्गं) धनुः करे यस्य, दुर्जनः किं करिष्यति ? । अतृणे पतितो वह्निः, स्वयमेवोपशाम्यति ॥६॥ वृद्ध. श्लो.६३
खंती सुहाण मूलं, मूलं धम्मस्स उत्तमा खंती । हरइ महाविज्जा इव, खंती दुरियाइं सव्वाइं ॥ ७ ॥ संबोधसत्तरीप्र०
यस्य क्षान्तिमयं शस्त्रं, क्रोधाग्नेरुपशामकम् । नित्यमेव जयस्तस्य, शत्रूणामुदयः कुतः ॥ ८ ॥
ददतु ददतु गालीर्गालिमन्तो भवन्तो, वयमिह तदभावाद्गालिदानेऽप्यशक्ताः ।
जगति विदितमेतद्दीयते विद्यमानं, ददति खरविषाणं किं महात्यागिनोऽपि ॥ ९ ॥ सूक्तमुक्तावली पृ० ८२–८३

८२ ऋजुता

तदार्जवमहौषध्या, जगदानन्दहेतुना । जयेज्जगद्द्रोहकारीं, मायां विषधरीमिव ॥ १ ॥ यो. च. प्र. श्लो.१७
नानार्जवो विशुध्यति, न धर्ममाराधयत्यशुद्धात्मा । धर्मादृते न मोक्षो, मोक्षात्परं सुखं नान्यत् ॥ २॥ प्र. श्लो. १७०

८३ संतोषः

संतोषः परमं सौख्यं, संतोषः परमामृतम् । संतोषः परमं पथ्यं, संतोषः परमं हितम् ॥१॥ हिं. श्लो. १४
संतुष्टाः सुखिनो नित्य-मसंतुष्टाः सुदुःखिताः । उभयोरन्तरं ज्ञात्वा, संतोषे क्रियतां रतिः ॥२॥ त. श्लो. २४४

८४ संसारस्वरूपम्

आदित्यस्य गतागतैरहरह सक्षीयते जीवित, व्यापारैर्बहुकार्यभारगुरुभि कालोऽपि न ज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरण त्रासश्च नोत्पद्यते । पीत्वा मोहमयी प्रमादमदिरामुन्मत्तभूत जगत् ॥ १ ॥
आधिव्याधिजरामृत्युज्वालाशतसमाकुल । प्रदीप्ताङ्गारकल्पोऽय, ससार सर्वदेहिनाम् ॥ २ ॥ त्रि पर्व १, श्लो ५५६
जन्मरोगजराशोकमृत्युदौ स्थ्याद्युपद्रवै । व्याकुलेऽत्र भवे दु खमेव प्रायो भवेद्विशाम् ॥ ३॥ उ० पृ० २०४ (आ स)
अस्मिन्नसारे ससारे, निसर्गेणातिदारुणे । अवधिर्न हि दु खाना, यादसामिव वारिधौ ॥ ४ ॥ अमरचद्रसूरि
स्फूर्जल्लोभकरालवक्त्रकुहरो हुङ्कारगुञ्जारव', कामक्रोधविलोललोचनयुगो मायानखश्रेणिभाक् ।
स्वैर यत्र स बम्भ्रमीति सतत, मोहाह्वय केसरी, ता ससारमहाटवीं प्रतिनसन्को नाम मन्तु' सुखी ? ॥५॥ वै श्लो ९०
इत कामौर्वाग्निर्ज्वलति परितो दु सह इत , पतन्ति ग्रावाणो विषयगिरिकूटाद्विघटिताः ।
इत. क्रोधावर्तो विकृतितटिनीसङ्गमकृत , समुद्रे ससारे तदिह न भय कस्य भवति ॥ ६ ॥
प्रियाज्वाला यत्रोद्वमति रतिसन्तापतरला, कटाक्षान् धूमौघान् कुवलयदलश्यामलरुचीन् ।
अथाङ्गान्यङ्गारा कृतबहुविकाराश्च विषया, दहन्त्यस्मिन् वह्नौ भववपुषि शर्म क्व सुलभम् ? ॥ ७ ॥
गले दत्वा पाश तनयवनितास्नेहघटित, निपीड्यन्ते यत्र प्रकृतिकृपणा प्राणिपशव' ।
नितान्तं दु खार्त्ता विषयविषयैर्घातकभटै-र्भव सूनास्थान तदहह महासाध्वसकरम् ॥ ८ ॥

अविद्यायां रात्रौ, चरति वहते मूर्ध्नि विषयम्, कषायव्यालौघं क्षिपति विषयास्थीनि गले ।
महादोषान् दन्तान् प्रकटयति वक्रस्मरमुखो, न-विश्वासार्होऽयं, भवति भवनक्तञ्चर इति ॥ ९ ॥
जना लब्ध्वा धर्मद्रविणलवभिक्षां कथमपि, प्रयान्तो वामाक्षीस्तनविषयदुर्गस्थिति कृता ।
विलुटयन्ते यस्यां कुसुमशरभिल्लेन बलिना, भवाख्यां नास्यामुचितमसहायस्य गमनम् ॥ १० ॥
धनं मे गेहं मे मम सुतकलत्रादिकमतो, विपर्यासादासादितविततदुःखा अपि मुहुः ।
जना यस्मिन् मिथ्या सुखमदभृताः कूटभूधना, मयोऽयं संसारस्तदिह न विवेकी प्रसजति ॥ ११ ॥
प्रियास्नेहो यस्मिन् निगडसदृशो यामिकभटो-पमः स्वीयो वर्गो धनमभिनवं बन्धनमिव ।
मदामेध्यापूर्णं व्यसनबिलसंसर्गविषयम्, भवः कारगेहं तदिह न रतिः क्वापि विदुषाम् ॥ १२ ॥
महाक्रोधो गृध्रोऽनुपरति शृगाली च चपलीला, स्मरोलूको यत्र प्रकटकटुशब्दः प्रचरति ।
प्रदीप्तः शोकाग्निस्ततमपयशो भस्म स्मरति, श्मशानं संसारस्तदभिरमणीयत्वमिह किम् ॥ १३ ॥
यस्य गम्भीरमध्यस्याऽज्ञानवज्रमयं तलम् । रुद्धा व्यसनशैलौघैः पन्थानो यत्र दुर्गमाः ॥ १४ ॥
पातालकलशा यत्र, भृता तृष्णामहानिलैः । कषायांश्चित्तसङ्कल्पवेलावृद्धि वितन्वते ॥ १५ ॥
स्मरौर्वाग्निर्ज्वलत्यन्तर्यत्र स्नेहेन्धनः सदा । यो घोररोगशोकादि मत्स्यकच्छपसङ्कुलः ॥ १६ ॥
दुर्बुद्धिमत्सरद्रोहैर्विद्युद्दुर्वातगर्जितैः । यत्र सांयात्रिका लोकाः पतन्त्युत्पातसङ्कटे ॥ १७ ॥
ज्ञानी तस्माद्भवाम्भोधेर्नित्योद्विग्नोऽतिदारुणात् । तस्य सन्तरणोपायं सर्वयत्नेन काङ्क्षति ॥ १८ ॥

तैलपात्रधरो यद्वद् राधवेधोद्यतो यथा । क्रियास्वनन्यचित्त स्याद् भवभीतस्तथा मुनि ॥ १९ ॥ वाचकयशो वि

८५ इन्द्रियविषयस्वरूपम्

बिभेषियदि ससारात् मोक्षप्राप्तिं च काङ्क्षसि । तदेन्द्रियजय कर्तुं, स्फोरय स्फारपौरुषम् ॥१॥ (ज्ञानसार)
दु खद्विड् सुखलिप्सुर्मोहा धत्वादहष्टगुणदोष । यां या करोति चेष्टा तया तया दु खमादत्ते ॥ २ ॥
कलरिभितमधुरगा धर्वतूर्ययोषिद्विभूषणरवाद्यै । श्रोत्राननद्धहृदयो हरिण इव विनाशमुपयाति ॥ ३ ॥
गतिविभ्रमेङ्गिताकारहास्यलीलाकटाक्षविक्षिप्त । रूपावेशितचक्षु शलभ इव विपद्यते विवश. ॥ ४ ॥
स्नानाङ्गरागवर्तिकवर्णकधूपाधिवासपटवासै । गन्धभ्रमितमनस्को, मधुकर इव नाशमुपयाति ॥ ५ ॥
मिष्टान्नपानमांसौदनादि, मधुररसविषयगृद्धात्मा । गलयन्त्रपाशबद्धो मीन इव नाशमुपयाति ॥ ६ ॥
शयनासनसम्बाधनसुरतस्नानानुलेपनासक्त । स्पर्शव्याकुलितमतिर्गजेन्द्र इव बध्यते मूढ' ॥ ७ ॥
एकैकविषयसङ्गाद्रागद्वेषातुरा विनष्टास्ते । किं पुनरनियमितात्मा जीवः पञ्चेन्द्रियवशार्त ॥ ८ ॥
यस्मिन्निन्द्रियविषये शुभमशुभ वा निवेशयति भावम् । रक्तो वा द्विष्टो वा स बन्धहेतुर्भवति तस्य ॥ ९ ॥ प्रश०

८६ चतुर्गतिगमनागमनसूचकसूक्तानि

स्वर्गच्युतानामिह जीवलोके, चत्वारि नित्य हृदये वसन्ति । दानप्रसगो मधुरा च वाणी, देवार्चन सद्गुरुसेवन च ॥१॥

सद्धर्मः सुभगो नीरुक्, सुभगः सुनयः कविः। सूचयत्यात्मनः श्रीमान्, नरः स्वर्गं गमागमौ ॥२॥ चि. उ.५ श्लो.२२
निर्दम्भः स दयो दानी, दान्तो दक्षः सदा मृदुः । साधुसेवी जनोत्साही, भावी चात्र नरः पुनः ॥३॥ ध. पृ.९३ श्लो.६८
क्षुधालुता मानविहीनता च, भयातिरेकः प्रभविष्णुता च ।
मानापमाने समचित्तताच, तिर्यग्गतेरागतचिह्नमेतत् ॥ ४ ॥ क. श्लो. १०९
मायलोभक्षुधाऽलस्यबह्वाहारादि चेष्टितैः । तिर्यग्योनिसमुत्पत्तिं, ख्यापयत्यात्मनः पुमान् ॥५॥ चि. उ. ५ श्लो.२४
विरोधता बन्धुजनेषु नित्यं, सरोगता मूर्खजनेषु सङ्गः ।
अतीव रोषी कटुका च वाणी, नरस्य चिह्नं नरकागतस्य ॥ ६ ॥ म. श्लो. ६३

८७ नारकदुःखानि

नरएसु जाइं अइकक्खडाइं दुक्खाइं परमतिक्खाइं । को वण्णेही ताइं, जीवंतो वासकोडीऽवि ॥१॥ ध. उ.
ज्वरोष्णदाहभयशोकतृष्णाकण्डूबुभुक्षा अपि पारवश्यम् । शीतं पुनर्नारकिणामतीव दशप्रकाराः प्रभवन्ति पीडाः ॥२॥
तिलपीलं निपील्यन्ते, यन्त्रैस्तत्र हि केचन । दारुदारं विदार्यन्ते, क्रकचैः केऽपि दारुणैः ॥ ३ ॥
शूलतूलिकशय्यासु, शाय्यन्ते केऽपि सन्ततम् । असुरैर्वस्त्रवत् केचिदास्फाल्यन्ते शिलातले ॥ ४ ॥
पिपासिताश्च पाय्यन्ते, तप्तत्रपुरसं मुहुः । छायार्थिनो निपाद्यन्ते, चासिपत्रतरोस्तले ॥ ५ ॥ त्रि. पृ.१० पु.
नरकेपूष्णशीतेषु चेत् पतेल्लोहपर्वतः । निलीयेत विशीर्येत तदा भुवनाप्नुवन् ॥ ६ ॥

सम्श्लेष्यन्ते च शाल्मल्यो वज्रकटकसकटा । तक्षाय पुत्रिका' क्वापि स्मारितान्यवधूरतम् ॥ ७ ॥
छिन्नभिन्नशरीराणा भूयो मिलितवर्ष्मणाम् । नेत्राद्यगानि कृन्यन्ते नककाकादिपक्षिभि' ॥ ८ ॥ त्रि स

८८ दुर्जनता

हस्तौ दानविवर्जितौ श्रुतिपुटौ सारश्रुते द्रोहिणौ, नेत्रे साधुविलोकनेन रहिते पादौ न तीर्थं गतौ
अन्यायार्जितपूर्णमुदर गर्वेऽथ तुग शिर , रे रे जबुक मुश्च मुश्च सहसा नीचस्य निन्द्य वपु ॥ १ ॥
विद्या विवादाय धन मदाय, शक्तिश्च नित्य परपीडनाय। खलस्य साधोर्विपरीतमेतत्, ज्ञानाय दानाय च रक्षणाय॥२॥
वाह्यो रुधिरमापीत, भक्षित मासमूरुजम् । भागिरथ्या पति क्षिप्त', साधु साधु पतिव्रते ॥ ३ ॥
मृगमीनसज्जनाना, तृणजलसन्तोषविहितवृत्तीनाम् । लुब्धकधीवरपिशुना, निष्कारणवैरिणो जगति ॥ ४ ॥
कपिरपि च कापीशायन, मदमत्तो वृश्चिकेन संदष्ट । अपि च पिशाचग्रस्त , किं ब्रूमो वै कृतं तस्य ॥ ५ ॥
दुर्जनेन सम सख्य, प्रीतिं चापि न कारयेत् । उष्णो दहति चाङ्गार , शीत' कृष्णायते करम् ॥ ६ ॥
पश्य लक्ष्मण ! पम्पाया, बकोऽय परमधार्मिक । शनैर्हि मुञ्चते पादौ, जीवानामनुकम्पया ॥ ७ ॥
सहवासी विजानाति, सहवासिविचेष्टितम् । बक' किं वर्ण्यते राम ! येनाऽह निष्कुलीकृतः ॥ ८ ॥
रत्तिधा दीहधा जच्चधा मायमाणकोहधा । कामधा लोहधा, इमे कमेण विसेसधा ॥ ९ ॥

८९ जरा

गात्रं संकुचितं गतिर्विगलिता दन्ताश्च नाशं गता, दृष्टिर्भ्रश्यति रूपमेव ह्रसते वक्त्रं च लालायते ।
वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते, हा कष्टं जरयाऽभिभूतपुरुषं पुत्रोऽप्यवज्ञायते ॥ १ ॥
वीक्ष्यते पलितश्रेणिर्नैव वृद्धस्य मूर्द्धनि । वृथैव जातजन्मेति, किं तु भस्म विधिर्न्यधात् ॥ २ ॥ सूक्तमुक्तावली पृ.६१

९० मूर्खता

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः । ज्ञानलवदुर्विदग्धं, ब्रह्मापि तं न रञ्जयति ॥ १ ॥
यदा किञ्चिज्ज्ञोऽहं गज इव मदान्धः समभवं, तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं, तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ २ ॥
खादन्न गच्छामि हसन्न जल्पे, दत्तं न शोचामि कृतं नु मन्ये ।
द्वाभ्यां तृतीयो न भवामि राजन्नस्मादृशा नैव भवन्ति मूर्खाः ॥ ३ ॥
मूर्खत्वं च सखे! ममापि रुचितं तस्मिन् यदष्टौ गुणा, निश्चिन्तो बहुभोजनोऽत्रपमना नक्तंदिवाशायकः ।
कार्याकार्यविचारणान्धबधिरो मानापमाने समः, प्रायेणाशयवर्जितो दृढवपुर्मूर्खः सुखं जीवति ॥ ॥ ४ ॥
उपदेशो हि मूर्खाणां, प्रकोपाय न शान्तये । पयःपानं भुजङ्गानां, केवलं विषवर्द्धनम् ॥ ५ ॥
द्वौ हस्तौ द्वौ च पादौ च, दृश्यसे पुरुषाकृतिः । रे रे वानर! मूर्खस्त्वं, गृहं किं न करोष्यपि ? ॥ ६ ॥

शुचि मुखि ! दुराचारि ! रण्डे ! पण्डितमानिनि । असमर्थो गृहारम्भे, समर्थो गृहभञ्जने ॥ ३ ॥
प्राय सम्प्रति कोपाया, स मार्गस्योपदर्शनम् । चिलूननासिकस्येव, विशुद्धादर्शदर्शनम् ॥८॥ सु० पृ० १९७-१९८
श्वसुरगृहनिवास , स्वर्गतुल्यो नराणाम्, यदि वसति विवेकी, वासराणि त्रिपञ्च ।
दधिमधुघृतलोभान्, मासयुग्म वसेत् चेत्, स भवति खरतुल्यो, मानवो मानहीन ॥ ९ ॥
वज्रकूटे विजयराम , तिलतैलेन माधव' । भूमिशय्या मणिरामो, धक्काधुमेन केशव' ॥ १० ॥
उत्तमा स्वगुणैः ख्याता, मध्यमाश्च पितुर्गुणैः । अधमा मातुलैः ख्याता , श्वसुरैश्चाधमाधमा' ॥११॥ सु पृ, २२५

११ सप्तव्यसनानि

द्यूत च मास च सुरा च वेश्या, पापर्द्धिचौर्ये परदारसेवा ।
एतानि सप्त व्यसनानि लोके, घोरातिघोरं नरक नयन्ति ॥ १ ॥ विक्रम चरित्र, भाग २, श्लो० १३२६
द्यूताद् राज्यविनाशन नलनृपः प्राप्तोऽथवा पाण्डवाः, मद्यात् कृष्णनृपश्च राघवपिता पापर्द्धितो दूषित ।
मांसाच्छ्रेणिकभूपतिश्च नरक चौर्याद्विनष्टा न के, वेश्यात कृतपुण्यको गतधनोऽन्यस्त्रीमृतो रावणः ॥२॥ कुमा० पृ ५१

१२ कर्मविपाकचिन्तनम्

दु ख प्राप्य न दीन' स्यात्, सुख प्राप्य च विस्मित । मुनि कर्मविपाकस्य, जानन्परवश जगत् ॥ १ ॥
येषा भ्रूभङ्गमात्रेण, भज्यन्ते पर्वता अपि । तैरहो कर्मवैषम्ये, भूपैर्भिक्षाऽपि नाप्यते ॥ २ ॥

आरूढाः प्रशमश्रेणिं, श्रुतकेवलिनोऽपि च । भ्राम्यन्तेऽनन्तसंसारमहो दुष्टेन कर्मणा ॥ ३ ॥ वाचकश्री यशोवि० ज्ञा०
एगया देवलोएसु, नरएसु वि एगया । एगया आसुरं कायं, अहाकम्मेहिं गच्छई ॥ ४ ॥ उत्तराध्ययन तृ० गा० ३
तेणे जहा सन्धिमुहे गहीए, सकम्मुणा किच्चइ पावकारी । एवं पया पेच्च इहं च लोए, कडाण कम्माण न मुक्ख अत्थि॥५॥
संसारमावन्न परस्स अट्ठा, साहारणं जं च करेइ कम्मं ।
कम्मस्स ते तस्स उ वेयकाले, न बन्धवा बन्धवयं उवेन्ति ॥ ६ ॥ उत्तराध्ययनसूत्र, चतुर्थाध्ययन, गा० ३–४
सुतारा विक्रीता स्वजनविरहः पुत्रमरणे, विनीतायास्त्यागो रिपुबहुलदेशे च गमनम् ।
हरिचन्द्रो राजा वहति सलिलं प्रेतसदने, अवस्थाप्येकाहोऽप्यहह विषमाः कर्मगतयः ॥ ७ ॥
वैद्या वदन्ति कफपित्तमरुद्विकारं, ज्योतिर्विदो ग्रहगणादिनिमित्तदोषम् ।
भूतोपसर्गमथ मन्त्रविदो वदन्ति प्राचीन कर्म बलवन् मुनयो वदन्ति ॥ ८ ॥
जानामि पापं न च मे निवृत्ति, जानामि पुण्यं न च मे प्रवृत्तिः ।
केनापि भूतेन हृदि स्थितेन, व्यादिश्यते यत् तदहं करोमि ॥ ९ ॥ सूक्तमुक्तावलि, पृ० २० (दे० ला०)
कर्मणो हि प्रधानत्वं, किं कुर्वन्ति शुभा ग्रहाः । वसिष्ठदत्तलग्नोऽपि, रामः प्रव्रजितो वने ॥१०॥ आ. रा. श्लो. १५
ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे, विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं सेवते, सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥११॥ नी. श्लो. ९२
कृतकर्मक्षयो नास्ति, कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् ॥१२॥ वि० पृ. २७ (हे. जै. ग्रं.)

१३ मृत्यु

अनुचितकार्यारम्भ , स्वजनविरोधो बलीयसा स्पर्धा । प्रमादजनविश्वासो, मृत्युद्वाराणि चत्वारि ॥१॥ हि सु. श्लो १५१

श्व कार्यमद्य कुर्वीत, पूर्वाह्णे चापराह्णिकम् । न हि मृत्यु प्रतीक्षेत, कृत चास्य न वा कृतम् ॥२॥ श्रा. पृ ९९ श्लो २

सञ्चिततपोधनानां, नित्य व्रतनियमसयमरतानाम् । उत्सवभूत मन्ये, मरणमनपराधवृत्तीनाम् ॥३॥ उमास्वातिवाचक

धीरेण कातरेणापि, मर्तव्य खलु देहिना । तन्म्रियेत तथा धीमान्, न म्रियते यथा पुन ॥४॥ त्रि प १० स १ श्लो.२५५

जातस्य हि ध्रुव मृत्युर्ध्रुव जन्म मृतस्य च । तस्मादपरिहार्येऽर्थे, का तत्र परिदेवना ॥ ५ ॥

यत्र वेश्मनि नो कोऽपि, मृतः पूर्वं ततोऽधुना । भृशमानीयता रक्षा, जीवयामो यथा तथा ॥६॥ सु पृ १५-१६

मङ्गलै कौतुकैर्योगै विद्यामन्त्रैस्तथौषधै. । न शक्ता मरणात्त्रातु, सेन्द्रा देवगणा अपि ॥७॥ सु पृ १७

नो विद्या न च भैषज न च पिता नो बान्धवा नो सुता , नाभीष्टा कुलदेवता न जननी स्नेहानुबन्धान्विता ।

नार्थो न स्वजनो न वा परिजन' शारीरिक नो बल, नो शक्ताः सतत सुरासुरवरा सन्धातुमायु' क्षमा. ॥ ८ ॥

मृत्योर्बिभेपि किं बाल ! स जात नैव मुञ्चति । अजात नैव गृह्णाति, कुरु यत्नमजन्मनि ॥ ९ ॥

करिष्यामि करिष्यामि करिष्यामीति चिन्तानात् । मरिष्यामि मरिष्यामि मरिष्यामीति विस्मृतम् ॥१०॥ सु. २३५ २३७

जायमाणस्स ज दुक्ख, मरमाणस्स जतुणो । तेण दुक्खेण सतत्तो, न सरइ पुव्वजाइय ॥ ११ ॥

नित्यमित्रसम देह, स्वजना पर्वसन्निभा , नमस्कारसमो ज्ञेयो, धर्मः परमबान्धवः ॥ १२ ॥

इदं शरीरं परिणामदुर्बलं, पतत्यवश्यं श्लथसंधिजर्जरम् ।
किमौषधैः क्लिश्यसि ? मूढ दुर्मते ! निरामयं धर्मरसायनं पिब ॥ १३ ॥ सू. पृ. १३-१४

१४ आराधना

अर्हत्सिद्धसाधुधर्मान्मंगलात्मनः । लोकोत्तमांश्च चतुरश्चतुरः सोऽस्मरत् स्वरात् ॥ १ ॥
जीवाजीवादितत्त्वोपदेशकाः परमेश्वराः । बोधिप्रदाः स्वयंबुद्धा, अर्हन्तः शरणं मम ॥ २ ॥
ध्यानाग्निदग्धकर्माणस्तेजोरूपा अनश्वराः । अनन्तकेवलज्ञानाः, सिद्धाश्च शरणं मम ॥ ३ ॥
निरीहा निरहङ्कारा, निर्ममाः समचेतसः । महाव्रतधरा धीराः, साधवः शरणं मम ॥ ४ ॥
अहिंसासूनृतास्तेयब्रह्माऽकिंचनतामयः । केवल्युपज्ञः परमो, धर्मश्च शरणं मम ॥५ ॥
अपि जन्म शतैर्यद्यदपराद्धं शरीरिषु । त्रिविधं त्रिविधेनापि, तन्निन्दामि समाहितः ॥ ६ ॥
गृहिधर्मं द्वादशधा, मया पालयता कृता । ये केचिदप्यतीचारास्तान् सर्वान् व्युत्सृजाम्यहम् ॥ ७ ॥
क्रोधमानमायालोभाभिभूतेन मया सदा । कृतं यत्र हिंसादि, तत्त्रिधापि धिगस्तु मे ॥८॥ त्रि. चे. आराधनायाः

१५ मनुष्यभवदुर्लभत्वम्

अनर्घ्याण्यपि रत्नानि, लभ्यन्ते विभवैः सुखम् । दुर्लभो रत्नकोट्याऽपि, क्षणोऽपि मनुजायुषः ॥ १ ॥
देवा विसयपसत्ता, नेरइआ विविहदुक्खसंतत्ता । तिरिआ विवेगविकला, मणुआणं धम्मसामग्गी ॥ २ ॥

चुल्लग पासग धन्ने जूए रयणे अ सुमिण चक्के अ । चम्मजूगे परमाणू दस दिट्ठंता मणुअलंभे ॥ ३ ॥
आर्यक्षेत्रकुलरूपबलायुर्बुद्धि बन्धुरमवाप्य नरत्वम् । धर्मकर्म न करोति जडो य पोतमुज्झति पयोधिगत' स. ॥४॥
य प्राप्य दुष्प्रापमिद नरत्व, धर्मं न यत्नेन करोति मूढ । क्लेशप्रबन्धेन स लब्धमब्धौ, चिन्तामणिं पातयति प्रमादात् ॥५॥
स्वर्णस्थाले क्षिपति स रज , पादशौच विधत्ते, पीयूषेण प्रवरकरिण वाहयत्यैन्धभारम् ।
चिन्तारत्न विकिरति कराद्वायसोड्डायनार्थम्, यो दुष्प्राप गमयति मुधा मर्त्यजन्म प्रमत्त' ॥ ६ ॥
कुसग्गे जह ओसबिन्दुए थोव चिट्ठइ लबमाणए । एव मणुआण जीविय, समय गोयम मा पमायए ॥ ७ ॥
दुल्लहे खलु माणुसे भवे, चिरकालेण वि सव्वपाणिण । गाढो य विवाग कम्मुणो समय गोयम मा पमायए ॥८॥ गा २,४
चत्तारि परमगाणि दुल्लहाणीह जन्तुणो । माणुसत्त सुई सद्धा सजमम्मि य विरिय ॥ ९ ॥ उ अ ३ गा १

१६ धर्मोद्यम

अनित्यानि शरीराणि, विभवो नैव शाश्वत । नित्य सनिहितो मृत्यु , कर्तव्यो धर्मसग्रहः ॥ १ ॥
अङ्कस्थाने भवेद्धर्म, शून्यस्थान तत परम् । अङ्कस्थाने पुनर्भ्रष्टे, सर्व शून्यमिद भवेत् ॥ २ ॥
त्यज दुर्जनससर्गं, भज साधुसमागमम् । कुरु पुण्यमहोरात्र, स्मर नित्यमनित्यताम् ॥ ३ ॥
आयुर्वर्षशत नृणा परिमित रात्र्या तदर्धीकृत, तस्यार्द्धस्य कदाचिदर्द्धमधिक वार्धक्यबाल्ये गतम् ।
शेष रोगवियोगशोकमदनक्रोधादिभिर्व्याकुलस्यायुर्याति नरस्य तत्र कतमो यो धर्मकर्मणः ॥ ४ ॥

बालः प्रायो रमणाऽऽसक्तस्तरुणः प्रायो रमणीरक्तः । वृद्धः प्रायश्चिन्तामग्नस्तदहो धर्मे कोऽपि न लग्नः ॥५॥ सू. प.

१७ धर्मोपदेशः

दानं वित्ताद्धतं वाचः, कीर्तिधर्मौ तथाऽऽयुषः । परोपकरणं कायादसारात्सारमुद्धरेत् ॥ १ ॥
बुद्धेः फलं तत्त्वविचारणं च, देहस्य सारं व्रतधारणं च । अर्थस्य सारं किल पात्रदानं, वाचः फलं कितिंकरं नराणाम् ॥२॥
जिनेन्द्रपूजा गुरुपर्युपास्तिः, सत्त्वानुकम्पा शुभपात्रदानम् । गुणानुरागः श्रुतिरागमस्य, नृजन्मवृक्षस्य फलान्यमूनि ॥ ३ ॥
पिता योगाभ्यासो विषयविरतिः सा च जननी, विवेकः सोदर्यः प्रतिदिनमनीहा च भगिनी ।
प्रिया क्षान्तिः पुत्रो विनय उपकारः प्रियसुहृत्, सहायो वैराग्यं गृहमुपशमो यस्य स सुखी ॥ ४ ॥
करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणमनं, मुखे सत्या वाणी श्रुतमवितथं च श्रवणयोः ।
हृदि स्वच्छा वृत्तिर्विजयि भुजयोः पौरुषमहो, विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ५ ॥
जन्तूनामवनं जिनेशमहनं भक्त्यागमाऽऽकर्णनं, साधूनां नमनं मदापनयनं सम्यग्गुरोर्माननम् ।
मायाया हननं क्रुधश्च शमनं लोभद्रुमोन्मूलनम्, चेतः शोधनमिन्द्रियार्थदमनं यत्तत् शिवोपायनम् ॥ ६ ॥
त्रैकाल्यं जिनपूजनं प्रतिदिनं सङ्घस्य सन्माननं, स्वाध्यायो गुरुसेवनं च विधिना दानं तथाऽऽवश्यकम् ।
शक्त्या च व्रतपालनं वरतपो, ज्ञानस्य पाठस्तथा, सैष श्रावकपुङ्गवस्य कथितो धर्मो जिनेन्द्रागमे ॥ ७ ॥
जत्थ य विसयविराओ, कसायचाओ गुणेसु अणुराओ । किरिआसु अप्पमाओ, सो धम्मो सिवसुहोवाओ ॥

पच्चक्खाणं पूआ, पडिक्कमण पोसहो परुनयारो। पच पयारा जस्सउ न पयारो तस्स ससारो ॥ ८ ॥ सूक्त प्र
अप्पा चेव दमेयव्वो, अप्पा हु खलु दुद्दमो। अप्पा दन्तो सुही होइ, अस्सिं लोए परत्थे य ॥ ९ ॥
वर मे अप्पा दन्तो, सजमेण तवेण य। माह परहिं दम्मन्तो वन्धणेहिं वहेहि य ॥ १० ॥ उ प्र. श्लो १५-१६
अय निज परो वेति गणना लघुचेतसाम्। उदारचरिताना तु वसुधैव कुटुम्बकम् ॥ ११ ॥
मज्ज विसय कसाया निद्दा विकहा य पचमी भणिया। ए ए पंच पमाया जीव पाडन्ति ससारे ॥ १२ ॥
मिथ्यात्वाविरतिप्रमादकपाययोगान् आत्मन् सदा सवृणु सौख्यमिच्छन्।
असवृता यद् भवतापमेपत सुसवृता मुक्तिरमा च दद्यु' ॥ १३ ॥
अकर्तव्य न कर्तव्य, प्राणै कण्ठगतैरपि। सुकर्तव्य तु कर्तव्य, प्राणै कण्ठगतैरपि ॥ १४ ॥
राजदण्डभयात्पाप, नाचरत्यधमो जन। परलोकभयान्मध्य, स्वभावादेव चोत्तम ॥ १५ ॥
यत्नेन पापानि समाचरन्ति, धर्मं प्रसङ्गादपि नाचरन्ति। आश्चर्यमेतद्धि मनुष्यलोके, क्षीरं परित्यज्य विष पिबन्ति ॥१६॥
धर्मस्य फलमिच्छति, धर्मं नेच्छन्ति मानवा। फल पापस्य नेच्छन्ति, पाप कुर्वन्ति सादरा' ॥ १७ ॥
स्वर्गच्युतानामिह जीवलोके, चत्वारि नित्य हृदये वसन्ति। दानप्रसङ्गो विमला च वाणी, देवार्चन सद्गुरुसेवन च॥१८॥ पृ.११

९८ बुद्धिः

अनारम्भो हि कार्याणा, प्रथम बुद्धिलक्षणम्। आरब्धस्यान्तगमनं, द्वितीय बुद्धिलक्षणम् ॥१॥ प. पृ ९७ श्लो.११४

प्रज्ञाऽङ्गना सदा सेव्या, पुरुषेण सुखावहा । हेयोपादेयतत्त्वज्ञा, या रता सर्वकर्मणि ॥ २ ॥ त. श्लो. २६०
सा प्रज्ञा या शमे याति, विनियोगपरा हिता । शेषा हि निर्दया प्रज्ञा, कर्मोपार्जनकारिणी ॥३॥ त. श्लो० २५९
जीवन्ति शतशः प्राज्ञाः, प्रज्ञया वित्तसङ्क्षये । न हि प्रज्ञाक्षये कश्चिद् वित्ते सत्यपि जीवति ॥४॥ ध. प्र. प,१८ आ. स०
अभ्यासेन क्रियाः सर्वा, अभ्यासात् सकलाःकलाः । अभ्यासाद् ध्यानमौनादि, किमभ्यासस्य दुष्करम् ॥५॥ श्रा. पृ.३८
यस्य नास्ति स्वयं प्रज्ञा, शास्त्रं तस्य करोति किम्? । लोचनाभ्यां विहीनस्य, दर्पणः किं करिष्यति ? ॥६॥ चा.अ.१० श्लो.९
न निर्मिता केन न दृष्टपूर्वा, न श्रूयते हेममयी कुरङ्गी । तथाऽपि तृष्णा रघुनन्दनस्य, विनाशकाले विपरीतबुद्धिः ॥७॥
असम्भवं हेममृगस्य जन्म, तथाऽपि रामो लुलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले, धियोऽपि पुंसां मलिनी भवन्ति ॥ ८ ॥ हितोपदेश, मित्रलाभ श्लो. २८
शुश्रूषा श्रवणं चैव, ग्रहणं धारणं तथा । ऊहाऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥९॥ यो. पृ० ५३ (प्र० स०)

९९ विद्या

गतेऽपि वयसि ग्राह्या, विद्या सर्वात्मना भृशम् । यदीह फलदा न स्यात् , सुलभा साऽन्यजन्मनि ॥ १ ॥
सन्तोषस्त्रिषु कर्तव्यः, स्वदारे भोजने धने । त्रिषु चैव न कर्तव्यो, दाने चाध्ययने तपे ॥ २ ॥
आरोग्यबुद्धिविनयोद्यमशास्त्ररागाः, पञ्चान्तराः पठनसिद्धगुणा भवन्ति ।
आचार्यपुस्तकनिवाससहायद्रव्यं, बाह्याश्च पञ्च पठनं परिवर्द्धयन्ति ॥ ३ ॥

अलसो मन्दबुद्धिश्च, सुखितो व्याधितस्तथा । निद्रालु कामुकश्चेति, षडेते शास्त्रवर्जिता' ॥४॥ सू पृ० ३९
विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्त धनं, विद्या भोगकरी यश'सुखकरी विद्या गुरूणां गुरु ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं, विद्या राजसु पूजिता न हि धनं विद्याविहीनः पशु' ॥ ५ ॥
जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स ।
एवं खु नाणी चरणेन हीणो, नाणस्स भागी न हु सुग्गईए ॥ ६ ॥ सूक्तमुक्तावली पृ० ४०

१०० पुण्यम्

दाने शक्ति श्रुते भक्तिर्गुरूपास्तिर्गुणे रति । दमे मतिर्दयावृत्ति', षडमी सुकृताङ्कुरा. ॥१॥ सू० पृ ४१, श्लो. ४४०
जैनो धर्म कुले जन्म, शुभ्रा कीर्ति शुभा मति । गुणे राग' श्रियां त्याग', पूर्वपुण्यैरवाप्यते ॥२॥ सू० श्लो ४९१
जैनो धर्म' प्रकटविभव' सङ्गति साधुलोके, विद्वद्गोष्ठिर्वचनपटुता कौशलं सत्क्रियासु ॥
साध्वी लक्ष्मीश्चरणकमलोपासनं सद्गुरूणां, शुद्धं शीलं सुमतिरमला प्राप्यते नाल्पपुण्यैः ॥ ३॥ सू० पृ. २, श्लो. ९

१०१ पापम्

भवेयु' प्राणिन' पापात्, कासश्वासज्वरादय' । सखायोऽपि कदर्याश्च, नागश्रीव महीतले ॥१॥ हिं० पा० श्लो. १
हिंसाऽनृतादय पञ्च, तत्त्वाश्रद्धानमेव च । क्रोधादयश्च चत्वार इति पापस्य हेतवः ॥ २ ॥

विपरीतास्तु धर्मस्य, एत एवोदिता बुधैः । एतेषु सततं यत्नः, सम्यकार्यः सुखैषिणा ॥ ३ ॥ शास्त्र० श्लो. ४–५
अत्युग्रपुण्यपापानामिहैव फलमाप्यते । त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ॥ ४ ॥ सू० अ० श्लो. ५

१०२ आश्रवः

मनोवाक्कायकर्माणि, योगाः कर्म शुभाशुभम् । यदाश्रवन्ति जन्तूनामाश्रवास्तेन कीर्तिताः ॥१॥ यो० प्र० श्लो. ७४
कषाया विषया योगाः प्रमादाविरती तथा । मिथ्यात्वमार्तरौद्रे चेत्यशुभं प्रतिहेतवः ॥२॥ यो० प्र० ४, श्लो. ७८

१०३ संवरः

सर्वेषामाश्रवाणां तु, निरोधः संवरः स्मृतः । स पुनर्भिद्यते द्वेधा, द्रव्यभावविभेदतः ॥ १ ॥ यो० प्र० श्लो. ७९
यः कर्मपुद्गलादानच्छेदः स द्रव्यसंवरः । भवहेतुक्रियात्यागः स पुनर्भावसंवरः ॥ ३ ॥ यो० प्र० ४ श्लो. ८०

१०४ निर्जरा

सदोषमपि दीप्तेन, सुवर्णं वह्निना यथा । तपोऽग्निना तप्यमानस्तथा जीवो विशुध्यति ॥ १ ॥ यो. प्र. ४ श्लो. ८८
ज्ञेया सकामा यमिनामकामा त्वन्यदेहिनाम् । कर्मणां फलवत् पाको यदुपायात् स्वतोऽपि हि ॥२॥ यो. प्र. ४ श्लो.८७
संसारबीजभूतानां, कर्मणां जरणादिह । निर्जरा सा स्मृता द्वेधा, सकामा कामवर्जिता ॥३॥ यो० प्र० ४ श्लो. ८६
अकामनिर्जरारूपात्, पुण्याज्जन्तोः प्रजायते । स्थावरत्वात् त्रसत्वं वा, तिर्यक्त्वं वा कथञ्चन ॥५॥ यो. प्र. श्लो. १०७

शम नयति भूतानि, य शक्तो देशनाविधौ । द्रव्यादिलब्धियुक्तो य , श्रत्यह तस्य निर्जरा ॥ ६ ॥ त. श्लो २६४

१०५ बन्ध

सकषायतया जीन , कर्मयोग्यास्तु पुद्गलान् । यदादत्ते स बन्ध स्याज्जीवास्वात न्त्र्यकारणम् ॥१॥ यो. पृ ३८ श्लो ५९
सवरस्तन्निरोधेन, तथा जीवस्य कर्मणा । य सम्बन्धस्तयोरैक्यं, स बन्धस्तत् प्रकीर्तित ॥२॥ पा सर्ग ३, श्लो १०५६

१०६ विनय:

विणओ सासणे मूल, विणओ सजओ भवे । विणयाओ विप्पमुक्कस्स, कओ धम्मो कओ तवो ? ॥१॥ सु श्लो ९७
विनयफल शुश्रूषा गुरुशुश्रूषा फल श्रुतज्ञानम् । ज्ञानस्य फल विरतिविरतिफल चाश्रवनिरोध ॥ २ ॥
सवरफल तपो बलमथ तपसो निर्जराफल दृष्टम् । तस्मात् क्रियानिवृत्ति क्रियानिवृत्तेरयोगित्वम् ॥ ३ ॥
योगनिरोधाद् भवसन्ततिक्षयस्सन्ततिक्षयान्मोक्ष । तस्मात् कल्याणाना सर्वेषा भाजन विनय ॥ ४ ॥ प्र. श्लो ७२ ७३-७४

१०७ स्वाध्याय:

स्वध्यायगुणने यत्न , सदा कार्यो मनीषिभि । कोटिदानादपि श्रेष्ठ, स्वाध्यायस्य फल यत ॥१॥ उ प.१५ श्लो ९
स्वाध्याय पञ्चधा ज्ञेयो, वाचना पृच्छना तथा । परावृत्तिरनुप्रेक्षा, धर्मसम्बन्धिनी कथा ॥२॥ उ प १५ श्लो.५
वाचना तु गुरूपान्ते ऽध्ययन विनयेन यत् । प्रच्छनाऽधीतशास्त्रान्तर्गत सशयनिर्णय ॥३॥ उ प.१५ श्लो ६

परावृत्तिः पुराधीतागमोच्चार पुनः पुनः । तद्विचारस्त्वनुप्रेक्षा, व्याख्या धर्मकथा भवेत् ॥४॥ उ. प.१५ श्लो. ६
श्रमणैः श्रावकैश्चापि, क्रियाकरणतत्परैः । चतुर्वारं विधातव्यः, स्वाध्यायोऽयमहर्निशम् ॥५॥ उ. प. १५ श्लो. ८

१०८ आत्मभेदाः

बहिर्भावानतिक्रम्य, यस्याऽऽत्मन्याऽऽत्मनिश्चयः । सोऽन्तरात्मा मतस्तज्ज्ञैः, विभ्रमध्वान्तभास्करैः ॥ १ ॥
आत्मबुद्धिः शरीरादौ, यस्य स्यादात्मविभ्रमात् । बहिरात्मा स विज्ञेयो मोहनिद्राऽस्तचेतनः ॥ २ ॥
आत्मधिया समुपात्तः कायादिः कीर्त्यतेऽत्र बहिरात्मा । कायादिः समधिष्ठायको भवत्यन्तरात्मा तु ॥३॥ यो. प्र.१२ श्लो.१
चिद्रूपानन्दमयो निःशेषोपाधिवर्जितः शुद्धः । अत्यक्षोऽनन्तगुणः, परमात्मा कीर्तितस्तज्ज्ञैः ॥४॥ यो. प्र. ७ श्लो. ८
निर्लेपो निष्कलङ्कः शुद्धो निष्पन्नोऽत्यन्तनिवृत्तः । निर्विकल्पश्च शुद्धात्मा, परमात्मेति निर्णितः ॥ ५ ॥

१०९ नमिपव्वज्जा

किण्णु भो अज्ज मिहिलाए कोलाहलगसंकुला । सुण्णन्ति दारुणा सद्दा पासाएसु गिहेसु य ॥ १ ॥
मिहिलाए चेइए वच्छे सीयच्छाए मणोरमे । पत्तपुप्फलोवेए बहूणं बहुगुणे सया ॥ २ ॥
वाएण हीरमाणंमि, चेइयंमि मणोरमे । दुहिया असरणा अत्ता एए कन्दन्ति भो खगा ॥ ३ ॥
सुहं वसामो जीवामो, जेसि मो नत्थि किंचण । मिहिलाए डज्झमाणीए न मे डज्झइ किंचण ॥ ४ ॥

पत्तपुत्तकलत्तास निव्वावारस्स भिक्खुणो । पियं न विज्जई किंचि अप्पियंपि न विज्जई ॥ ५ ॥
पागारं कारइत्ताणं गोपुरट्टालगाणि य । उस्सूलए सयग्घी य तओ गच्छसि खत्तिया ॥ ६ ॥
सद्धं नगरं किच्चा तवसंवरमग्गलं । खंती निउणपागारं, तिगुत्तं दुप्पधंसयं ॥ ७ ॥
धणुं परक्कमं किच्चा, जीवं च इरियं सया । धिइं च केयणं किच्चा, सच्चेण पलिमन्थए ॥ ८ ॥
तवनारायजुत्तेण, भेत्तूणं कम्मकंचुयं । मुणी विगयसंगामो, भवाओ परिमुच्चति ॥ ९ ॥
जो सहस्सं सहस्साणं, संगामे दुज्जए जिणे । एगं जिणेज्ज अप्पाणं एस मे परमो जओ ॥ १० ॥
अप्पाणमेव जुज्झाहि किं ते जुज्झेण बज्झओ । अप्पाणमेवमप्पाणं जिणित्ता सुहमेहति ॥ ११ ॥
पंचिन्दियाणि कोहं, माणं मायं तहेव लोहं च । दुज्जयं चेव अप्पाणं, सव्वं अप्पे जिए जियं ॥ १२ ॥
मासे मासे तु जो बालो, कुसग्गेण तु भुंजइ । न सो सुक्खायस्स धम्मस्स, कलं अग्घइ सोलसिं ॥१३॥ उ० नवमाध्य०

११० केसिगोयमीयसंवाद

अणेगाणं सहस्साणं मज्झे चिट्ठसि गोयमा । ते अ ते अभिगच्छन्ति कहं ते निज्जिया तुमे ॥ १ ॥
एगे जिए जिया पंच, पंच जिए जिया दस । दसहा उ जिणित्ताणं, सव्वसत्तू जिणामहं ॥ २ ॥
एगप्पा अजिए सत्तू, कसाया इंदियाणि य । ते जिणित्तु जहानायं, विहरामि अहं मुणी ॥ ३ ॥
दीसंति बहवे लोए, पासबद्धा सरीरिणो । मुक्कपासो लहुब्भूओ, कहं तं विहरसी मुणि ॥ ४ ॥

ते पासे सव्वसो छित्ता, निहन्तूण उवायओ । मुक्कपासो लहुब्भूओ, विहरामि अहं मुणी ॥ ५ ॥
रागद्दोसादओ तिव्वा, नेहपासा भयंकरा । ते छिंदितु जहानायं, विहरामि जहक्कम्मं ॥ ६ ॥
अंतो हिअयसंभूया लया चिट्ठइ गोयमा । फलेइ विसभक्खीणं सा उ उद्धरिया कहं ॥ ७ ॥
तं लयं सव्वसो छित्ता उद्धरित्ता समूलियं । विहरामि जहानायं मुक्कोमि विसभक्खणं ॥ ८ ॥
भवतण्हा लया वुत्ता भीमा भीमफलोदया । तमुच्छित्तु जहानायं विहरामि महामुणी ॥ ९ ॥
संपज्जलिया घोरा, अग्गी चिट्ठइ गोयमा । जे डहंति सरीरत्था कहं विज्झाविया तुमे ॥ १० ॥
महामेहप्पसूयाओ गिज्झ वारि जलुत्तमं । सिंचामि सययं तेउ, सित्ता नो व डहंति मे ॥ ११ ॥
कसाया अग्गिणो वुत्ता सुयसीलतवो जलं । सुयधाराभिहया संता भिन्न हु न दहंति मे ॥ १२ ॥
अयं साहस्सिओ भीमो, दुट्ठस्सो परिधावइ । जंसि गोयम आरूढो, कहं तेण न हीरासि ॥ १३ ॥
अत्थि एगो महादीवो, वारिमज्झे महालओ । महाउदगवेगस्स, गई तत्थ न विज्जई ॥ १४ ॥
जरामरणवेगेणं वुज्झमाणाण पाणिणं । धम्मो दीवो पइट्ठा य गई सरणमुत्तमं ॥ १५ ॥
अण्णवंसि महोहंसी, नावा, विपरिधावई । जंसि गोयम मारूढो, कहं पारं गमिस्ससि ॥ १६ ॥
जा उ अस्साविणी नावा न सा पारस्स गामिणी । जा निरस्साविणी नावा, सा उ पारस्स गामिणी ॥ १७ ॥
सरीरमाहु नावत्ति, जीवो वुच्चइ नाविओ । संसारो अण्णवो वुत्तो, जं तरन्ति महेसिणो ॥ १८ ॥
अन्धयारे तमोघोरे, चिट्ठन्ति पाणिणो बहु । को करिस्सइ उज्जोयं, सव्वलोगंमि पाणिणं ॥१९ ॥

उग्गओ विमलो भाणू सव्वलोयपभकरो । सो करीस्सइ उज्जोय सव्वलोगमि पाणिण ॥ ३० ॥
उग्गयो खीणससारो सव्वन्नू जिणभक्खरो । सो करिस्सइ उज्जोय सव्वलोगमि पाणिणं ॥ २१ ॥
सारीरमाणसे दुक्खे बज्झमाणाण पाणिण । खेम सिवमणाबाह ठाण, किं मन्नसि मुणी ॥२२ ॥
अत्थि एगं धुव ठाण लोगग्गमि दुरारुह । जत्थ नत्थि जरा मच्चू वाहिणो वेयणा तहा ॥ २३ ॥
निव्वणिति अवाहति सिद्धीलग्गमेव य । खेम सिव अणाबाह, ज तरन्ति महेसिणो ॥ २४ ॥
तं ठाण सासयं वास लोगग्गमि दुरारुहं । ज सपत्ता न सोयन्ति, भवोहन्तकरा मुणी ॥ २५ ॥ उ० त्र०

१११ नवकारसूत्रम्

जिणसासणस्स सारो, चउदसपुव्वाण जो समुद्धारो । जस्स मणे नवकारो, ससारो तस्स किं कुणइ ॥ १ ॥
हिंसावाननृतप्रिय परधनहर्ता परस्त्रीरत'। किं चान्येष्वपि लोकगर्हितमहापापेषु गाढोद्यत' ।
मन्त्रेश स यदि स्मरेदविरत प्राणात्यये सर्वथा, दुष्कर्मार्जितदुर्गदुर्गतिरपि स्वर्गीभवेन्मानव' ॥ २ ॥
नवकार इक्कअक्खर पाव फेडेइ सत्त अयराण । पन्नास च पएण पचसयाइ समग्गेण ॥ ३ ॥
जो गुणइ लक्खमेग पूएइ विहीइ जिणनमुक्कार । तित्थयरनामगोत्त सो बधइ नत्थि संदेहो ॥ ४ ॥
अट्ठेव य अट्ठसया, अट्ठसहस्स च अट्ठकोडीओ । जो गुणइ भत्तिजुत्तो, सो पावइ सासय ठाण ॥ ५॥ स्था० पृ ५१

११२ ज्ञान क्रिययोः सापेक्षता

हयं नाणं कियाहीणं, हया अन्नाणओ क्रिया । पासंतो पंगुलो दड्ढो, धावमाणो अ अंधओ ॥ १ ॥
संजोगसिद्धीइ फलं वयंति, न हु एगचक्केण रहो पयाइ ।
अंधो य पंगू य वणे समिद्धा, ते संपउत्ता नगरं पविट्ठा ॥ २ ॥ आवश्यक नि० गा० १०२
आसन्नसिद्धिआण विहिपरिणामो होइ उ सयकालं । विहिचाओ अविहि भत्ती अभव्वजिअ दूरभव्वाणं ॥ ४ ॥
तित्थयरत्तं संमत्तं खाइअं सत्तमीइ तइआए । आउं वंदणएणं बद्धं च दसारसीहेण ॥ ५ ॥

११३ क्रिया

ज्ञानी क्रियापरः शान्तो भावितात्मा जितेन्द्रियः । स्वयं तीर्णो भवाम्भोधेः परांस्तारयितुं क्षमः ॥ १ ॥
क्रियाविरहितं हन्त ! ज्ञानमात्रमनर्थकम् । गतिं विना पथज्ञोऽपि नाप्नोति पुरमीप्सितम् ॥ २ ॥
स्वानुकूलां क्रियां काले, ज्ञानपूर्णोऽप्यपेक्षते । प्रदीपः स्वप्रकाशोऽपि, तैलपूर्त्यादिकं यथा ॥ ३ ॥
बाह्यभावं पुरस्कृत्य, ये क्रियाव्यवहारतः । वदने कवलक्षेपं, विना ते तृप्तिकाङ्क्षिणः ॥ ४ ॥
गुणवद्बहुमानादेर्नित्यस्मृत्या च सत्क्रिया । जातं न पातयेद्भावमजातं जनयेदपि ॥ ५ ॥
क्षायोपशमिके, भावे या क्रिया क्रियते तया । पतितस्यापि तद्भावप्रवृद्धिर्जायते पुनः ॥ ६ ॥
गुणवृद्ध्यै ततः कुर्यात् क्रियामस्खलनाय वा । एकं तु संयमस्थानं जिनानामवतिष्ठते ॥ ७ ॥

रगोऽनुष्ठानतोऽसङ्गक्रियासङ्गतिमङ्गति । सेय नानक्रियाभेदभूमिरानन्दपिच्छरा ॥ ८ ॥ यशोविजयविरचित ज्ञा०

११४ प्रायश्चित्तम्

मनोवच कायवशादुपागतो निशोध्यते येन मलो मनीषिभि ।
श्रुतानुरूप मलशोधन तपो विधीयते तद् व्रतशुद्धिहेतवे ॥ १ ॥ सुभाषितरत्नसन्दोहश्लो० ८८७
प्रतिसवत्सरं ग्राह्य, प्रायश्चित्त गुरो पुर । शोध्यमानो भवेदात्मा, येनादर्श इवोज्ज्वल ॥२॥ ध० पृ० ५ श्लो ७५

११५ प्रतिक्रमणम्

अघनिष्क्रमण भावद्विषदाक्रमण च सुकृतसक्रमणम् । मुक्तेः क्रमण कुर्याद् द्वि प्रतिदिवस प्रतिक्रमणम् ॥ १ ॥
पडिसिद्धाण करणे किच्चाणमकरणे अ पडिकमण । असद्दहणे अ तहा विवरीयपरूवणाए अ ॥ २ ॥

११६ सदनुष्ठानाधिकारः

विष गरोऽननुष्ठान तद्धेतुरमृत वरम् । गुरुसेवाद्यनुष्ठान, इति पञ्चविध जगु ॥ १ ॥
आहारोपधिपूजर्द्धिप्रभृत्याशंसया कृतम् । शीघ्र सचित्तहन्तत्वाद् विषानुष्ठानमुच्यते ॥ २ ॥
दिव्यभोगाभिलापेण, कालान्तरपरिक्षयात् । स्वादृष्टफलसपूर्तेर्गरानुष्ठानमुच्यते ॥ ३ ॥
प्रणिधानाद्यभावेन कर्माऽनध्यवसायिन । सम्मूर्च्छिमप्रवृत्त्योपममननुष्ठानमुच्यते ॥४॥

सदनुष्ठानरागेण तद्धेतुमार्गगामिनाम् । एतच्चचरमावर्तेऽनाभोगादेर्विना भवेत् ॥ ५ ॥
धर्मयौवनकालोऽयं भवबालदशा परा । अत्र स्याव् सत्क्रियारागोऽन्यत्र चाऽसत्क्रियादरः ॥ ६ ॥
जैनीमाज्ञां पुरस्कृत्य प्रवृत्तं चित्तशुद्धितः । संवेगगर्भमन्यन्तममृतं तद्विदो विदुः ॥ ७ ॥

११७ जिनपूजा

स्वर्गस्तस्य गृहांगणं सहचरी साम्राज्यलक्ष्मीः शुभा । सौभाग्यादि गुणावलिर्विलसति स्वैरं वपुर्वेश्मनि ।
संसारः सुतरः शिवं करतलक्रोडे लुठत्यंजसा, यः श्रद्धाभरभाजनं जिनपतेः पूजां विधत्ते जनः ॥ १ ॥
तवनियमेण य मुक्खो, दाणेण य हुंति उत्तमा भोगा । देवच्चणेण रज्जं, अणसणमरणेण इंदत्तं ॥ २ ॥
यास्याम्यायतनं जिनस्य लभते ध्यायंश्चतुर्थं फलं, षष्ठं चोत्थितमुद्यतोऽष्टमपथो गंतुं प्रवृत्तोऽध्वनि ।
श्रद्धालुर्दशमं बहिर्जिनगृहात् प्राप्तस्ततो द्वादशं, मध्ये पाक्षिकमीक्षिते जिनपतौ मासोपवासं फलम् ॥ ३ ॥
सयं पमज्जने पुण्णं सहस्सं च विलेवणे । सयसहस्सिआ माला अणंतं गीयवाइए ॥ ४ ॥
पापं लुम्पति दुर्गतिं दलयति व्यापादयत्यापदम् । पुण्यं संचिनुते श्रियं वितनुते पुष्णाति नीरोगताम् ।
वैराग्यं विदधाति पल्लवयति प्रीतिं प्रसूते यशः, स्वर्गं यच्छति निर्वृतिं च रचयत्यर्चाऽर्हतां निर्मिता ॥ ५ ॥
नौरेषा भववारिधौ शिवपदप्रासादनिःश्रेणिका, मार्गः स्वर्गपुरस्य दुर्गतिपुरद्वारप्रवेशार्गला ।
कर्मग्रन्थिशिलोच्चयस्य दलने दम्भोलिधारासमा, कल्याणैकनिकेतनं निगदिता पूजा जिनानां परा ॥६॥ पृ.५० श्लो.१७-१८

प्रविश्य विधिना तत्र त्रि प्रदक्षिणयेज्जिनम् । पुष्पादिभिस्तमभ्यर्च्य स्तवनैस्तमै स्तुयात् ॥७॥ यो प्र ३ श्लो ११३
धूप दहति पापानि दीपो मृत्युनिनाशन. । नैवेद्यैर्विपुल राज्य, प्रदिक्षणा शिवप्रदा ॥ ८ ॥ उ पृ १८८
पुष्पादिपूजा तदाज्ञा च तद्द्रव्यपरिरक्षण । उत्सवतीर्थयात्रा च भक्ति. पञ्चधा जिने ॥ ९ ॥

११८ आसन्नसिद्धिजीवलक्षणानि

ससारचारए चारए्व, आवीलियस्स बधेहिं । उव्विग्गों जस्स मणो, सो किर आसन्नसिद्धिपहो ॥ १ ॥
आसन्नकालभवसिद्धियस्स, जीवस्स लख्खण इणमो । विसयसुहेसु न रज्जइ, सव्वत्थामेसु उज्जमइ ॥ २॥ धर्म० उ०

११९ भावपूजा

दयाम्भसा कृतस्नान , सन्तोषशुभवस्त्रभृत् । विवेकतिलकभ्राजी भावनापावनाशय. ॥ १ ॥
भक्तिश्रद्धानघुसृणोन्मिश्रकश्मीरजद्रवै । नवब्रह्मागतो देव शुद्धमात्मानमर्चय ॥ २ ॥
क्षमापुष्पस्रज धर्मयुग्मक्षौमद्वय तथा । ध्यानाभरणसार च तदङ्गे विनिवेशय ॥ ३ ॥
मदस्थानभिदात्यागैर्लिखाग्रे चाष्टमङ्गलीम् । ज्ञानाग्नौ शुभसङ्कल्पकाकतुण्ड च धूपय ॥ ४ ॥
प्राग्धर्मलवणोत्तार धर्मसन्यासवह्निना । कुर्वन् पूरय सामर्थ्यराजन्नीराजनाविधिम् ॥ ५ ॥
स्फुर मङ्गलदीप च स्थापयानुभव पुर । योगनृत्यपर(स्तु)स्तौर्यत्रिकसयमवान् भव ॥ ६ ॥
उल्लसन्मनस सत्यघण्टा वादयतस्तव । भावपूजारतस्येत्थ करक्रोडे महोदय ॥ ७ ॥

द्रव्यपूजोचिता भेदोपासना गृहमेधिनाम् । भावपूजा तु साधुनामभेदोपासनात्मिका ॥ ८ ॥ वा. ज्ञा.

१२० जिनाज्ञा

आणाइ तवो आणाइ संजमो तह य दाणमाणाए । आणारहिओ धम्मो पलालपुलुव्व पडिहाइ ॥ १ ॥
एगो साहु एगा साहुणी सावओ वा सड्ढी वा । आणाजुत्तो संघो सेसो पुण अट्ठीसंघाओ ॥ २ ॥
सो हु तवो कायव्वो जेण मणो मंगुलं न चिंतेइ । जेण न इंदियहाणी जेण य जोगा न हायंति ॥३॥ सु. पृ.६३-६४
आ कालामियमाज्ञा ते हेयोपादेयगोचरा । आश्रवः सर्वथा हेयः उपादेयश्च संवरः ॥ ४॥ वीतरागस्तोत्रम्

१२१ देवद्रव्यम्

जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं । रक्खंतो जिणदव्वं, तित्थयरत्तं लहइ जीवो ॥ १ ॥
जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं । भक्खंतो जिणदव्वं, अणंतसंसारिओ होइ ॥ २ ॥
चेइअदव्वविणासे, रिसिघाए पवयणस्स उड्डाहे । संजइ चउत्थभंगे, मूलग्गी बोहिलाभस्स ॥ ३ ॥

१२२ उपधानम्

उपधानतपो विधिवद् विधाय, धन्यो निधाय निजकण्ठे । द्वेधाऽपि सूत्रमालां द्वेधाऽपि शिवश्रियं श्रयति ॥१॥
मुक्तिकनीवरमाला, सुकृतजलाकर्षणे घटीमाला । साक्षादिव गुणमाला, माला परिधीयते धन्यैः ॥२॥ सु. पृ. २५२

१२३ उद्यापनम्

लक्ष्मी कृतार्था सफल तपोऽपि, ध्यान सदोच्चैर्जनबोधिलाभ' ।
जिनस्य भक्तिर्जिनशासने श्री गुणा' स्युरुद्यापनतो नराणाम् ॥ १ ॥
उद्यापन यत्तपस' समर्थने, तच्चैत्यमौलौ कलशाधिरोपणम् । फलोपरोपोऽक्षतपात्रमस्तके, ताम्बुलदान कृतभोजनोपरि ॥२॥

१२४ तीर्थम्

एकाहारी भूमिसस्तारकारी, पद्भ्या चारी शुद्धसम्यक्त्वधारी ।
यात्राकाले सर्वसचित्तहारी, पुण्यात्मा स्याद् ब्रह्मचारी विवेकी ॥ १ ॥ उपदेशतरङ्गिणी पृ० २४३ (य वि ग्र)
मनोविशुद्धं पुरुषस्य तीर्थं, वाक्सयमश्चेन्द्रियनिग्रहश्च । त्रीण्येव तीर्थानि शरीरभाजा, स्वर्गं च मोक्ष च निदर्शयन्ति॥२॥
आरम्भाणा निवृत्तिर्विणसफलता सङ्घवात्सल्यमुच्चै-र्नैर्मल्य दर्शनस्य प्रणयिजनहित जीर्णचैत्यादिकृत्यम् ।
तीर्थोन्नत्य च सम्यग् जिनवचनकृतिस्तीर्थसत्कर्मकत्व, सिद्धेरासन्नभाव' सुरनरपदवी तीर्थयात्रा फलानि ॥३॥ उ पृ २४२
श्रीतीर्थपान्थरजसा विरजीभवन्ति, तीर्थेषु विभ्रमणतो न भवे भ्रमन्ति ।
तीर्थव्ययादिह नरा. स्थिरसम्पदः स्यु', पूज्या भवन्ति जगदीशमथार्चयन्त. ॥ ४ ॥ उपदेशतरङ्गिणी पृ १४६

१२५ तीर्थयात्रा

यो दृष्टो दुरित हन्ति, प्रणतो दुर्गतिद्वयम् । सघेशार्हन्त्यपदकृत्, स जीयाद्विमलाचल ॥ १ ॥

शत्रुञ्जये जिने दृष्टे, दुर्गतिद्वितयं क्षिपेत् । सागराणां सहस्रं च, पूजास्नात्रविधानतः ॥ २ ॥
मिथ्यात्वगरलोद्गारः, सम्यग्दृष्टिसुधारसः । पूर्वो ह्रस्वः परो दीर्घो, नाभिनन्दनवन्दने ॥ ३ ॥
सदा शुभध्यान–संसारलक्ष्म्याः, फलं चतुर्धा सुकृतास्तिरुच्चैः ।
तीर्थोन्नतिस्तीर्थकृतां पदाप्तिर्गुणा हि यात्राप्रभवाः स्युरेते ॥ ४ ॥
वपुः पवित्रीकुरु तीर्थयात्रया, चित्तं पवित्रीकुरु धर्मवाञ्छया । वित्तं पवित्रीकुरु पात्रदानतः, कुलं पवित्रीकुरु सच्चरित्रैः॥५॥
एअं जम्मस्स फलं सारं विहवस्स इत्तिअं चेव । जं अच्चिज्जइ गंतुं सित्तुंजे रिसहतित्थयरो ॥ ७ ॥
छट्ठेणं भत्तेणं, अपाणएणं तु सत्त जत्ताओ । जो कुणइ सित्तुंजे सो तइअभवे लहइ सिद्धिं ॥८॥ सूक्त. पृ० ५१-५२

१२६ संघः

रत्नानामिव रोहणः क्षितिधरः खं तारकाणामिव, स्वर्गः कल्पमहीरुहामिव सरः पङ्केरुहाणामिव ।
पाथोधिः पयसां शशीव महसां स्थानं गुणानाममा–मित्यालोच्य विरच्यतां भगवतः सङ्घस्य पूजाविधिः ॥ १ ॥
कदा किल भविष्यन्ति मद्गृहाङ्गणभूमयः । श्री सङ्घचरणाम्भोजरजोराजिपवित्रिताः ॥ २ ॥
यः संसार निरासलालसमतिर्मुक्त्यर्थमुत्तिष्ठते, यं तीर्थं कथयन्ति पावनतया येनास्ति नान्यः समः ।
यस्मै तीर्थपतिर्नमस्यति सतां यस्माच्छुभं जायते, स्फूर्तिर्यस्य परा वसन्ति च गुणा यस्मिन् स सङ्घोऽर्च्यताम् ॥३॥

१२७ तीर्थंकरनामकर्मबन्धभावना

मोहान्धकारगहने, संसारे दुःखिता वत । सत्त्वाः परिभ्रमन्त्युच्चैः, सत्यस्मिन् धर्मतेजसि ॥ १ ॥
अहमेतानतः कृच्छ्रात्, यथायोगं कथंचन । अनेनोत्तारयामीति, वरबोधिसमन्वितः ॥ २ ॥
तत्तत्कल्याणयोगेन, कुर्वन् सत्त्वार्थमेव सः । तीर्थकृत्वमवाप्नोति, परं सत्त्वार्थसाधनम् ॥ ३ ॥
चिन्तयत्येनमेवैतत्स्वजनादिगतं तु यः । तथानुष्ठानतः सोऽपि, धीमान् गणधरो भवेत् ॥ ४ ॥
संविग्नो भवनिर्वेदात्मनिःसरणं तु यः । आत्मार्थसंप्रवृत्तोऽसौ, सदा स्यान्मुण्डकेवली ॥ ५ ॥ प० पृ० १४७ गा० १९

१२८ शासनप्रभावकत्वं

दिदृक्षुर्भिक्षुरेकोऽस्ति, वारितो द्वारि तिष्ठति । हस्तन्यस्तचतुःश्लोको, किं वाऽऽगच्छतु गच्छतु ॥ १ ॥
दीयतां दशलक्षाणि, शासनानि चतुर्दश । हस्तन्यस्तचतुःश्लोको, यद्वाऽऽगच्छतु गच्छतु ॥ २ ॥
अपूर्वेयं धनुर्विद्या, भवता शिक्षिता कुतः । मार्गणौघः समभ्येति, गुणो याति दिगन्तरम् ॥ ३ ॥
सर्वदा सर्वदोऽसीति, मिथ्या संस्तूयसे बुधैः । नाऽरयो लेभिरे पृष्ठं, न वक्षः परयोषितः ॥ ४ ॥
आहते तव निःस्वाने, स्फुटितं रिपुहृद्घटैः । गलिते तत्प्रियानेत्रे, राजन्! चित्रमिदं महत् ॥ ५ ॥
सरस्वती स्थिता वक्त्रे, लक्ष्मीः करसरोरुहे । कीर्तिः किं कुपिता राजन्! येन देशान्तरं गता ॥६॥ सु पृ १९६–१९७

१२९ लेश्या

कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः। स्फटिकस्येव तत्राऽयं, लेश्याशब्दः प्रवर्तते ॥१॥ यो. प्र. ४ श्लो०४४
ताः कृष्णनीलकपिततैजसपद्मशुक्लनामानः। श्लेष इव वर्णबन्धस्य, कर्मबन्धस्थितिविधात्र्यः ॥२॥ यो.प्र.४ श्लो० ४४
अतिरौद्रः सदा क्रोधी, मत्सरी धर्मवर्जितः। निर्दयो वैरसंयुक्तः कृष्णलेश्याधिको नरः ॥३॥ उ० भा० ४ पृ० ९०
अलसो मन्दबुद्धिश्च स्त्रीलुब्धः परवञ्चकः। कातरश्च सदा मानी, नीललेश्याधिको भवेत् ॥४॥ उ० भा. ४ पृ० ९०
विद्यावान् करुणायुक्तः, कार्याकार्यविचारकः। लाभालाभे सदा प्रीतः, पीतलेश्याऽधिको नरः॥५॥उ.भा० ४ पृ० ९१
क्षमावांश्च सदा त्यागी, देवार्चनरतो यमी। शुचीभूतः सदाऽऽनन्दी, पद्मलेश्याऽधिको भवेत् ॥६॥ उ.भा०४ पृ० ९१
रागद्वेषविनिर्मुक्तः, शोकनिन्दाविवर्जितः। परमात्मत्वसंपन्नः, शुक्ललेश्यो भवेन्नरः ॥ ७ ॥ उ० भा० ४ पृ० ९१
यादृशी जायते लेश्या, समयेऽन्त्ये शरीरिणः। तादृश्येव भवेल्लेश्या, प्रायस्तस्यान्यजन्मनि ॥८॥ भ० पृ० ५

१३० मनःशुद्धिः

दानं पूजा तपश्चैव, तीर्थसेवा श्रुतं तथा। सर्वमेव वृथा तस्य यस्य शुद्धं न मानसम् ॥ १ ॥ धर्म० पृ. ३, श्लो० ८१
सर्वाः संपत्तयस्तस्य, विशुद्धं यस्य मानसम्। उपानद्गूढपादस्य, ननु चर्मावृतेव भूः ॥ २ ॥ मु० पृ. २०४ श्लो. ७
मनःशुद्धिमबिभ्राणा ये तपस्यन्ति मुक्तये। त्यक्त्वा नावं भुजाभ्यां ते, तितीर्षन्ति महार्णवम् ॥३॥ यो. श्लो. ४२
सत्येन शुध्यते वाणी, मनो ज्ञानेन शुध्यति। गुरुशुश्रूषया कायः, शुद्धिरेषा सनातनी ॥ ४ ॥ त० श्लो० २२२

मन एव मनुष्याणा, कारण बन्धमोक्षयो' । बन्धस्तु विषयासगे, मुक्तेर्निर्विषय मन ॥ ६ ॥
मणमरणे इंदियमरण, इंदियमरणे मरंति कम्माइ । कम्ममरणेण मुक्खो, तम्हा मणमारण विंति ॥७॥ सु श्लो २४ २५
मन कपिरय विश्वपरिभ्रमणलम्पट । नियन्त्रणीयो यत्नेन, मुक्तिमिच्छुभिरात्मन• ॥ ८ ॥ यो प्र ४ श्लो० ३९
चञ्चल हि मन कृष्ण प्रमाथि बलवद् दृढम् । तस्याह निग्रह मन्ये, वायोरिव सुदुष्करम् ॥ ९ ॥
असशय महाबाहो ! मनो दुर्निग्रह चलम् । अभ्यासेन तु कौन्तेय ! वैराग्येण च गृह्यते ॥१०॥ भ अ ६, श्लो ३४-३५
मन क्षपाचरो भ्राम्यन्नपशङ्क निरङ्कुश• । प्रपातयति ससाराऽऽवर्तगर्ते जगत्त्रयीम् ॥ ११ ॥ यो प्र ४, श्लो ३५

१३१ मनसो भेदा

सुविदितयोगैरिष्ट क्षिप्त मूढ तथैव विक्षिप्तम् । एकाग्र च निरुध, चेत' पञ्चप्रकारमिति ॥ १ ॥
विषयेषु च कल्पितेषु च, पुर स्थितेषु च निवेशित रजसा । सुखदु खयुग्बहिर्मुख–माम्नात क्षिप्तमिह चित्तम् ॥ २ ॥
क्रोधादिभिर्नियमित विरुद्धकृत्येषु यत्तमोभूम्ना । कृत्याकृत्यविभागा–सङ्गतमेतन्मनो मूढम् ॥ ३ ॥
सत्त्वोद्रेकात्परिहृत–दु खनिदानेषु सुखनिदानेषु । शब्दादिषु प्रवृत्त, सदैव चित्त तु विक्षिप्तम् ॥ ४ ॥
अद्वेषादिगुणवतां, नित्य खेदादिदोषपरिहारात् । सदृशप्रत्ययसङ्गतमेकाग्र चित्तमाम्नातम् ॥ ५ ॥
उपरतविकल्पवृत्तिकमवग्रहादिक्रमच्युत शुद्धम् । आत्मारामसुनीना, भवति निरुद्ध सदा चेतः ॥ ६ ॥ अ० प्र०

१३२ आत्मनिन्दा गर्भित–जिन–स्तुतिः

दत्तं न दानं परिशीलितं च, न शालि शीलं न तपोऽभितप्तम् ।
शुभो न भावोऽप्यभवद् भवेऽस्मिन्, विभो ! मया भ्रान्तमहो ! मुधैव ॥ १ ॥
दग्धोऽग्निना क्रोधमयेन दष्टो, दुष्टेन लोभाख्यमहोरगेण ।
ग्रस्तोऽभिमानाजगरेण माया, जालेन बद्धोऽस्मि कथं भजे त्वाम् ? ॥ २ ॥
वैराग्यरङ्गः परवञ्चनाय, धर्मोपदेशो जनरञ्जनाय । वादाय विद्याध्ययनं च मेऽभूत्, कियद् ब्रुवे हास्यकरं स्वमीश ! ॥३॥
परापवादेन मुखं सदोषं, नेत्रं परस्त्रीजनवीक्षणेन । चेतः परापायविचिन्तनेन, कृतं भविष्यामि कथं विभोऽहम् ? ॥४ ॥
आयुर्गलत्याशु न पापबुद्धिर्गतं वयो नो विषयाभिलाषः ।
यत्नश्च भैषज्यविधौ न धर्मे, स्वामिन् ! महामोहविडम्बना मे ॥ ५ ॥
न देवपूजा न च पात्रपूजा, न श्राद्धधर्मश्च न साधुधर्मः ।
लब्ध्वापि मानुष्यमिदं समस्तं, कृतं मयाऽरण्यविलापतुल्यम् ॥ ६ ॥
सद्भोगलीला न च रोगकीला, धनागमो नो निधनागमश्च ।
दारा न कारा नरकस्य चित्ते व्यचिंति नित्यं मयकाऽधमेन ॥ ७ ॥ रत्नाकर०

१३३ लक्ष्मी

दायादा स्पृहयन्ति तस्करगणा मुष्णन्ति भूमिभुजो, गृह्णन्ति छलमाकलय्य हुतभुग् भस्मीकरोति क्षणात् ।
अम्भ प्लावयति क्षितौ विनिहित यक्षा हरन्ति हठात्, दुर्वृत्तास्तनया नयन्ति निधन धिग्बह्वधीन धनम् ॥ १॥ सि
दान भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य । यो न ददाति न भुङ्क्ते, तस्य ततीया गतिर्भवति ॥ २ ॥
दातव्य भोक्तव्यं, सति विभवे सचयो न कर्तव्य । पश्येह मधुकरीणा, सचितमर्थं हरन्त्यन्ये ॥३॥ स. पृ ६५
कीटिकासचित धान्य, मक्षिकासचित मधु, कृपणै सचिता लक्ष्मीरन्यैरेवोपभुज्यते ॥ ४ ॥
कृपणेन समो दाता, न भूतो न भविष्यति । अस्पृशन्नेव स्ववित्त, परेभ्य समयच्छति ॥ ५ ॥ सु पृ २४ श्लो ४,५
आपद्गत किं हससि द्रविणान्धमूढ ! लक्ष्मी' स्थिरा न भवति किमत्रचित्रम् ।
दृष्टं सरव भवति यज्जलयन्त्रमध्ये, रिक्तो भृतश्च भवति भरितश्च रिक्त' ॥ ६ ॥
चत्वारो धनदायादा , धर्माग्निनृपतस्करा । तेषा ज्येष्ठापमानेन, त्रय कुप्यन्ति बान्धवा ॥ ७ ॥

१३४ ज्ञानाचार

बारसविहम्मि (म्मि वि) तवे, सब्भितरबाहिरे कुसलदिट्ठे । न वि अत्थि न वि अ होहि, सज्झायसम तवोकम्म ॥१॥
मणवयणकायगुत्तो, नाणावरण च खवइ अणुसमय । सज्झाए वट्टतो, खणे खणे जाइ वेरग्ग ॥ २ ॥

इगदुतिमासक्खवणं, संवच्छरमवि अणसिओ हुज्जा । सज्झायझाणरहिओ, एगोपवासफलंपि न लभिज्जा ॥ ३ ॥

उग्गमउप्पायणए-सणाहिं सुद्धं च निच्च भुंजंतो । जइ तिविहेणाउत्तो, अणुसमयं भविज्ज सज्झाए ॥ ४ ॥

ता तं गोकस ! एगग्ग—माणसं नेव उवमिउं सक्का । संवच्छरखवणेण वि, जेण तहिं निज्जराऽणंता ॥ ५ ॥

पठनीयं श्रुतं काले, व्याख्यानं पाठनं तथा । आचारः श्रुतधर्मस्य, चाद्यो यल्लिख्यते बुधैः ॥ ६ ॥

उपधानतपस्तप्त्वा, आवश्यकं पठेद्‌गृही । योगैश्चाप्तागमान् साधु—रित्याचारश्चतुर्थकः ॥ ७ ॥

नाध्येतव्यं श्रुतं चोक्त-वर्णैर्न्यूनाधिकादिभिः । व्यञ्जनानिह्नवाह्वोऽय-माचारः पञ्चमः स्तुतः (षष्ठ ईरितः) ॥ ८ ॥

व्यञ्जनभेदतोऽर्थानां, क्रियाणां भेदो जायते । तेनाभावश्च मुक्तेः स्यात्, के के दोषा भवन्ति न ॥ ९ ॥

१३५ दर्शनाचारः

ज्ञानाद्यनन्तसंपूर्णैः, सर्वविद्भिर्यदाहि(दोदि)नम् । तत्तथ्यं दर्शनाचारो, निःशङ्काख्योऽयमादिमः ॥ १ ॥

जिनोक्ततत्त्वसंदेहात्, सा च शङ्काऽभिधीयते । शङ्कातो भिद्यते श्रद्धा, दोषोऽयं स्यान्महांस्ततः ॥ २ ॥

निःकाङ्क्षत्वमनेकेषु, दर्शनेष्वन्यवादिषु । द्वितीयोऽयं दर्शनाचा—रोऽङ्गीकार्यः शुभात्मभिः ॥ ३ ॥

अन्यान्यदर्शनाचारो, न काङ्क्ष्यः क्षुल्लकर्पिवत् । तदेव सत्यं विज्ञेयं, यज्जिनैश्च प्रवेदितम् ॥ ४ ॥

विचिकित्सा ससंदेहा, धर्मक्रिया फलं प्रति । तद्दोषः सर्वथा त्याज्यो, दर्शनाचारचारिभिः ॥ ५ ॥

मिथ्यादृशां तपःपूजा—विद्यामन्त्र प्रभावनम् । दृष्ट्वा मुह्यति यो नैव, सोऽमूढदृष्टिः संमतः ॥ ६ ॥

धर्मोद्योतो महान् यत्र, विहितो जैनशासने । तस्योपबृंहणा कार्या, गुरुभिर्भाविवृद्धये ॥ ७ ॥
सनोऽपि परिणामेन, गुर्वादिष्टक्रियादिषु । स्थिरतापादनं तेषां, सीदतां स्मारणादिभिः ॥ ८ ॥
जिनैः समानधर्माणः, साधर्मिका उदाहृताः । द्विधाऽपि तथा वात्सल्यं, कार्यं तदिति सप्तम ॥ ९ ॥
अइसेसिइड्ढि १ धम्मकही २, वाइ ३ आयरिय ४ खवग ५ नेमित्ती ६ ।
विज्जा ७ रायगणसम्मओ अ ८ तित्थ पभाविंति ॥ १० ॥

१३६ चारित्राचार

याश्च चारित्रपुत्रस्य, मातरोऽष्टौ प्रकीर्तिता । ता एव चरणाचारा समुपास्या मुमुक्षुभि ॥ १ ॥
पणिहाणजोगजुत्तो, पचहिं समिईहिं तिहिं गुत्तीहिं । एस चरित्तायारो, अट्ठविहो होइ नायव्वो ॥ २ ॥
युगमात्रावलोकिन्या, दृष्ट्या सूर्यांशुभासिते । पथि यत्नेन गन्तव्य-मितीर्यासमितिर्भवेत् ॥ ३ ॥
हितं यत् सर्वजीवानां, त्यक्तदोषं मितं वच । तद्धर्महेतोर्वक्तव्यं, भाषासमितिरित्यसौ ॥ ४ ॥
कोहे माणे अ माया य लोभे अ उवउत्तया । हासे भए मोहरीए, विगहासु तहेव य ॥ ५ ॥
सप्तचत्वारिंशता य-द्दोषैस्त्यक्तं वर्जितम् । भोक्तव्यं धर्मयात्रार्थं, सैषणासमितिर्भवेत् ॥ ६ ॥
ग्राह्यं मोच्यं च धर्मोप-करणं प्रत्युपेक्ष्य यत् । प्रमार्ज्य चेयमादान-निक्षेपसमिति स्मृता ॥ ७ ॥
निर्जीवेऽशुषिरे देशे, प्रत्युपेक्ष्य प्रमार्ज्य च । यस्त्यागो मलमूत्रादे, सोत्सर्गसमिति स्मृता ॥ ८ ॥

कल्पनाजालनिर्मुक्तं, सद्भूतवस्तुचिन्तनम् । विधेयं यन्मनःस्थैर्यं, मनोगुप्तिर्भवेत्त्रिधा ॥ ९ ॥
मौनावलम्बनं साधोः, संज्ञादिपरिहारतः । वाग्वृत्तेर्वा निरोधो यः, सा वाग्गुप्तिरिहोदिता ॥ १० ॥
कायगुप्तिर्द्विधा प्रोक्ता, चेष्टानिवृत्तिलक्षणा । यथागमं द्वितीया च, चेष्टानियमलक्षणा ॥ ११ ॥

१३७ वीर्याचारः

वाह्याभ्यन्तरसामर्थ्या—निह्नवेन प्रवर्तनम् । सर्वेषु धर्मकार्येषु, वीर्याचरणमुच्यते ॥ १ ॥
अणिगूहिअवलविरिओ, परकमइ जो जहुत्तमाउत्तो । जुंजइ अ जहाथामं, नायव्वो वीरिआयारो ॥ २ ॥

१३८ तपाचारः

मूलोत्तरगुणश्रेणि—प्राज्यसाम्राज्यसिद्धये । वाह्यमाभ्यन्तरं चेत्थं, तपः कुर्यान्महामुनिः ॥ १ ॥
ज्ञानमेव बुधाः प्राहुः, कर्मणां तापनात्तपः । तदाभ्यन्तरमेवेष्टं, बाह्यं तदुपबृंहकम् ॥ २ ॥
तदेव हि तपः कार्यं, दुर्ध्यानं यत्र भवेत् । येन योगा न हीयन्ते, क्षीयन्ते नेन्द्रियाणि च ॥ ३ ॥
द्वादशधा तपाचारा-स्तपोवद्भिर्निरूपिताः । अनशाद्याः षट् बाह्याः षट्, प्रायश्चित्तादयोऽन्तगाः ॥ ४ ॥
अणसण १ मूणोदरिया २, वित्तिसंखेवणं ३ रसच्चाओ ४ । कायकिलेसो ५ संली—णया ६ य बज्झो तवो होइ ॥५॥
पायच्छित्तं १ विणओ २, वेयावच्चं ३ तहेव सज्झाओ ४ । झाणं ५ उस्सग्गो ६ वि य, अब्भितरओ तवो होइ ॥६॥

अनशन द्विधा प्रोक्त, यावज्जीविकमित्वरम् । द्विघटिकादिक स्वल्पं, चोत्कृष्ट यावदात्मिकम् ॥ ७ ॥
ऊनोदरितपो द्रव्य—भानभेदात्मक परै । विशिष्याज्ञायमानत्वा—न्महाफल निरन्तरम् ॥ ८ ॥
वर्तते ह्यनया वृत्ति–भिक्षाशनजलादिका । तस्या सक्षेपण कार्यं, द्रव्याद्यभिग्रहाश्रितै ॥ १० ॥
विकृतिकृद्रसाना य त्यागो यत्र तपो हि तत् । गुर्वाज्ञा प्राप्य विकृतिं, गृह्णाति निधिपूर्वकम् ॥ ११ ॥
वीरासनादिना क्लेश , कायस्त्यागमयुक्तित । तनुबाधनरूपोऽत्र, विधेयस्तत् तप स्मृतम् ॥ १२ ॥
इन्द्रियादिचतुर्भेदा, सलीनता निगद्यते । बाह्यतपोऽन्तिमो भेद', स्वीकार्य स्कन्दकर्षिवत् ॥ १३ ॥
जबुदीवे जइ हुआ, वालुया ते चेव हुति रयणाइ । दिज्जति सत्तखित्ते, न छुट्टए दिवसपच्छित्त ॥ १४ ॥
जबुदीवे जे हुति, पव्वया ते चेव हुति हेमस्स । दिज्जति सत्तखित्ते, न छुट्टए दिवमपच्छित्त ॥ १५ ॥
गीतार्थादिगुणैर्युक्त, लब्ध्वाऽऽचार्यं विवेकिना । प्रायश्चित्ततपो ग्राह्य, पापफलप्ररोधकम् ॥ १६ ॥
चतुर्धा विनय' प्रोक्त , सम्यग्ज्ञानादिभेदत । धर्मकार्ये नर' सोऽर्हो, विनयाह्वतपोऽन्वित ॥ १७ ॥
यथार्हं तत्प्रतीकारो, व्याधिपरीषहादिषु । वैयावृत्त्य तदुद्भाव्य, विश्रामणाशनादिभि' ॥ १८ ॥
वेयावच्च नियय, करेह उत्तमगुणे धरताण । सव्व किर पडिवाई, वेयावच्चं अपडिवाई ॥ १९ ॥
पडिभग्गस्स मयस्स व, नासइ चरण सुअ अगुणणाए । न हु वेयावच्चच्चिय, असुहोदए नासए कम्म ॥ २० ॥
स्वाध्याय पञ्चधा प्रोक्त , सुमहानिर्जराकर । तप पूर्तिरनेन स्यात् , सर्वोत्कृष्टस्ततो हि स. ॥ २१ ॥
सिद्धा' सिध्यन्ति सेत्स्यन्ति, यावन्त केऽपि मानवा' । ध्यानतपोबलेनैव, सर्वेऽपि (ते) शुभाशया. ॥ २२ ॥

निर्जराकरणे बाह्या—च्छ्रेष्ठमाभ्यन्तरं तपः । तत्राप्येकातपत्रत्वं, ध्यानस्य मुनयो जगुः ॥ २३ ॥
अन्तर्मुहूर्त्तमात्रं य—देकाग्रचित्तताऽन्वितम् । तद्ध्यानं चिरकालानां, कर्मणां क्षयकारणम् ॥ २४ ॥
ध्याता ध्यानं तथा ध्येय—मेकतावगतं त्रयम् । तस्य ह्यनन्यचित्तस्य, सर्वदुःखक्षयो भवेत् ॥ २५ ॥
प्रायो वाङ्मनसोरेव, स्याद्ध्याने हि नियन्त्रणा । कायोत्सर्गे तु कायस्या—प्यतो ध्यानात् फलं महत् ॥ २६ ॥
ऊर्ध्वस्थशयिताद्यैश्च, कायोत्सर्गः क्रियारतैः । एकोनविंशतिदोषै—र्मुक्तः कार्यो यथाविधि ॥ २७ ॥

१३९ प्रव्रज्या

अंतोमुहुत्तमित्तं, विहिणा विहिया करेइ पव्वज्जा । दुक्खाणं पज्जंतं, चिरकालकयाइ किं भणिमो ? ॥ १ ॥
वरं अग्गिम्मि पवेसो, वरं विसुद्धेण कम्मणा मरणं । मा गहियव्वयभंगो, मा जीअं खलियसीलस्स ॥ २ ॥
दीक्षा मोहहरी महोदयकरी दीक्षा त्रिलोकार्चनी, दीक्षा शुद्धिकरी विपादहरणी दीक्षा च शिक्षाऽवनी ॥
दीक्षा श्रीजिनसेविता गुणगणैर्दीक्षा सदा पूरिता । तां श्रीक्षान्तियुतां भवान्तपदवीमाराध्य जग्मुर्जनाः ॥ ३ ॥
मेरुसर्षपयोः यद्वो—त्तनखद्योतपोतयोः । अन्तरं यादृशं तादृ—गनगारिगृहस्थयोः ॥ ४ ॥
निराश्रवं संयममात्मशुध्ध्या, प्रपाल्य चारित्रगुणान्वितः सन् ।
क्षिप्त्वाऽष्टकर्माण्यखिलानि साधु—रुपैति निर्वाणमनन्तसौख्यम् ॥ ५ ॥
पडिलेहणं कुणंतो, मिहो कहं कुणइ जणवयकहं वा । देइ च पच्चक्खाणं, वाएइ सयं पडिच्छइ वा ॥ ६ ॥
पुढवि आउक्काए, तेऊ वाऊ वणस्सइ तसाणं । पडिलेहणापमत्तो, छन्नं पि विराहओ होइ ॥ ७ ॥

समणेण सावएण वा ऽवस्स कायव्व हवइ जम्हा । अतो अहोनिसिस्स य, तम्हा आवस्सयं नाम ॥ ८ ॥
छुहवेयण १ वेयावच्चे २, सजम ३ ज्झाण ४ पाणरक्खणट्ठाए ५। इरिय च विसोहेउ ६, भुजइ नो रूवरसहेउ ॥९॥
अहव न जिमिज्ज रोगे १, मोहुदए २ सयणमाइउवसग्गे। पाणिदया ४ तवहेउ ५, अते तणुमोयणत्थ ६ च ॥१०॥

१४० क्षमाधिकार

गयमेयजमहामुणि–खदगसीसाण साहुचरियाइ । समरतो कह कुप्पसि, इत्तियमित्तेऽवि रे जीव ! ॥ १ ॥
अक्कोसहणणमारण–धम्मब्भसाण बालसुलभाण । लाभ मन्नइ धीरो, जहुत्तराण अभावम्मि ॥ २ ॥
रे जीव सुहदुहेसु, निमित्तमित्त परो जीयाण पि । सकयफल भुजतो, कीस मुहा कुप्पसि परस्स ॥ ३ ॥
पढम चिय त जंतु, कोहग्गी डहइ जत्थ उववज्जे । त(ज)त्थुप्पन्नो त चेव, इंधण धूमकेउ व्व ॥ ४ ॥
रे जीव ! कसायहुआ–सणेण दड्ढे चा(च)रित्तघरसारे । भमिहिसि भवकतारे, दीणमणो दुत्थिउ व्व तुम ॥ ५ ॥
ज अज्जिय चरित्त, देसूणाए वि पुव्वकोडीए । त पि हु कसायमित्तो, हारेइ नरो मुहुत्तेण ॥ ६ ॥
सेयवरो य आस–बरो य बुद्धो अ अहव अन्नो वा । समभावभाविअप्पा, लहेइ मुक्ख न सदेहो ॥ ७ ॥
विकल्पविषयोत्तीर्णः, स्वभावालम्बन सदा । ज्ञानस्य परिपाको य , स शम परिकीर्तित ॥ ८ ॥
सह कलेवर! खेदमचिन्तयन् स्ववशता हि पुनस्तव दुर्लभा । घनतर च सहिष्यसि जीव! हे, परवशो न च तत्र गुणोऽस्ति ते ॥९॥

१४१ विंशतिस्थानकानि

अरिहंत १ सिद्ध २ पवयण ३, गुरु ४ थिविर ५ बहुस्सुए ६ तवस्सीसु ७।
वच्छल्लया य तेसिं, अभिक्खणं नाणोवओगे अ ८ ॥ १ ॥
दंसण ९ विणए १० आव—स्सए ११ य सीलव्वए १२ निरइयारो।
खणलव १३ तव १४ च्चियाए १५, वेयावच्चे १६ समाही १७ य ॥ २ ॥
अपुव्वनाणगहणे १८, सुअभत्ती १९ पवयणे पभावणया २०। एएहिं कारणेहिं, तित्थयरत्तं लहइ जीवो ॥ ३ ॥

१४२ समक्तिलक्षणानि

शमैः शाम्यति क्रोधादीन्, अपकारे महत्यपि। लक्ष्यते तेन सम्यक्त्वं तदाद्यं लक्षणं भवेत् ॥ १ ॥
दुःखत्वेनानुमन्वानः, सुरादिविषयं सुखम्। मोक्षाभिलापसंवेगा–श्रितः स दर्शनी भवेत् ॥ २ ॥
संसारकारकागार—विवर्जनपरायणा। प्रज्ञा चित्ते भवेद्यस्य, स निर्वेदकवान्नरः ॥ ३ ॥
दीनदुःस्थितदारिद्र्य—प्राप्तानां प्राणिनां सदा। दुःखनिवारणे वाञ्छा, सोऽनुकम्पाऽभिधीयते ॥ ४ ॥
प्रभुभिर्भाषितं यत्तत्, तत्त्वान्तरश्रुतेऽपि हि। निःशङ्कं मन्यते सत्यं, तदास्तिक्यं सुलक्षणम् ॥ ५ ॥

१४३ साधर्मिकवात्सल्यं

सर्वैः सर्वे मिथः सर्व—संबन्धा लब्धपूर्विणः। साधर्मिकादिसंबन्ध—लब्धारस्तु मिताः क्वचित् ॥ १ ॥

एगत्थ सव्वधम्मा, साहम्मियवच्छलं तु एगत्थ । बुद्धितुलाएतुलिया, दो वि अ तुल्लाइ भणिआइ ॥ २॥
साधर्मिवत्सले पुण्य, यद्भवेत्तद्वचोऽतिगम् । धन्यास्ते गृहिणोऽवश्य, तत् कृत्वाऽश्नन्ति प्रत्यहम् ॥ ३ ॥

१४४ श्रावककृत्यानि

मन्नह जिणाण आण, मिच्छ परिहरह धरह सम्मत्त । छव्विहआवस्सयम्मि य, उज्जुत्ता होह पइदिवस ॥ १ ॥
पव्वेसु पोसहवय, दाण सील तवो य भावो य । सज्झाय नमुक्कारो, परोवयारो य जयणा य ॥ २ ॥
जिणपूआ जिणथुणण, गुरुथुई साहम्मियाण वच्छल्ल । सव्वविरइमणोरह, एमाइ सड्ढकिच्चाइ ॥ ३ ॥

१४५ प्रकीर्णकश्लोकानि

सम्पत्तौ नियम शक्तौ, सहन यौवने व्रतम् । दारिद्र्ये दानमत्यल्पमपि लाभाय भूयसे ॥ १ ॥ प्र पृ १४१, श्लो १
दृष्टिपूत न्यसेत् पाद वस्त्रपूत पिबेज्जलम् । सत्यपूत वदेद् वाक्य, मन पूत समाचरेत् ॥२॥ आह्निक, श्लो. ३३
सा किं सभा यत्र न सन्ति वृद्धा, वृद्धा न ते ये न वदन्ति धर्मम् ।
धर्म स नो यत्र न चैव सत्य, सत्यं हि तद्यत्र परस्य रक्षा ॥ ३ ॥ धर्मकल्प० पृ० ७८, श्लो० ६५
उदारस्य तृण वित्त, शूरस्य मरण तृणम् । विरक्तस्य तृण भार्या, नि स्पृहस्य तृण जगत् ॥४॥ उद्भटसागर श्लो. १३४
लोभमूलानि पापानि, रसमूलानि व्याधय' । स्नेहमूलानि, दु खानि, त्रीणि त्यक्त्वा सुखी भव॥ ५ ॥उ० पृ० ४९

अर्थस्य मूलं प्रियवाक् क्षमा च, कामस्य वित्तं च वपुर्वयश्च। धर्मस्य दानं च दया दमश्च, मोक्षस्य सर्वार्थनिवृत्तिरेव ॥६॥
खण्डनी पेषणी चुल्ली, जलकुम्भः प्रमार्जनी । पञ्चशूना गृहस्थस्य, बध्यते यास्तु वाहयन् ॥ ७ ॥
पोषं धर्मस्य धत्ते यत्, तद्भवेत् पौषधव्रतम् । आहारदेहसत्काराब्रह्मव्यापारवर्जनम् ॥ ८ ॥ का, स० ३० श्लो० ७१४
वैराग्यहस्तिनः पीठे, समारोप्य स्वमानसम् । विवेकविनयाद्यैर्हि, जीयात् क्रोधाद्यरीन् बुधः ॥ ९ ॥ ध० श्लो० ३३
मैत्रीप्रमोदकारुण्यमाध्यस्थ्याख्या महागुणाः । युक्तस्तैर्लभते मुक्तिं, जीवोऽनन्तचतुष्टयम् ॥१०॥ प्रा० स० ६ श्लो.३८२
पीडयेन्न जरा यावद् व्याधिर्यावन्न बाधते । मृत्युर्धावति नो यावत्, तावद् धर्मो विधीयते ॥११॥ पा. स०१ श्लो.७६९
वैराग्यशुद्धधर्मा, देवादिसत्तत्वविद्विरतिधारी । संवरवान् शुभवृत्तिः, साम्यरहस्यं भज शितार्थिन् ॥१२॥ अ. श्लो. ४
बहूनामप्यसाराणां, समुदायो जयावहः । तृणैः संजायते रज्जुर्बद्ध्यन्ते येन दन्तिनः ॥ १३ ॥
संहतिः श्रेयसी पुंसां, स्वपक्षे तु विशेषतः । तुषैरपि परिभ्रष्टाः, न प्ररोहन्ति तण्डुलाः ॥ १४ ॥ सू० पृ० २१
दूषणं मतिरुपैति नोत्तमी, माध्यमी स्पृशति भापते न च। वीक्ष्य पार्श्वमथ भाषतेऽधमो, रारटीति सहसाऽधमाधमः॥१५॥
शास्त्रं बोधाय दानाय, धनं धर्माय जीवितम् । वपुः परोपकाराय, धारयन्ति मनीषिणः ॥ १६ ॥ सू० पृ० ३०
पिबन्ति नद्यः स्वयमेव नाम्भः स्वादन्ति न स्वादुफलानि वृक्षाः ।
पयोमुचां किं क्वचिदस्ति शस्यं ?, परोपकाराय सतां विभूतितवः ॥ १७ ॥ सूक्तमुक्तावली पृ० ३१
नागुणी गुणिनं वेत्ति, गुणी गुणिषु मत्सरी । गुणी च गुणरागी च, विरलः सरलो जनः ॥ १८ ॥ सू. पृ. ३३
संधयेत्सरला सूची, वक्रा छेदाय कर्तरी । अतो विमुच्य वक्रत्वं, गुणानेव समाश्रय ॥ १९ ॥

आकारैरिङ्गितैर्गत्या, चेष्टया भापणेन च । नेत्रवक्त्रविकारैश्च, लक्ष्यतेऽन्तर्गत मन॰ ॥ २० ॥ सू० पृ० ३४

कोदारेण विदारिता वसुमती पश्चात् खरारोहण, तत्पापिष्टकुलालपादहनन दण्डेन चक्रभ्रमम् ।

दत्वा छेदनताडन च दहन सर्वं विसोढ मया । ग्राम्यस्त्रीकरटकर्ण बहुकृतं तन्नोऽपि दु॰ख महत् ॥२१ ॥

परस्पृहा महादु ख, नि स्पृहत्व महासुखम् । एतदुक्तं समत्वेन, लक्षण सुखदु खयो ॥ २२ ॥

उत्कृष्टाद् दशविरते स्थानात्सर्वजघन्यकम् । स्थानं सर्वविरतेरनन्तगुणतोऽधिकम् ॥ २३ ॥

अल्पानामपि वस्तूना, सहति कार्यसाधिका । तृणैर्विधीयते रज्जुर्बध्यन्ते मत्तदन्तिन ॥ २४ ॥

न्यक्कारयोग्यो न हि कोऽपि लोको, दुर्वृत्तता किन्तु तदीयपात्रम् । सत्योपदेशेन विनाश्य ता तु प्रेमैव सर्वेषु तनोतु विद्वान् ॥२५॥

ज्ञानी विनीत सुभग सुशील , प्रभुत्ववान् न्यायपथप्रवृत्त. । त्यागी धनाढ्य. प्रशमी समर्थ॰, पञ्चाप्यमी भूमिषु कल्पवृक्षा ॥२६॥

यौवने विषयेभ्योऽसौ यथा ह्युत्तिष्ठते भवी । तथा ह्युत्तिष्ठते चेन्मुक्त्यै, किं हि न्यून तदा भवेत् ॥ २७ ॥

पढम पोरिसिं सज्झाय, बीय झाण झियायई । तइयाए भिक्खायरियं, पुणो चउत्थीइ सज्झाय ॥२८ ॥ उ. प गा १२

पुढवी आउक्काए तेऊ वाऊ वणस्सइ तसाण । पडिलेहणापमत्तो छण्हपि विराहओ होइ ॥ २९॥ उ प गा ३०

राजदण्डभयात्पाप, नाचरत्यधमो जन । परलोकभयान्मध्य॰, स्वभावादेव चोत्तम ॥ ३० ॥ सु सू पृ १५

चार्वाकोऽध्यक्षमेक सुगतकणभुजौ सानुमान सशाब्दम् , तद्वैत पारमर्ष सहितमुपमया तत्त्रयं चाक्षपाद॰ ।

अर्थापत्त्या प्रभाकृत् वदति तदखिल मन्यते भट्ट एतत्, साभाव द्वे प्रमाणे जिनपतिसमये स्पष्टतोऽस्पष्टतश्च ॥३१॥ पृ २४७

सर्वत्र सर्वस्य सदा प्रवृत्तिर्दु खस्य नाशाय सुखस्य हेतो. ।

तथापि दुःखं न विनाशमेति सुखं कस्यापि भजेत् स्थिरत्वम् ॥ ३२ ॥
सवणे नाणे य विन्नाणे, पच्चक्खाणे य संजमे । अणासवे तवे चेव, वोदाणे अकिरिया सिद्धी ॥ ३३ ॥
सत्तलवा जइ आउं, पहुप्पमानं तओ हु सिज्झंता । तत्तियमित्तं न हु यं, ततो लवसत्तमा जाया ॥ ३४ ॥
क्रियाहीनं कुसाधुं च, दृष्ट्वा चित्तं न चाल्यते । तत् सम्यक्त्वं दृढं ज्ञेयं, धर्मे श्रेणिकभूपवत् ॥ ३५ ॥
दंसणभट्ठो भट्ठो, दंसणभट्ठस्स नत्थि निव्वाणं । सिज्झंति चरणरहिआ, दंसणरहिआ न सिज्झंति ॥ ३६ ॥
अरिहं देवो गुरुणो सुसाहुणो जिणमयं मह पमाणं । इच्चाइ सुहो भावो, सम्मत्तं विंति जगगुरुणो ॥ ३७ ॥
कत्थ अम्हारिसा पाणी, दूसमादोसदूसिओ । हा अणाहा कहं हुंता न हुंतो जइ जिणागमो ॥ ३८ ॥
जं अन्नाणी कम्मं, खवेइ बहुआइ वासकोडीहिं । तन्नाणी तीहिं गुत्तो, खवेइ उसासमित्तेणं ॥ ३९ ॥ संबोध० प्र०
श्रीशान्तिनाथादपरो न दानी, दशार्णभद्रादपरो न मानी । श्रीशालिभद्रादपरो न भोगी, श्रीस्थूलभद्रादपरो न योगी॥४०
पूर्वं न मंत्रो न तदा विचारः, स्पर्धा न केनापि फले न वाञ्छा ।
पश्चानुतापोऽनुशयो न गर्वो हर्षस्तथा संगमके बभूव ॥ ४४ ॥
शिष्टे संगः श्रुतौ रंगः, सद्‌ध्याने धीर्धृतौ मतिः । दाने शक्तिर्गुरौ भक्तिः, षडेते सुकृताकराः ॥ ४५ ॥
धम्मो अहम्मो आगासं कालो पुग्गल जंतवो । एस लोगुत्ति पण्णत्तो जिणेहि वरदंसिहिं ॥ ४६ ॥ उ० अ० २८
अत्थि एगं धुवं ठाणं लोगग्गमि दुरारुहं । जत्थ नत्थि जरा मच्चू वाहिणो वेयणा तहा ॥ ४७ ॥ उ० अ० २३
धम्मो अहम्मो आगासं दव्वं इक्किकमाहियं । अणंताणि य दव्वाणि कालो पुग्गल जंतवो ॥ ४८ ॥ उ० अ० २८

गइलक्खणो उ धम्मो अहम्मो ठाणलक्खणो । भायण सव्वदव्वाण नह ओगाहलक्खण ॥ ४९ ॥ उ० अ० २८
वत्तणालक्खणो कालो जीवो उवओगलक्खणो । नाणेण दसणेण च सुहेण य दुहेण य ॥ ५० ॥
नाण च दसण चेव चरित्त च तवो तहा । वीरिय उवओगो य एय जीवस्स लक्खणं ॥ ५१ ॥
सद्दयधार उज्जोओ पहा छायातवे इ या । वण्णरसगधफासा पुग्गलाणं तु लक्खण ॥ ५२ ॥
एगत्तं च पुहत्त च सखा सठाणमेव य । सयोगा य विभागा य पज्जवाणं तु लक्खण ॥ ५३ ॥
नाण च दसण चेव चरित्त च तवो तहा । एय मग्गमणुपत्ता जीवा गच्छंति सोग्गइ ॥ ५४ ॥
नादसणिस्स नाण नाणेण विना न हुति चरणगुणा । अगुणिस्स नत्थि मोक्खो, नत्थि अमुक्कस्स निव्वाणं ॥५५ ॥
नाणेण जाणइ भावे दसणेण य सद्दहे । चरित्तेण निगण्हाइ तवेण परिसुज्झई ॥ ५६ ॥
जहा सूइ ससुत्ता पडिया न विणस्सई । तहा जीवे ससुत्ते ससारे न विणस्सइ ॥ ५७ ॥ उ० अ० २९
अह पचहिं ठाणेहिं जेहिं सिक्खा न लब्भई । थभा कोहा पमाएण रोगेणालस्सएण य ॥ ५८ ॥ उ० अ० ११
कुप्पवयणपासडी सव्वे उम्मग्गपट्ठिया । सम्मग्ग तु जिणक्खाय एस मग्गे हि उत्तमो ॥ ५९ ॥ उ० अ० २३
पडिणीय च बुद्धाण वाया अदुव कम्मुणा । आवी वा जइ वा रहस्से णेव कुज्जा कयाइ वि ॥ ६०॥ उ० अ० १
परिजूरइ ते सरीरय केसा पडुरया हवति ते । से सोयवले य हायई समय गोयम ! मा पमायए ॥६१॥ उ० अ० १०
अप्पा कत्ता विकत्ता य दुहाण य सुहाण य । अप्पा मित्तममित्त च दुप्पट्ठिय सुपट्ठिओ ॥ ६२ ॥ उ० अ० २०
अप्पा नई वेयरणी अप्पा मे कूडसामली । अप्पा कामदुहा धेणु अप्पा मे नदण वणं ॥ ६३ ॥

वरं मे अप्पा दंतो संजमेण तवेण य । माहं परेहिं दम्मंतो बंधणेहिं वहेहिं य ॥ ६४ ॥ उ० अ० १
जो सहस्सं सहस्साणं संगामे दुज्जए जिणे । एगं जिणिज्ज अप्पाणं एस से परमो जओ ॥ ६५ ॥ उ० अ० ९
अप्पा चेव दमेयव्वो अप्पा हु खलु दुद्दमो । अप्पा दंतो सुही होई अस्सिं लोए परत्थ य ॥ ६६ ॥ उ० अ० १
पंचिंदियाणि कोहं माणं मायं तहेव लोभं च । दुज्जयं चेव अप्पाणं सव्वमप्पे जिए जियं ॥ ६७ ॥ उ० अ० ९
अप्पाणमेव जुज्झाहि किं ते जुज्झेण वज्झओ । अप्पणा चेव अप्पाणं जइत्ता सुहमेहए ॥ ६८ ॥
एगे जिए जिया पंच पंच जिए जिया दस । दसहा उ जिणित्ता णं सव्वसत्तू जिणाम हं ॥ ६९ ॥ उ० अ० २३
तवो जोई जीवो जोईठाणं, जोगा सुया सरीरं कारिसंगं । कम्मं एहा संजमजोग संती, होमं हुणामि इसिणं पसत्थं ॥७०॥
जे केई सरीरे सत्ता वण्णे रूवे य सव्वसो । मणसा कायवक्केणं सव्वे ते दुक्खसंभवा ॥ ७१ ॥ उ० अ० ६
दुक्खं हयं जस्स न होई मोहो मोहो हओ जस्स न होई तण्हा । तण्हा हया जस्स न होई लोहो लोहो हओ जस्स न किंचणाइं ॥
अहे वयइ कोहेणं माणेणं अहमागई । माया गइपडिग्घाओ लोहाओ दुहओ भयं ॥ ७३ ॥ उ० अ० ६
कोहो पीइं पणासेइ माणो विणयनासणो । माया मित्ताणि नासेइ लोहो सव्वविणासणो ॥ ७४ ॥ द० अ०:८
कोहो अ माणो अणिग्गहीया माया य लोभो य पवड्ढमाणा । चत्तारि एए कसिणा कसाया सिंचंति मूलाइ पुणब्भवस्स
उवसमेण हणे कोहं माणं मद्दवया जिणे । मायं चाज्जवभावेण लोभं संतोसओ जिणे ॥ ७६ ॥ द० अ० ८
जइ वि य णिगणे किसे चरे जइ पि य भुंजिय मासमंतसो । जे इह मायाइ मिज्जई आगंता गब्भाय णंतसो ॥७७॥
पूयणट्ठा जसोकामी माणसम्माणकामए । बहुं पसवइ पावं मायासल्लं च कुव्वइ ॥ ७८ ॥ द० अ० ५

गुरणकप्पग उपन्नाभर गिया हु केलाममा अगमया । नरस्स लुद्धस्स न तहिं किंचि इच्छा हु आगामसमा अणंतिया ॥
जहा य अंडप्पभवा बलागा अंड बलागप्पभवं जहा य । एमेव मोहाययणं खु तण्हं मोहं च तण्हाययणं वयंति ॥८०॥
निम्ममो निरहंकारो निस्संगो चत्तगारवो । समो य सव्वभूएसु तसेसु थावरेसु य ॥ ८१ ॥ उ० अ० १९
नत्थि चरित्तं सम्मत्तविहूणं दंसणे उ भइयव्वं । सम्मत्तचरित्ताइं जुगवं पुव्वं व सम्मत्तं ॥ ८२ ॥ उ० अ० २८
मिच्छादंसणरत्ता सनियाणा हु हिंसगा । इय जे मरंति जीवा तेसिं पुण दुल्लहा बोही ॥ ८३ ॥ उ० अ० ३६
सम्मद्दंसणरत्ता अनियाणा सुक्कलेसमोगाढा । इय जे मरंति जीवा सुलहा तेसिं भवे बोही ॥ ८४ ॥ उ० अ० ३६
देवदाणवगंधव्वा जक्खरक्खसकिन्नरा । बंभयारिं नमंसंति दुक्करं जे करंति तं ॥ ८५ ॥ उ० अ० १६
मा पच्छ पुरा पणामए अभिकंखे उवहिं धुणित्तए । जो दूमण तेहिं णो णया ते जाणंति समाहिमाहियं ॥८६॥ सू० अ० २
समरेसु अगारेसु संधीसु य महापहे । एगो एगित्थिए सद्धिं णेव चिट्ठे न संलवे ॥ ८७ ॥ उ० अ० १
जहा कुक्कुडपोयस्स निच्चं कुललओ भयं । एवं खु बंभयारिस्स इत्थीविग्गहओ भयं ॥ ८८ ॥ द० अ० ८
हत्थपायपडिच्छिन्नं कन्ननासविगप्पियं । अवि वाससइं नारिं बंभयारी विवज्जए ॥ ८९ ॥ द० अ० ८
जहा बिरालावसहस्स मूले न मूसगाणं वसही पसत्था । एमेव इत्थीनिलयस्स मज्झे न बंभयारिस्स खमो निवासो ॥९०॥
सव्वं विलवियं गीयं सव्वं नट्टं विडंबियं । सव्वे आहरणा भारा सव्वे कामा दुहावहा ॥ ९१ ॥ उ० अ० १३
सल्लं कामा विसं कामा कामा आसीविसोवमा । कामे पत्थेमाणा, अकामा जंति दुग्गइं ॥ ९२ ॥ उ० अ० ९
चीराजिणं निगिणिणं जडी संघाडि मुंडिणं । एयाइं पि न तायंति दुस्सीलं परियागयं ॥ ९३ ॥ उ० अ० ५

तेणे जहा संधिमुहे गहीए सकम्मुणा किच्चइ पावकारी। एवं पया पेच्च इह च लोए कडाण कम्माण न मुक्ख अत्थि ॥९४॥
एगया देवलोएसु नरएसु वि एगया । एगया आसुरं कायं अहाकम्मेहिं गच्छई ॥ ९५ ॥ उ० अ० ३
रागो य दोसो वि य कम्मबीयं कम्मं च मोहप्पभवं वयंति । कम्मं च जाईमरणस्स मूलं दुक्खं च जाईमरणं वयंति ॥९६॥
कामेहि ण संथवेहि गिद्धा, कम्मसहा कालेण जंतवो । ताले ःजह बंधणच्चुए एवं आउक्खयम्मि तुट्टति ॥९७॥ सू. अ.२
जं जारिसं पुव्वमकासि कम्मं तमेव आगच्छति संपराए । एगंतदुक्खं भवमज्जणित्ता वेदंति दुक्खी तमणंतदुक्खं ॥९८॥
उवलेवो होइ भोगेसु, अभोगी नोवलिप्पई । भोगी भमइ संसारे–अभोगी विप्पमुच्चई ॥९९॥ उ० अ० २५
जहा किंपागफलाणं परिणामो न सुंदरो । एवं भुत्ताण भोगाणं परिणामो न सुंदरो ॥ १०० ॥ उ० अ० १९
जा जा वच्चइ रयणी न सा पडिनिअत्तइ । अहम्मं कुणमाणस्स अहला जंति राईओ ॥ १०१ ॥उ. अ. १४
संसारमावण्ण परस्स अट्ठा साहारणं जं च करेइ कम्मं । कम्मस्स ते तस्स उ वेयकाले, न बंधवा बंधवयं उवेंति ॥१०२॥
एवं धम्मस्स विणओ मूलं परमो से मुक्खो । जेण कित्ति सुयं सिग्घं, निस्सेसं चाभिगच्छइ ॥ १०३ ॥ द० अ० ९
जरा जाव न पीडेइ वाही जाव न वड्ढई । जाविंदिया न हायंति, ताव धम्मं समायरे ॥ १०४ ॥ द० अ० ८
जयं चरे, जयं चिट्ठे जयं आसे जयं सए । जयं भुंजंतो भासंतो पावं कम्मं न बंधई ॥ १०५ ॥ द० अ० ४
जरामरणवेगेणं वुज्झमाणाण पाणिणं । धम्मो दीवो पइट्ठा य गई सरणमुत्तमं ॥ १०६ ॥ उ० अ० २३
धम्मो मंगलमुक्किट्ठं अहिंसासंजमो तवो । देवा वि तं नमंसंति जस्स धम्मे सया मणो ॥ १०७॥ द० अ० १
पढमं नाणं तओ दया एवं चिट्ठइ सव्वसंजए । अन्नाणी किं काही किं वा नाहिइ छेय पावगं ? ॥१०८॥ द. अ.४

अत्थगयमि आइच्चे, पुरत्था य अणुग्गए । आहारमइय सव्व मणसा वि न पत्थए ॥ १०९ ॥ द० अ० ८
न सो परिग्गहो वुत्तो नायपुत्तेण ताइणा । मुच्छा परिग्गहो वुत्तो इइ वुत्त महेसिणा ॥ ११० ॥ द० अ० ६
लोभस्से समणुफासे मन्ने अन्नयरामवि । जे सिया सन्निहीकामे गिही पव्वइए न से ॥ १११ ॥ द० अ० ६
जे केइ बाला इह जीवियट्ठी पावाइ कम्माइ करति रुद्दा । ते घोररुवे तमिसधयारे तिव्वाभितावे नरए पडति ॥११२॥
सउणी जह पंसुगुडिया विहुणिय धसयइ सिय रय । एव दविओवहाणव कम्म खवइ तवस्सी माहणे ॥११३॥ सू अ २
सबुज्झह किं न बुज्झह, सबोही खलु पेच्च दुल्लहा । णो हूवणमति राइओ नो सुलभ पुणरवि जीवियं ॥११४॥ सू अ २
जे परिभवइ पर जण ससारे परिवत्तई महं । अदु इखिणिया उ पाविया इति सखाय मुणी ण मज्जइ ॥११५॥ सू अ २
महुकारसमा बुद्धा जे भवति अणिस्सिया । नाणापिण्डरया दता तेण वुच्चति साहुणो ॥ ११६ ॥ द अ १
समयाए समणो होइ बभचेरेण बभणो । नाणेण य मुणी होइ तवेण होइ तावसो ॥ ११७ ॥ उ अ २५
नवि मुडिएण समणो न ओंकारेण बभणो । न मुणी रण्णवासेण, कुसचीरेण न तावसो ॥ ११८ ॥ उ अ २५
धम्मस्स य पारए मुणी, आरभस्स य अतए ट्ठिए। सोयति य ण ममाइणो णो लब्भति णिय परिग्गह ॥११९॥ सू अ २
जे न वदे न से कुप्पे वदिओ न समुक्कसे । एवमन्नेसमाणस्स सामण्णमणुचिट्ठइ ॥ १२० ॥ द अ ५
पण्णसम्मते सया जये समताधम्ममुदाहरे मुणी । सुहुमे उ सया अलूसए णो कुज्झे णो माणि माहणे ॥१२१॥ सू, अ २
अणुसासिओ न कुप्पिज्जा खतिं सेविज्ज पडिए । खुड्डेहिं सह ससग्गिं हास कीड च वज्जए ॥१२२॥ उ० अ० १
जे य कते पिए भोए लद्धे वि पिट्ठि कुव्वइ । साहीणे चयइ भोए सेहु 'चाइ'त्ति वुच्चइ ॥१२३॥ द० अ० २

वत्थगंधमलंकारं इत्थीओ सयणाणि य । अच्छंदा जे न भुंजंति न से 'चाइ'त्ति वुच्चइ ॥१२४॥ द० अ० २
बहुआगमविण्णाणा समाहिउप्पायगा य गुणगाही । एएण कारणेणं अरिहा आलोयणं सोउं ॥१२५॥ उ० अ० ३६
पाणिवहमुसावाया अदत्तमेहुणपरिग्गहा विरओ । राईभोयणविरओ जीवो भवइ अणासवो ॥१२६॥ उ० अ० ३०
कम्मुणा बंभणो होइ कम्मुणा होइ खत्तिओ । वइसो कम्मुणा होइ सुद्दो हवइ कम्मुणा ॥१२७॥ उ० अ० २५
जहा पोमं जले जायं नोवलिप्पइ वारिणा । एवं अलित्तो कामेहिं तं वयं बूम माहणं ॥१२८॥ उ० अ० २५
तवस्सियं किसं दंतं अवचियमंससोणियं । सुव्वयं पत्तनिव्वाणं तं वयं बूम माहणं ॥१२९॥ उ० अ० २५
जायरूवं जहामट्ठं निद्धंतमलपावगं । रागदोसभयाईयं तं वयं बूम माहणं ॥ १३० ॥ उ० अ० २५
लाभालाभे सुहे दुक्खे जीविए मरणे तहा । समो निंद–पसंसासु समो माणावमाणओ ॥ १३१ ॥ उ० अ० १९
संति एगेहिं भिक्खुहिं गारत्था संजमुत्तरा । गारत्थेहिं च सव्वेहिं साहवो संजमुत्तरा ॥ १३२ ॥ उ० अ० ५
अक्कोसेज्ज परो भिक्खुं न तेसिं पइ संजले । सरिसो होइ बालाणं तम्हा भिक्खू न संजले ॥ १३३ ॥ उ० अ० २
णत्थि ता अहमेव लुप्पए लुप्पंति लोअंसि पाणिणो । एवं सहिएहि पासए अणिहे से पुट्ठे अहियासए ॥१३४॥ सू. अ. २
दुल्लहा उ मुहदाई मुहाजीवी वि दुल्लहा । मुहादाई मुहजीवी दो वि गच्छंति सोग्गइं ॥ १३५ ॥ द० अ० ५
असच्चमोसं सच्चं च अणवज्जमकक्कसं । समुप्पेहमसंदिद्धं गिरं भासेज्ज पन्नवं ॥ १३६ ॥ द० अ० ७
मुसावाओ य लोगम्मि सव्वसाहूहिं गरहिओ । अविस्सासो य भूयाणं तम्हा मोसं विवज्जए ॥१३७॥ द० अ० ६
जा य सच्चा अवत्तव्वा सच्चामोसा य जा मुसा । जा य बुद्धेहिं अणाइण्णा न तं भासेज्ज पन्नवं ॥१३८॥ द० अ. ७

अपुच्छिओ न भासेज्जा भासमाणस्स अंतरा । पिट्ठिमंसं न खाएज्जा मायामोसं विवज्जए ॥१३९॥ द० अ ८
अप्पत्तियं जेण सिया आसु कुप्पेज्ज वा परो । सव्वसो तं न भासेज्जा भासं अहिअगामिणिं ॥१४०॥ द० अ ८
सव्वजीवा वि इच्छंति जीविउं न मरिज्जिउं । तम्हा पाणवहं घोरं निग्गंथा वज्जयंति णं ॥१४१॥ द० अ ६
तहेव फरुसा भासा गुरुभूओवघाइणी । सच्चा वि सा न वत्तव्वा जओ पावस्स आगमो ॥१४२॥ द० अ० ७
तहेव काणं 'काणे' त्ति पंडगं 'पंडगे' त्ति वा । वाहिअं वा वि 'रोगि' त्ति तेणं 'चोरे' त्ति नो वए ॥१४३॥ द० अ ७
सच्चा तहेव मोसा य सच्चामोसा तहेव य । चउत्थी असच्चामोसा य मणगुत्ती चउव्विहा ॥१४४॥ उ अ २४
जहा सुणी पूइकण्णी निक्कसिज्जइ सव्वसो । एवं दुस्सीले पडिणीए मुहरी निक्कसिज्जई ॥१४५॥ उ अ १
तागि ठाणाणि गच्छंति सिक्खित्ता संजमं तवं । भिक्खाए वा गिहत्थे वा जे संति परिनिव्वुडा ॥१४६॥ उ अ ५
दुल्लहे खलु माणुसे भवे चिरकालेण वि सव्वपाणिणं । गाढा य विवाग कम्मुणो समयं गोयम ! मा पमायए ॥१४७॥ उ अ १०
दुमपत्तए पंडुयए जहा निवडइ राइगणाण अच्चए । एवं मणुयाण जीवियं समयं गोयम ! मा पमायए ॥१४८॥ उ अ १०
तिण्णो हु सि अण्णवं महं किं पुण चिट्ठसि तीरमागओ । अभितुर पारं गमित्तए समयं गोयम ! मा पमायए ॥१४९॥
कुसग्गे जह ओसबिंदुए थोवं चिट्ठइ लंबमाणए । एवं मणुयाण जीवियं समयं गोयम ! मा पमायए ॥१५०॥ उ. अ १०
इमं च मे अत्थि इमं च नत्थि इमं च मे किच्चमिमं अकिच्चं । तं एवमेव लालप्पमाणं हरा हरंति त्ति कहं पमाए ॥१५१॥ उ १४
जावंत अविज्जापुरिसा सव्वे ते दुक्खसंभवा । लुप्पंति बहुसो मूढा संसारम्मि अणंतए ॥१५२॥ उ० अ० ६
मा पच्छ असाधुता भवे अच्चेही अणुसास अप्पगं । अहियं च असाहु सोयती से थणइ परिदेवई बहु ॥१५३॥ सू अ २

सुभाषितरत्नखंडानि

१ सा विद्या या विमुक्तये । २ वचने का दरिद्रता ? ३ वचनेऽपि दरिद्रत्वं, धनाशा तत्र कीदृशी ? ४ विद्याधनं सर्वधनप्रधानम् । ५ विद्या गुरूणां गुरुः । ६ निरस्तपादपे देशे, एरंडोऽपि द्रुमायते । ७ न हि वंध्या विजानाति, गुर्वीं प्रसववेदनाम् । ८ स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते । ९ पयःपानं भुजंगानां, केवलं विषवर्धनम् । १० न मूर्खजनसंपर्कः सुरेन्द्रभवनेष्वपि । ११ गुणी च गुणरागी च, विरलः सरलो जनः । १२ संपत्तौ च विपत्तौ च, महतामेकरूपता । १३ स्पर्धापि विदुषा युक्ता, न युक्ता मूर्खमित्रता । १४ नहि स्वदेहशैत्याय जायन्ते चंदनद्रुमाः । १५ नहि संहरते ज्योत्स्नां, चन्द्रश्चांडालवेश्मनि । १६ छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य । १७ परोपकाराय सतां विभूतयः । १८ प्रारभ्य चोत्तमजना न परित्यजन्ति । १९ सर्पो दशति कालेन, दुर्जनस्तु पदे पदे । २० शशिना तुल्यवंशोऽपि, निर्धनः परिभूयते । २१ अर्थो हि लोके पुरुषस्य बन्धुः । २२ मुखे च कटुता नित्यं, धनिनां ज्वरिणामिव । २३ रिक्ता भवन्ति भरिता भरिताश्च रिक्ताः । २४ दारिद्र्यादधिकं दुःखं, न भूतं न भविष्यति । २५ दारिद्र्यमेकं गुणकोटिहारि । २६ लोभाविष्टो नरो हन्ति, स्वामिनं वा सहोदरम् । २७ लोभेन बुद्धिश्चलति । २८ हतमपि च हंत्येव मदनः । २९ कंदर्पदर्पदलने विरला मनुष्याः । ३० उदारचरितानां तु वसुधैव कुटुम्बकम् । ३१ शुष्केऽपि हि नदीमार्गे खन्यते सलिलार्थिभिः । ३२ दातृयाचकयोर्भेदः कराभ्यामेव सूचितः । ३३ परोपकारः पुन्याय पापाय परपीडनम् । ३४ आकृतिर्गुणान् कथयति । ३५ क्षमा वीरस्य भूषणम् । ३६ यतो धर्मस्ततो जयः । ३७ कालः सुप्तेषु जागर्ति । ३८ कामातुराणां न भयं न लज्जा । ३९ चिंतातुराणां न सुखं न निद्रा । ४० नंदस्तुष्टो हस्ततालीं ददाति । ४१

लक्ष्मी पुण्यानुसारिणी । ४२ स्त्रीणा च रुदित बल । ४३ दोषान् गृह्णाति दुर्जना । ४४ परोपदेशे पाण्डित्यम् । ४५ धातुषु क्षीयमाणेषु, शम कस्य न जायते । ४६ नरस्याभूषण रूपं, रूपस्याभरण गुण । ४७ ददतु ददतु गाली–र्गालीमन्तो भवन्त'। ४८ यथा लाभस्तथा लोभो । ४९ मात्रासमधिक कुत्र मात्राहीनेन जीयते । ५० लोकोक्तिरपि यद्विप्रैर्नास्तीता वाच्यते तिथि । ५१ सतोष परम सुख । ५२ तृष्णा न जीर्णा वयमेव जीर्णा । ५३ दुर्लभ मानुष जन्म । ५४ यथा शील तथा गुणा॰ । ५५ रक्षन्ति पुण्यानि पुरा कृतानि । ५६ गुणं पृच्छस्व मा रूप, शील पृच्छस्व मा कुलम् । ५७ गुणो भूषयते रुप, शील भूषयते कुलम् । ५८ स्वस्थे चित्ते बुद्धय सभवन्ति । ५९ बुभुक्षित किं न करोति पाप । ६० नैकत्र सर्वो गुणसनिपात । ६१ महाजनो येन गत स पंथा । ६२ अल्पश्च कालो बहवश्च विघ्ना । ६३ वृथा वृष्टि समुद्रेषु, वृथा दीपो दिवापि च । ६४ सर्वं पद हस्तिपदे निमग्नम् । ६५ अनायके न वस्तव्य, न वसेद्वहुनायके । ६६ हत सैन्यमनायक । ६७ सार गृह्णाति पडिता । ६८ विद्यया सह मर्तव्य, कुशिष्याय न दापयेत् । ६९ नास्ति मेघसम तोय, नास्ति चात्मसम बलम् । ७० उत्तम स्वार्जित भुक्त । ७१ पराधीन वृथा जन्म । ७२ विद्या सर्वस्य भूषणम् । ७३ मनसा चिंतित कार्यं, वचसा न प्रकाशयेत् । ७४ ज्ञान भार' क्रियां विना । ७५ सतोष एव पुरुषस्य पर निधानम् । ७६ गुणा सर्वत्र पूज्यन्ते । ७७ स्वभावो मूर्ध्नि वर्तते । ७८ अतिपरिचयादवज्ञा । ७९ अति सर्वत्र वर्जयेत् । ८० मौन सर्वार्थसाधनम् । ८१ लोभ॰ सर्वार्थबाधक । ८२ स्थानभ्रष्टा न शोभन्ते, दन्ता' केशा नखा नरा । ८३ तीर्थं फलति कालेन, सद्य साधुसमागम । ८४ सता हि सग' सकल प्रसूते । ८५ यो यस्य चित्ते नहि तस्य दूरे । ८६ प्राप्ते तु षोडशे वर्षे, पुत्र मित्रवदाचरेत् । ८७ एकश्चन्द्रस्तमो हन्ति, न च तारागणोऽपि च । ८८ बुद्धि कर्मानुसारिणी । ८९ विनशकाले विपरीतबुद्धि । ९० प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां भाजनम् । ९१

कर्मानुगो गच्छति जीव एकः । ९२ अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् । ९३ गुणाः सर्वे विवेकतः । ९४ कीर्तिर्यस्य स जीवति । ९५ न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते । ९६ अतृणे पतितो वह्निः स्वयमेवोपशाम्यति । ९७ मूलं हि संसारतरोः कपायाः । ९८ कपायमुक्तिः किल मुक्तिरेव । ९९ कपायमुक्तः परमः स योगी । १०० शरीरं व्याधिमन्दिरम् । १०१ बलमूलं हि जीवितम् । १०२ क्षीणे पुण्ये वृथा बलम् । १०३ अजीर्णे भोजनं विषम् । १०४ ह्यर्थी दोपान्न पश्यति । १०५ मूलं नास्ति कुतः शाखा ? १०६ अपुत्रस्य गृहं शून्यं । १०७ अमोघं देवदर्शनम् । १०८ बुद्धिर्विपद्धारिणी । १०९ नग्नक्षपणकग्रामे, रजकः किं करिष्यति ? ११० आजीवितं तीर्थमिवोत्तमानाम् । १११ अल्पतोयश्चलति कुम्भः । ११२ आहारे व्यवहारे च स्पष्टवक्ता सुखी भवेत् । ११३ आत्मवत्सर्वभूतेषु, यः पश्यति स पश्यति । ११४ विवेकहीनः पशुभिः समानः ११५ उद्योगः पुरुषलक्षणम् । ११६ मुंडे मुंडे मतिर्भिन्ना । ११७ चंदनं न वने वने । ११८ यथा राजा तथा प्रजा । ११९ यथा बीजं तथांकुरः । १२० प्रणामांतः सतां कोपः । १२१ राजा मित्रं केन दृष्टं श्रुतं वा । १२२ विनये शिष्यपरीक्षा । १२३ विद्या विनयेन शोभते । १२४ उत्तमा आत्मना ख्याताः । १२५ न संतोषात्परं सुखम् । १२६ गतानुगतिको लोकः, न लोको परमार्थिकः । १२७ याचको याचकं दृष्ट्वा, श्वाननत्घुर्धुरायते । १२८ कन्याराशिस्थितो नित्यं, जामाता दशमो ग्रहः । १२९ दुस्त्यजं दंभसेवनम् । १३० पट्कर्णो भिद्यते मंत्रः । १३१ यत्र चात्मसुखं नास्ति, न तत्र दिवसं वसेत् । १३२ विद्यारूपं कुरूपानां, क्षमारूपं तपस्विनाम् । १३३ निःस्पृहस्य तृणं जगत् । १३४ बहुरत्ना वसुंधरा । १३५ संमिलने नयनयोर्नहि किंचिदस्ति । १३६ श्रेयांसि बहुविघ्नानि । १३७ पिष्टस्य पेपणं नास्ति, घृष्टस्य घर्पणं नहि । १३८ शुष्कं काष्ठं च मूर्खाश्च, भज्यन्ते न नमंति च । १३९ विपादप्यमृतं ग्राह्यम् । १४० सर्वत्र वायसाः कृष्णा, सर्वत्र हरिताः शुकाः । १४१ सरलता

हृदयस्य विभूषणम् । १४२ विनाश्रय न शोभन्ते, पडिता वनिता लता' । १४३ जिह्वाग्रे मित्रबान्धवा । १४४ लक्ष्मीर्वसति वाणिज्ये । १४५ प्रत्यक्षे गुरव स्तुत्या । १४६ सर्वनाशे समुत्पन्ने, ह्यर्धं त्यजति पडित । १४७ परेंगितज्ञानफला हि बुद्धय । १४८ छिद्रेष्वनर्था बहुलीभवन्ति । १४९ जयति जगति नाद पचमश्चोपवेदः । १५० शूचि भूमिगत तोय, शूचिर्नारी पतिव्रता। १५१ आत्मन' प्रतिकूलानि, परेषा न समाचरेत् । १५२ दृष्टिपूतं न्यसेत्पाद । १५३ पापी पापेन पच्यते । १५४ नव नव प्रीतिकर नराणाम् । १५५ नवनवगुणरागी, प्रायश सर्वलोक' । १५६ न हि सर्वत्र पाडित्य, सुलभ पुरुषे क्वचित् । १५७ बहुभिर्न विरोद्धव्य । १५८ आत्मा तु पात्रतां नेय , पात्रमायान्ति सपद । १५९ बालादपि हित ग्राह्यम् । १६० अधः कूपस्य खनक, ऊर्ध्वं प्रासादकारक । १६१ देशमाख्याति भाषणम् । १६२ विद्या मित्र प्रवासेषु, भार्या मित्रं गृहेषु च । १६३ न तत्र धनिनो यान्ति, यत्र यान्ति बहुश्रुता । १६४ याचना गतगौरवा । १६५ भिन्ने चित्ते कुत' प्रीति । १६६ व्यसनानन्तरं सौख्य, स्वल्पमप्यधिक भवेत् । १६७ आजन्म उन्मज्जति दुग्धसिन्धौ, तथापि काक किल कृष्ण एव । १६८ कुरूपता शीलतया विराजते । १६९ कुभोजन चोष्णतया विराजते । १७० अविवेक परमापदां पदम् । १७१ गुणलुब्धाः स्वयमेव संपद' । १७२ मौनेन कलहो नास्ति, न भय चास्ति जाग्रत । १७३ धन प्राणहर त्यजेत् । १७४ चिंता जरा मनुष्याणा । १७५ कृशे कस्यास्ति सौहृदम् । १७६ अव्यवस्थितचित्तस्य, प्रसादोऽपि भयंकर । १७७ ऋण कृत्वा घृत पिबेत् । (चार्वाकसिद्धात) १७८ पडितै' सह मित्रत्वं, कुर्वाणो नावसीदति । १७९ अगुणस्य हत रूप । १८० सद्य प्रीतिकरो नादः । १८१ ऋणकर्ता पिता शत्रु' पुत्र॰ शत्रुरपंडित । १८२ नास्ति क्रोधसमो वह्नि । १८३ तस्यो तदेव हि मधुर, यस्य मनो यत्र संलग्नम् । १८४ नीचो वदति न कुरुते, वदति न साधु करोत्येव । १८५ बीजेनैव भवेद् बीज, प्रदीपेन प्रदीपक । १८६ यादृशी

भावना यस्य, सिद्धिर्भवति तादृशी। १८७ महिलाचरियं न जाणंति। १८८ शान्तिः संन्यासिनां सुधा। १८९ भाग्यं फलति सर्वत्र। १९० योषितां यौवनं धनम्। १९१ यद्भाव्यं तद्भविष्यति। १९२ तृतीयं लोचनं ज्ञानं, द्वितीयो हि दिवाकरः। १९३ लोहो सव्वविणासणो। १९४ सहवासी हि विजानाति, सहवासिविचेष्टितम्। १९५ प्रायेण भूमिपतयः प्रमदा लताश्च, यत्पार्श्वतो भवति तत्परिवेष्टयन्ति। १९६ अपठाः पंडिताः केचित्, केचित्पठितपंडिताः। १९७ अपठा मूर्खकाः केचित्, केचित् पठितमूर्खकाः। १९८ धर्मदंभस्तु दुस्तरः। १९९ साक्षरा विपरीता राक्षसाः। २०० अपरीक्षितं न कर्तव्यं। २०१ स्त्रीणां च हृदये वार्ता, न तिष्ठन्ति कदाचन। २०२ शतं विहाय भोक्तव्यं। २०३ हस्तस्य भूषणं दानं। २०४ पीतनीरस्य किं नाम, मन्दिरादिकपृच्छया। २०५ वीरभोग्या वसुन्धरा। २०६ जितं हि केन ? मनो हि येन। २०७ चैत्रस्तु पुष्पपत्राणां कर्ता हर्ता च फाल्गुनः। २०८ यवागूजरणे, जाड्यं, मोदकानां तु का कथा ?। २०९ अप्रियस्य च पथ्यस्य, वक्ता श्रोता च दुर्लभः। २१० कालस्य कुटिला गतिः। २११ ब्राह्मणो भोजनप्रियः। २१२ अजापुत्रं बलिं दद्यात्, देवो दुर्बलघातकः। २१३ न धर्मात् परमं मित्रं। २१४ विवेकपरिभ्रष्टानां, भवति विनिपातः शतमुखः। २१५ शीलं हि सर्वस्य नरस्य भूषणम्। २१६ दीपः स्नेह विना, निशा शशि विना, धर्मं विना मानवाः। २१७ कुतः कुशलमस्माकं, गलत्यायुर्दिने दिने। २१८ सर्वं खलस्य चरितं मशकः करोति। २१९ विषया विश्वंचकाः। २२० भावना भवनाशिनी। २२१ यादृशं क्रियते कर्म, तादृशं प्राप्यते फलं। २२२ सद्यः शक्तिहरा नारी, सद्यः शुक्रकरं पयः। २२३ न च धर्मो दयापरः। २२४ नमः पतनशीलाय, मुशलाय खलाय च। २२५ वाचा विचलिता येन, सुकृतं तेन हारितम्। २२६ गर्जन्ति गगने मेघा, मयूरा नृत्यन्ति भूतले। २२७ अहिंसा परमो धर्मः। २२८ सुज्ञेषु किं बहुना ? २२९ विरक्तस्य तृणं भार्या। २३० शरीरमाद्यं खलु धर्मसा-

धनम् । २३१ वादे वादे जायते तत्त्वबोध । २३२ न तद्ध्यान न तन्मौन दया यत्र न विद्यते । २३३ श्रीशालिभद्रादपरो न भोगी, श्रीस्थूलभद्रादपरो न योगी । २३४ बुद्धे फल तत्त्वविचारण च । २३५ ससर्गजा दोषगुणा भवति । २३६ मन एव मनुष्याणा, कारण बधमोक्षयो । २३७ दानेन पाणिर्न तु कङ्कणेन । २३८ कल्लोलचपला लक्ष्मी' । २३९ सत्यपूत वदेद्वाक्य । २४० वस्त्रपूत जल पिबेत् । २४१ मणुआण धम्मसामग्गी । २४२ भाग्याधिक नैव नृपो ददाति । २४३ पदे पदे निधानानि । २४४ निर्द्रव्य क्वापि नार्घ्यते । २४५ यस्यास्ति वित्त स नर. कुलीनः । २४६ सर्वे गुणा काचनमाश्रयन्ते । २४७ अन्यायोपार्जित वित्त, दश वर्षाणि तिष्ठति । २४८ मोहा धकारसहारे, ज्ञानमार्तण्डमडलम् । २४९ नश्यन्ति पचपरमेष्ठिपदैर्भयानि । २५० नमस्कारसमो मत्रो, न भूतो न भविष्यति । २५१ यत्नानुसारिणी विद्या । २५२ दारिद्र्यनाशन दान । २५३ औदार्येण विना पुसा, सर्वाऽन्या निष्फला कला । २५४ स्त्रीणा श्रीणा च ये वश्यास्तेऽवश्य पुरुषाधमाः । २५५ स्त्रिय श्रियश्च यद्वश्यास्तेऽवश्य पुरुषोत्तमा । २५६ महिलासगेण नासए बभ । २५७ विणओ सासणे मूल । २५८ विद्या विनयेन शोभते । २५९ अय निज परो वेत्ति, गणना लघुचेतसा । २६० धर्म चतुर्धा मुनयो वदन्ति । २६१ ब्रह्मचारी सदा शुचिः । २६२ पुण्यं भावानुसारत । २६३ भावेषु विद्यते देवो । २६४ शतेषु जायते शूर , सहस्रेषु च पडित' । २६५ शक्रादयोऽपि विजितास्त्वनला' कथ ता ? । २६६ धर्मेण हीना पशुभि समाना' । २६७ रे दारिद्र्य ! नमस्तुभ्य सिद्धोऽह त्वत्प्रसादत । २६८ कर्तव्यमेव कर्तव्य, प्राणै कठगतैरपि । २६९ गत न शोचामि । २७० मूर्खस्य हृदय शून्य । २७१ धर्मारंभे ऋणच्छेदे कालक्षेप न कारयेत् । २७२ नास्ति जागरतो भयम् । २७३ वर्धते यद्वर्धोऽपि, तत्प्रभावो धनस्य च । २७४ नार्यः समाश्रितनन हि कलंकयन्ति । २७५ स्वश्लाघा परनिन्दा तु, लक्षण निर्गुणात्मनाम् । २७६. परश्लाघा स्वनिन्दा तु, लक्षणं

सद्गुणात्मनाम् । २७७ गुणैरुत्तमतां याति, न तु जातिप्रभावतः । २७८ समानशीलव्यसनेषु सख्यम् । २७९ युक्तिमद् वचनं यस्य, तस्य कार्यः परिग्रहः । २८० फलं नैव विना तरुम् । २८१ प्रियवाक्यप्रदानेन, सर्वे तुष्यन्ति जंतवः । २८२ त्रिदशा अपि वंच्यंते, दाम्भिकैः किं पुनर्नराः ? । २८३ कृतो हि संग्रहो लोके, काले स्यात् फलदायकः । २८४ स्वकर्मनिरताः सर्वे, नान्यशिक्षामपेक्षन्ते (ते) । २८५ वरं प्राणपरित्यागो, न मानपरिखंडनम् । २८६ एको ध्यानमुभौ पाठं, त्रिभिर्गीतं चतुः पथम् । २८७ सगुणं निर्गुणं नैव, गणयन्ति दयालवः । २८८ अज्ञः सुखमाराध्यः । २८९ असारे संसारे सारं सारंगलोचना । २९० झटिति पराशयवेदिनो हि विज्ञाः । २९१ गृहस्थानां यद् भूषणं तत्साधूनां दूषणम् । २९२ कालस्य त्वरिता गतिः । २९३ कोकिलानां स्वरं रूपं । २९४ प्रस्तावसदृशं वाक्यं, यो जानाति स पंडितः । २९५ दिवा निरीक्ष्य वक्तव्यं, रात्रौ नैव च नैव च । २९६ परदुःक्खे दुःक्खिया विरला । २९७ स्त्रीणां द्विगुण आहारो, कामश्चाष्टगुणः स्मृतः । २९८ मूर्खा निन्दन्ति पंडितान् । २९९ चौरा निन्दन्ति चन्द्रमसम् । ३०० शठं प्रति शाठ्यं कुर्यात् । ३०१ सद्विद्या यदि किं धनैरप-यशो यद्यस्ति किं मृत्युना ? । ३०२ अन्यस्थाने कृतं पापं, धर्मस्थाने विनश्यति । ३०३ धर्मस्थाने कृतं पापं, वज्रलेपो भवि-ष्यति । ३०४ गुणा गुणज्ञेषु गुणा भवन्ति । ३०५ ज्ञानेन देही द्रविणेन गेही । ३०६ अर्थलुब्धकृतघ्नौ सुलभौ तौ गृहे गृहे । ३०७ दाता चोत्तरदाता च, दुर्लभौ पुरुषावुभौ । ३०८ कर्मणो हि प्रधानत्वं । ३०९ अत्युग्रपुण्यपापानामिहैव लभते फलम् । ३१० पुरुषस्य जरा पंथाः । ३११ प्रारभ्यते न खलु विघ्नभयेन नीचैः । ३१२ वैद्यराज ! नमस्तुभ्यं, यमराजसहोदर । ३१३ विक्रीयन्ते न घण्टाभि–र्गावः क्षीरविवर्जिताः । ३१४ जलधिजलमपेयं पंडिते निर्धनत्वं । ३१५ मुच्यन्ते नैव कर्म्मणा । ३१६ स्वार्थभ्रंशो हि मूर्खता । ३१७ कुपुत्रेण कुलं नष्टं । ३१८ ग्रामो नास्ति कुतः सीमा, भार्या नास्ति कुतः सुतः ? ।

३१८ अलमम्य कुतो निद्रा ? । ३१९ निगधधूपेन जयेत् पिशाचान्, सुगधधूपेन् जयेद्धि देवान् । ३२० दृष्टानपि सतो दोषान् मन्यन्ते न हि रागिण । ३२१ स्वहस्तेन च यद् दत्त, लभ्यते तन्न सशय । ३२२ धर्मोऽय धनवल्लभेषु धनद , कामार्थिना कामद' । ३२३ कलेवरे मूत्रपुरीषभाजने, लिंपन्ति मूढा विरमन्ति पडिता' । ३२४ कृपणेन सचिता लक्ष्मीरपरै परिभुज्यते । ३२५ क्रियासिद्धि सत्त्वे भवति महता नोपकरणे । ३२६ अगीकृत सुकृतिन परिपालयन्ति । ३२७ रिक्तपाणिर्न पश्येच्च, राजान देवता गुरुम् । ३२८ फलन फलमान्विशेत् । ३२९ आस्तन्यपानाजननी पशूनाम् । ३३० शीलपर भूषणम् । ३३१ प्रकृर्ति यान्ति भूतानि, निग्रह कि करिष्यति । (गीताजी) ३३२ भोगे रोगभय । ३३३ वैराग्यमेवाभयम् । ३३४ अपूर्व कोऽपि कामान्धो, दिवा नक्त न पश्यति । ३३५ दुर्गतौ प्रपतत्प्राणिनो धारयतीति धर्म । ३३६ मर्दन गुणवर्धनम् । ३३७ क्षणे क्षणे यन्नवतामुपैति तदेव रूप रमणीयताया । ३३८ लोकद्वयविरुद्ध च, परस्त्रीगमन त्यजेत् । ३३९ निर्द्रव्यो धनचिंतया धनपतिस्तद्रक्षणे चाकुलो । ३४० अध्यात्मविद्या विधानाम् । ३४१ तीर्थेषु माता तु मता नितान्तम् । ३४२ जिह्वाग्रे मधु तिष्ठति हृदय तु हलाहलम् । ३४३ अजातमृतमूर्खाणा, वरमाद्यौ न चान्तिम' । ३४४ तातस्य कूपोऽयमिति ब्रुवाणा , क्षार जल कापुरुषा पिबन्ति । ३४५ पत्र नैव यदा करीरविटपे दोषो वसतस्य किम् । ३४६ नोलूकोऽप्यवलोकते यदि दिवा, सूर्यस्य कि दूषणम् ? । ३४७ चतुर सखि मे भर्ता यल्लिखति तत् परो न वाचयति । ३४८ तस्मादप्यधिको मे, स्वयमपि लिखित स्वयं न वाचयति । ३४९ विना गोरस को रसो भोजनानाम् । ३५० दर्दुरा यत्र वक्तार , तत्र मौन हि शोभनम् । ३५१ तावच्च शोभते मूर्खो, यावत् किंचिन भाषते । ३५२ स्वगृहे पूज्यते मूर्ख । ३५३ स्थान प्रधान न बल प्रधान, स्थानस्थित कापुरुषोऽपि शूर' । ३५४ पुण्यस्य फलमिच्छन्ति, पुण्य नेच्छन्ति मानवाः । ३५५ पयोऽपि शौण्डिनीहस्ते, मदिरा

मन्यते जनः । ३५६ क्वचिद् विद्वद्गोष्ठी, क्वचिदपि सुरामत्तकलहः । ३५७ क्वचिद् वीणावाद्यं, क्वचिदपि च हाहेति रुदितम् । ३५८ किं तद्द्रव्यं कोकिलेनोपनीतं, को वा लोके गर्दभस्यापराधः । ३५९ छिद्रेष्वनर्था बहुलीभवन्ति । ३६० शुक! पंजरबंधस्ते, मधुराणां गिरां फलम् । ३६१ पुष्पेषु चंपा, नगरीषु लंका, नदीषु गंगा च नृपेषु रामः । ३६२ भारं स वहते तस्य, ग्रंथस्यार्थं न वेत्ति यः । ३६३ किं न कुर्वन्ति दुर्जनाः ? । ३६४ व्याधितस्यौषधं पथ्यं, नीरोगस्य किमौषधैः । ३६५ विषं भवतु वा मा वा, फणाटोपो भयंकरः । ३६६ नष्टं चैव मृतं चैव, नानुशोचंति पंडिताः । ३६७ इच्छति शती सहस्रं । ३६८ लोभः पापस्य कारणम् । ३६९ राजा कालस्य कारणम् । ३७० क्षमया किं न सिध्यति ? । ३७१ दुर्बलस्य बलं राजा । ३७२ बलं मूर्खस्य मौनित्वं । ३७३ उपकारः परो धर्मः परो मोक्षो वितृष्णता । ३७४ दुर्मंत्री राज्यनाशाय, सर्वनाशाय दुर्जनः। ३७५ साधूनां दर्शनं पुण्यं । ३७६ मद्यपस्य कुतः सत्यं, दया मांसाशिनः कुतः । ३७७ वनेऽपि दोषाः प्रभवन्ति रागिणां । ३७८ निवृत्तरागस्य गृहं ततो वनम् । ३७९ चिन्तामणिं पातयति प्रमादात् । ३८० कन्यापितृत्वं खलु नाम कष्टम् । ३८१ न करोति यमः क्षांतिम् । ३८२ दोषाश्चापि गुणा भवन्ति हि नृणां योग्ये पदे योजिताः । ३८३ दारिद्र्यं जगदपकारकमिदं केनापि दग्धं न हि । ३८४ गृह्यन्ते न विभूतिमिश्च ललना दुःशीलचित्ता यतः । ३८५ सत्याद्रज्जूयते फणी । ३८६ ये तु घ्नंति निरर्थकं परहितं ते के न जानीमहे । ३८७ सर्वमेव वृथा तस्य, यस्य शुद्धं न मानसम् । ३८८ त्यजन्ति मित्राणि धनैर्विहीनं । ३८९ परान्नं प्राप्य दुर्बुद्धे, मा प्राणेषु दयां कुरु । ३९० त्रयः स्थानं न मुंचंति, काका कापुरुषा मृगाः । ३९१ विरोधो नैव कर्तव्यः । ३९२ देशत्यागश्च दुर्जनात् । ३९३ शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वम् । ३९४ स्त्रीणां गुह्यं न वक्तव्यं, प्राणैः कंठगतैरपि । ३९५ चिन्तया नश्यते बुद्धिः, चिन्तया नश्यते बलम् । ३९६ अर्थानामर्जने दुःखमर्जितानां च रक्षणे ।

कलिकालसर्वज्ञहेमचन्द्रसूरिकृतत्रिषष्ठिगतानि वचनामृतानि

प्रथम सर्गः

१ महात्मना कीर्त्तन हि श्रेयो नि श्रेसास्पदम् । २९ । २ जडानामुदये हन्त! विवेक कीदृशो भवेत् ? । ९४ । ३ नहि सीदन्ति कुर्वन्तो देशकालोचिता क्रियाम् । १०१ । ४ अतिदु खातिसौख्ये हि तस्या' प्रथमकारणम् । १०७ । ५ सर्वसहा महान्तो हि सदा सर्वसहोपमा । १३० । ६ धीमन्तो ह्याशुकारिण॰ । २२४ । ७ भवन्ति हि महात्मानो गुर्वाज्ञाभङ्गभीरव । २६७ । ८ नीयन्ते यत्र तत्रैते यान्ति सारणिवन्नृपा । २९२ । ९ कदली नन्दति कियद् बदरीतरुसंनिधौ ? । ३०८ । १० यदाहार इवोद्गारैर्गिरा भावोऽनुमीयते । ३२५ । ११ स्वार्थभ्रंशो हि मूर्खता । ३३३ । १२ कारणस्यानुरूप हि कार्यं जगति दृश्यते । ३५४ । १३ प्रत्यक्षेऽपि प्रमाणे किं प्रमाणान्तरकल्पना ? । ४०६ । १४ पूर्वोपार्जितपुण्याना फलमप्रतिम खलु । ४११ । १५ पुण्यच्छेदेऽथवा सर्वं प्रयाति विपरीतताम् । ४१५ । १६ अनुकूलनिदेशो हि सतामुत्साहकारणम् । ४२१ । १७ कीदृशं कूपखनन सद्यो लग्ने प्रदीपने ? । ४४९ । १८ आयु कर्मणि हि क्षीणे नेन्द्रोऽपि स्थातुमीश्वर । ५१५ । १९ धीरा प्राणावसानेऽपि नहि यान्तीदृशीं दशाम् । ५२३ । २० प्रायेण हि दरिद्राणा शीघ्रगर्भभृत स्त्रिय । ५३३ । २१ जन्तोर्नैवाहतस्यापि मृत्युर्नात्रुटितायुष । ५४२ । २२ तीर्थानि, सर्वसाधारणानि यत् । ५५३ । २३ मतिर्गत्यनुसारिणी । ५५४ । २४ अन्ते, या मति सा गति किल । ५९९ । २५ तापे, रत्यै छाया हि जायते । ६०१ । २६ आसन्ने व्यसने लक्ष्म्या लक्ष्मीनाथोऽपि मुच्यते । ६०४ । २७ प्रकृतिव्यत्यय प्रायो भवत्यन्ते शरीरिणाम् । ६०५ । २८ भाविकार्यानुसारेण वागुच्छलति

जल्पताम् । ६०६ । २९ नालभ्यं लभ्यते क्वचित् । ६१८ । ३० व्याधेरन्यस्य न ह्यन्यदौषधं जातु शान्तिकृत् । ६४१ । ३१ न ह्यज्ञातस्य रोगस्य चिकित्सा जातु युज्यते । ६४६ । ३२ अन्यानुभूतं नह्यन्यो जनो जानाति जातुचित् । ६८१ । ३३ अस्वातन्त्र्यं कुलस्त्रीणां धर्मो नैसर्गिको यतः । ६८४ । ३४ ......नयज्ञा हि, प्रस्तुतार्थेषु तत्पराः । ६९७ । ३५ प्रव्रज्या दीपिकेवात्तमात्रापि हि तमश्छिदे । ७०९ । ३६ .....तैर्हि किं नाभेद्यं जलैरिव ? । ७१२ । ३७ एकचिन्ताविपन्नानां गतिरेका हि जायते । ७१६ । ३८ .....कायानपेक्षा हि मुमुक्षवः । ७३५ । ३९ ...विचिकित्सन्ति, न हि जातु चिकित्सकाः । ७६० । ४० योग्यमुग्रस्य हि व्याधेः शान्त्यामत्युग्रमौषधम् ७६२ ४१ सर्वत्राद्रोहता सताम् । ७६६ । ४२ न वज्रपञ्जरेऽप्यस्ति, स्थानं रुष्टे बलीयसि । ७७३ । ४३ ......अधमस्था-नमधमानां हि युज्यते । ७७४ । ४४ नास्था कापि हि तादृशाम् । ७७७ । ४५ न हि मोहो महात्मनाम् । ७८८ । ४६ न सामन्यफलं तपः । ७८९ । ४७ ...अच्यवनं, नहि मोक्षं विना-क्वचित् । ७९० । ४८ स्नेहः प्राग्भवसम्बद्धो, ह्यनुबध्नाति बन्धुताम् ॥ ७९६ ॥ ४९ प्रादुर्भवन्ति महतां स्वयमेव यतो गुणाः ॥ ७९९ ॥ ५० आत्मानुरूपः कर्तव्यः सारथिर्हि महारथैः ॥ ८०८ ॥ ५१ सम्पद्धि पुण्यमानेनाम्भोमानेनेव पद्मिनी ॥ ८११ ॥ ५२ भृत्याः स्वाम्यनुगामिनः ॥ ८३५ ॥ ५३ क्षयोपशमवैचित्र्याचित्रा हि गुणसम्पदः ॥ ८३७ ॥ ५४ मुमुक्षवो निराकाङ्क्षा वस्तुपूपस्थितेष्वपि ॥ ८८१ ॥

द्वितीयः सर्गः

१ प्रजा राजानुयायिनी । १४ । २ व्याघ्रा अपि पलायन्ते ज्वलज्ज्वलनदर्शनात् । २३ । ३ वणिजो लोकसामान्येऽप्यर्थे साऽऽशङ्कवृत्तयः । ३५ । ४ मन्दभाग्यतया पुंसां गुरवः स्युरनीदृशाः । ४४ । ५ कृतं तेन कृतेनापि गुर्वाज्ञा यत्र लङ्घ्यते ।

४६ । ६ खला सर्वंकषा खलु । ५३ ॥ ७ एकत्र निनिवेशेऽपि काच' काचो मणिर्मणि' । ५४ ॥ ८ दुर्लक्षा हि पराशया' । ५५ ॥ ९ विपरीत न शङ्कन्ते, कदापि सरलाशया । ६३ ॥ १० सत्कारयन्ति ह्यात्मान कृत्वाऽप्यागासि मायिन । १०३ ॥ ११ वन्ध्याऽप्युन्मूल्यते नैव लता या लालिता स्वयम् । १०५ ॥ १२ अस्तमीयुपि पीयूषकरे तिष्ठेन्न चन्द्रिका । १६९ ॥ १३ रोगे त्वेकौषधासाध्ये देयमेवौषधान्तरम् । १७८ ॥ १४ प्रायो महात्मना पुत्रा' स्युर्महात्मान एव हि । १९१ ॥ १५ शरत्काल-वशादिन्दुकरा स्युरधिकश्रिय । २६२ ॥ १६ सर्वतोऽपि शाम्यन्ति सन्तापा' प्रावृडागमात् । २६३ ॥ १७ अर्हतामुदय' केषां न स्यात् सन्तापहारक । ३३४ ॥ १८ अयोऽपि यानपात्रस्थ पार प्राप्नोति वारिधे' । ३३६ ॥ १९ स्वाम्यग्रे नासनात्यय' । ३८४ ॥ २० नैसर्गिकी हि भवति द्युसदा कामरूपिता । ३७९ ॥ २१ उपायन हि प्रथमं प्रणाम स्वामिदर्शने । ४०८ ॥ २२ भक्तौ न पुनरुक्तता । ४०९ ॥ २३ तादृक् स्वाम्यासिजानन्द' शक्यते केन गोपितुम् ? । ५६८ ॥ २४ अपुनर्जन्मनो जन्म तु खच्छिद् विश्वजन्मिनाम् । ६०३ ॥ २५ स्वयम्भुरमणाम्भोधेर्मातुमम्भासि क क्षम ? । ६०९ ॥ २६ आज्ञा ह्याज्ञाप्रचण्डानां वचसा सह सिद्ध्यति । ६२३ ॥ २७ नृणा लोकोत्तराणा हि बाल्य वपुरपेक्षया । ६६४ ॥ २८ तुलमप्यल्पभारत्वादाकाशमनु-धावति । ७३८ ॥ २९ जाताऽपत्यानि युग्मानि जीवन्ति कियदेव हि ? । ७४३ ॥ ३० परार्थाय, महता हि प्रवृत्तय' । ८८१ ॥ ३१ सद्वेदनीयमपि हि न कर्म क्षीयतेऽन्यथा । ८८२ ॥ ३२ मर्यादोल्लङ्घिना लोके राजा भवति शासिता ।८९७ ॥ ३३ विश्वस्य सुखसृष्टयै हि महापुरुषसृष्टय' । ९५३ ॥ ३४ सर्वकल्पद्रुमस्थाने ह्येक कल्पद्रुम प्रभु । ९५५ ॥ ३५ पात्रे, विद्या हि शतशाखिका । ९६१ ॥ ३६ ध्रुवो ह्यभ्या महत्कृत । ९६९ ॥ ३७ अन्तरेणोपदेष्टार पश्यन्ति नरा अपि । ९७३ ॥ ३८ एकैव दण्डनीतिर्हि सर्वान्यायाहिजाङ्गुली । ९७९ ॥

तृतीयः सर्गः

१ याश्चामेकान्तभक्तानां स्वामिनः खण्डयन्ति न ॥ ७१ ॥ २ निर्ममा हि न लिप्यन्ते कस्याप्यैहिकचिन्तया ॥१३९॥ ३ ......अचिन्त्यप्रभावाः प्रभवः खलु ॥ २९४ ॥ ४ नैकत्र, तिष्ठेत् छद्मस्थतीर्थकृत् ॥ ३३० ॥ ५ यत् कुर्वन्ति महान्तो हि तदाचाराय कल्पते ॥ ५३३ ॥ ६ गुरूपदेशः साक्ष्येव प्रायेण लघुकर्मणाम् ॥ ६५३ ॥ ७ नहि भोगफले कर्मण्यभुक्ते भवति व्रतम् ॥ ६५५ ॥

चतुर्थः सर्गः

१ मन्यन्ते क्षत्रियाः ह्यस्त्रं प्रत्यक्षमधिदैवतम् ॥ २ ॥ २ पूजितैः पूज्यमानो हि केन केन न पूज्यते ? ॥ १३ ॥ ३ यथा-विधिविधिज्ञा हि विस्मरन्ति विधिं नहि ॥ ८८ ॥ ४ ...महान्तो हि, सेवोपनतवत्सलाः ॥ १५० ॥ ५ लोके महत्त्वदानाय महन्त्यात्मीयमीश्वराः ॥ १९४ ॥ ६ प्रभोः प्रसादचिह्नं हि प्राभृतादानमादिमम् ॥ २११ ॥ ७ आदौ सामन्तमात्रस्याप्युचिताः प्रतिपत्तयः ॥ २१४ ॥ ८ अलुब्धा अपि गृह्णन्ति भृत्यानुग्रहहेतुना ॥ २३४ ॥ ९ महान्तो नावजानन्ति नृमात्रमपि संश्रितम् ॥ २३५ ॥ १० ...कृतार्था अपि भूभुजः । न त्यजन्ति दिशोर्दण्डं चिन्हं दिग्विजयश्रियः ॥ २४४ ॥ ११ प्रभवः प्रणिपातेन गृहीताः किं न कुर्वते ? ॥ २४७ ॥ १२ सिंहः प्रयाति यत्रापि तस्यौकः स्वं तदेव हि ॥ २८४ ॥ १३ ...सर्वास्तपोमूला हि सिद्धयः ॥ २८७ ॥ १४ महान्तः शक्तिवन्तोऽपि प्रथमं साम कुर्वते ॥ २९० ॥ १५ मनागपसरत्येव प्रजिहीर्षुर्गजोऽपि हि ॥ २९४ ॥ १६ ...उत्तमानां हि, प्रणामावधयः क्रुधः ॥ ४५७ ॥ १७ ...कार्यसिद्धेस्तपो मङ्गलमादिमम् ॥ ४६४ ॥ १८

युद्धार्या यज्ञयश्रिय । ५०९ ॥ १९ सेवावृत्तिर्न लज्जायै स्वामिनस्वामिनन्दने । ५१३ ॥ २० गृहागते स्वामिनि हि किमदेयं महात्मनाम् ? । ५३५ ॥ २१ उपचार' समर्थानां सद्यो भवति सिद्धये । ५४० ॥ २२ राज्य तपसाऽऽप्तमपि तपसैव हि नन्दति । ६७३ ॥ २३ रत्न पञ्चदश ह्याज्ञा चक्रिण कार्यसिद्धिषु । ७०० ॥ २४ गृहोद्द्योतकरो दीप किं नो द्योतयते घटम् ? । ७९२ ॥ २५ विनीतानामलङ्घ्या हि मर्यादा स्वामिदर्शिता । ८१९ ॥ २६ अतृप्ता एव कुर्वन्ति सेवां मानविघातिनीम् । ८२४ ॥ २७ किमार्त्त कुरुते नहि ? । ८४० ॥

पञ्चम' सर्ग'

१ उपादेया शास्त्रलोकव्यवहारानुगा हि गी । २३ ॥ २ शूरैरपि वार्त्तितव्य गुरौ हि सभयैरिव । १०० ॥ ३ सु स्वामी, गृह्णाति स्वलित नहि । १०५ ॥ ४ विमृश्यकारिण: सन्त' किं दूष्यन्ते खलोक्तिभि ? । १३७ ॥ ५ यदवद्धमुखो जन । १४४ ॥ ६ किं नाम भेषज कुर्याद् विकारे सान्निपातिके ? । २१६ ॥ ७ तेषा तेजो हि जीवितम् । २४३ ॥ ८ एकदाऽपि सती लुप्तशीला स्यादसती सदा । २४५ ॥ ९ युक्त वचोऽपरस्यापि मन्यन्ते हि मनीषिण । २६२ ॥ १० अहो ! अखण्डप्रसरा कषाया महतामपि । २७५ ॥ ११ सर्वेऽपि मणिताभाज' कर्करा अपि रोहणे । २९३ ॥ १२ वायुतोऽपि भृशायन्ते समरोत्कण्ठिता' खलु । २९७ ॥ १३ स्वतोऽपि ह्यधिका रक्षा भटा कुर्वन्ति वाहने । ३३६ ॥ १४ हेषा हि जयसूचिनी । ३३८ ॥ १५ सरथ्या अपि हि रथा निष्फला सारथिं विना । ३४४ ॥ १६ गरीयांस', कार्ये मुह्यन्ति न क्वचित् । ३६४ ॥ १७ लब्धा अपि हि वालानां युक्ता एव गिरो गुरौ । ३९७ ॥ १८ अयोऽपि हेमीभवती स्पर्शात् सिद्धरसस्य हि ।

३९८ ॥ १९ कार्यं हि खलु कारणात् । ४५१ ॥ २० सति भूयसि किं तैले शैलाभ्यङ्गो विधीयते ? ४६० ॥ २१ धनमात्र-कृते हन्त ! परद्रोहं करोति कः ? । ४९० ॥ २२ विचित्रा हि रणे गतिः । ५४७ ॥ २३ ...भक्तिर्ह्यपदेऽपीक्ष्यते भयम् । ५५५ ॥ २४ स्वाम्याज्ञा हि वलीयसी । ५६४ ॥ २५ कस्य दुःखाकरो न स्याद् महतां ह्यापदागमः ? । ६३१ ॥ २६ नोज्झन्ति मानिनो मानं यावज्जीवं मनागपि । ६६१ ॥ २७ तिरोहितः काण्डपटेनाप्यर्थो न हि दृश्यते । ७८१॥ २८ अमूढलक्ष्या अर्हन्तः समये ह्युपदेशकाः । ७८४ ॥

षष्ठः सर्गः

१ युज्यन्ते हि मृगैर्मृगाः ॥ ३७ ॥ २ कालादनूपरत्वं हि व्रजत्यूपरभूरपि ॥ ३८ ॥ ३ यान्ति दीपस्य सम्पर्काद् वर्त्त-योऽपि हि दीपताम् ॥ १७४ ॥ ४ कामरूपा हि नाकिनः ॥ २१५ ॥ ५ भक्तौ स्नेहे च सतां कर्त्तव्यं तुल्यमेव हि॥ २२४॥ ६ कर्म भोगफलं कोऽपि नान्यथा कर्त्तुमीश्वरः ॥ २३६ ॥ ७ पूजितैः पूजितो यस्मात् केन केन न पूज्यते ॥ ? ॥ २४६ ॥ ८ हस्तिभिर्हस्तिभारो हि वोढुं शक्येत नापरैः ॥ २५४ ॥ ९ दिने दिने कल्पतरुर्ददानो न हि हीयते ॥ २६१ ॥ १० शशिनं पश्यतां दृष्टिर्मन्दाऽपि हि पटूयति ॥ २६३ ॥ ११ क्षौमस्य क्षालितं द्विस्त्रिर्ह्यतिनैर्मल्यकारणम् ॥ ४३८ ॥ १२ सर्वसाधारणं तपः ॥ ४४२ ॥ १३ वेद्यते वेदना नैव हर्षेणेव शुचाऽपि यत् ॥ ४६६ ॥ १४ न तापो मानसो जातु सुधावृष्ट्यापि शाम्यति ॥ ४६९ ॥ १५ समा हि समदुःखानां चेष्टा भवति देहिनाम् ॥ ४९७ ॥ १६ यत्र तत्र प्रसक्तानां प्रभूणां को हि बाधकः ? ॥ ७१३ ॥ १७ महद्भ्यो महतामृद्धिमपि शंसन्त्यचेतनाः ॥ ७३९ ॥ १८ स्वामिवत् स्वामिपुत्रेऽपि भक्ता हि प्रतिपत्तिदाः ॥ ७४० ॥ १९ न जातु वन्द्यते प्राप्तकेवलोऽपि ह्यदीक्षितः ॥ ७४४ ॥

द्वितीयपर्व प्रथम सर्ग

१ चिकित्स्यते हि निपुणैरङ्गोद्भवमपि व्रणम् । २७ ॥ पात्रे बहुफलं तद्धि । ३८ ॥ ३ गौ. पालकविशेषेण काम दुग्धे विशिष्यते । १४ ॥ ४ निश्चिते कार्ये नालसन्ति मनस्विन । १४३ ॥ ५ चक्षुष्मानपि किं कुर्यादन्धकारे प्रसृत्वरे ? । १५१ ॥ ६ गुर्वाज्ञा हि कुलीनाना विचारमपि नार्हति । १८८ ॥ ७ गुर्वाज्ञाकरण सर्वगुणेभ्यो ह्यतिरिच्यते । १९४ ॥ ८ पितृत क' परो लोकेऽनुल्लङ्घ्यवचनो भवेत् ? । १९५ ॥ ९ शक्रोऽपि हि श्रियासक्त किं पुनर्मानवो जन' ? । २१८ ॥ १० अगृध्नोरनुगा लक्ष्म्य । २२० ॥

द्वितीय सर्ग

१ महापुमासो गर्भस्था अपि लोकोपकारिण' । १०६ ॥ २ जायते घृष्यमाणाद्धि दहनश्चन्दनादपि । २३८ ॥ ३ कामरूपा दिवौकस' । ३३८ ॥

तृतीय' सर्ग

१ नह्यर्हन्त' स्तनधया' । २ त्रिज्ञाना हि स्वतो जिना' । २२ ॥ ३ भावतोऽपि यतिर्यति । ९०॥ ४ सतां ह्यलङ्घ्या गुर्वाज्ञा । ९३ ॥ ५ निर्धनस्य सुभिक्षेऽपि दुर्भिक्षं पारिपार्श्विकम् । ८६६ ॥ ६ , वाचा, ह्याप्ताधीना प्रमाणता । ९०० ॥ ७ धर्मे धर्मोपदेष्टारः साक्षिमात्र शुभात्मनाम् । ९०७ ॥ ८ स्वर्णीस्यातां सिद्धरसात् सीसकत्रपुणी अपि । ९०८ ॥

चतुर्थः सर्गः

प्रयान्ति ह्युत्तमस्थाने भूषणान्यपि भूष्यताम् ॥ ३२ ॥ २ ...स्वामिदत्तमाहात्म्याः खलु सेवकाः ॥ ८२ ॥ ३ ...भक्ते-ष्वीशा हि प्रतिपत्तिदाः ॥ १०८ ॥ ४ महात्मनां महर्द्धीनामुत्सवा हि पदे पदे ॥ १३५ ॥ ५ ...कृत्यं, महान्तो न त्यजन्ति हि ॥ १४६ ॥ ६ तादृशामभियोगे हि कम्पन्ते पर्वता अपि ॥ १४७ ॥ ७ सेवनीयाश्चक्रिणो हि देवैरपि नरैरिव ॥ १५० ॥ ८ कृष्टाश्चेव्य इवायान्ति शक्त्या शक्तिमतां श्रियः । १७५ ॥ ९ प्रायस्तपोग्राह्या हि देवताः । १७८॥ १० प्रणिपातावसानो हि कोपाटोपो महात्मनाम् । २३९ ॥ ११ ....नास्ति, विदेशः कोऽपि दोष्मताम् । २४५ ॥ १२ तुष्यन्ति हि महीयांसः सेवा-मन्या गिराऽपि हि । २७२ ॥ १३ अनुत्सुकानां शक्तानां लीलापूर्वाः प्रवृत्तयः । २८७ ॥ १४ महात्मानः प्रणयिनां प्रणयं खण्डयन्ति न । ३५१ ॥

पञ्चमः सर्गः

१ ....निजे सद्मन्युत्कण्ठा हि बलीयसी । १३ ॥ २ विमर्शः क्वाल्पमेधसाम् ? । १४ ॥ ३....सामवागम्भः, कोपाग्नेः शमनं सताम् । १५५ ॥ ४ लोके स्यादनुकम्पायै सागसामपि निग्रहः । १७७ ॥

षष्ठः सर्गः

१ अभ्रादपि पतितानां शरणं धरणी खलु । १२ ॥ २ कालो हि दुरतिक्रमः । १३६ ॥ ३ पितुर्मातुश्च तुल्यं हि दुःखं

सुतवियोगजम् । १७२ ॥ ४ यत्राकृतिस्तत्र गुणा इत्यर्मा अप्यधीयते । २२६ ॥ ५ युक्त प्राणिपु कारुण्य सर्वेष्वपि महात्मनाम् ३३१ ॥ ६ नारीपरिभव राजन् सहन्ते पशवोऽपि न । ३८९ ॥ ७ स्वाधीनं ह्यात्मसाधनम् । ४४५ ॥ ८ जीवन्ति च म्रियन्ते च समं पत्या पतिव्रताः ॥ ४४७ ॥ ९ विमृश्य हि विधातव्यमल्पीयेऽपि प्रयोजने ॥४५३॥ १० नाल दग्धुकक्षमग्निर्विना वायु ज्वलन्नपि ॥ ४८५ ॥ ११ न हि प्रमाणे प्रत्यक्षे प्रमाणान्तरकल्पना ॥ ५०९ ॥ १२ अदर्शितपथ याति पायो ह्यघवदुत्पथे ॥ ५४२ ॥ १३ निसर्गेण विनीतस्य शिक्षा सद्भित्तिचित्रवत् ॥ ५५५ ॥ १४ सोऽध्वा यो महदाश्रित. ॥ ५८२ ॥ १५ सर्वत्र कुशल सताम् ॥ ५९५ ॥ १६ तुल्या भूस्तुल्यकर्मणाम् ॥ ५९७ ॥

तृतीयपर्वं प्रथम सर्ग

१ विवेकिनां विवेकस्य फल ह्यौचित्यवर्त्तनम् ॥ ९ ॥ २ नदीवन्न नदीभर्तुरुत्सेकाय घनागमः ॥ १० ॥ ३ पात्रोपकारे प्रथम महता यदुपक्रमः ॥ ३७ ॥

द्वितीय सर्ग

१ महता यस्मात्, पुण्य पुण्यानुबन्धकम् ॥ ९ ॥ २ सरिदम्भोभिरम्भोधि' किं माद्यति मनागपि ? ॥ ३६ ॥ ३ पतिव्रतात्वे व्रतवदतिचारस्य भिरव ॥ ४६ ॥

तृतीय सर्ग

१ प्रतिमाया प्रभावोऽधिष्ठातृदेवोचित' खलु ॥ ५३ ॥ २ दैवस्य विपमा गति. ॥ १४५ ॥ ३ कोकिलायाः खल्वपत्य

काक्या पुष्टोऽपि कोकिलः ॥ १७६ ॥

चतुर्थः सर्गः

१ आश्रीयन्ते मृत्युकाले पक्षाभ्यामिव कीटिकाः ॥ १६० ॥ २ अपथ्यान्यपि यत्नेन स्पृहयन्ति मुमूर्षवः ॥ १६१ ॥ ३ शिष्या गुरूणां कूपानामाह्नावा इव तत्क्रियाः ॥ १७८ ॥

पञ्चमः सर्गः

१ न स्थानव्यत्ययो जातु सामान्यस्यापि पर्षदि ॥ ८२ ॥

षष्ठः सर्गः

१ आधारबुद्ध्या गगनस्योत्पाद इव टिट्टिभः ॥ ३९ ॥ २ दिशोऽश्नुतेऽभ्रलेशोपि पौरस्त्यानिलसङ्गमात् ॥ ४० ॥ ३ अन्यत्राप्युत्सवायैव जातोऽर्हन्, किं पुनर्गृहे ? ॥

अष्टमः सर्गः

१ विहायसो महत्त्वे हि नोपमानं भवेत् परम् ॥ २४ ॥

चतुर्थपर्व प्रथमः सर्गः

१ प्रष्टुमर्हो न सामान्यजनो हि स्वप्नमुत्तमम् ॥ १७४ ॥ २ श्रेयान् स देशो नो यत्र श्रूयन्ते दुर्जनोक्तयः ॥ १०८ ॥

३ यादृशस्तादृशो वाऽपि पूजनीय पिता सताम् ॥ २१३ ॥ ४ विसंवादो न धीमताम् ॥ २२६ ॥ ५ नह्यासाध्याद्गुभापिण ॥ २६५ ॥ ६ नलिनो यद् नलिभ्योऽपि, बहुरत्ना हि भूरियम् ॥ २७६ ॥ ७ स्वामिनि व्यग्रचित्ते हि नावकाश कलावताम् ॥ २९ ॥ ८ रश्वाऽप्यास्कन्द्यते यस्मात् स्वामिन किंपुन पुमान् ' ॥ २९६ ॥ ९ दूतदृष्ट्यनुसारेण प्रवर्तन्ते हि भूभुज' ॥२९८॥ १० न ज्ञान्या कोऽपि कस्यचित् स्वामी वा सेवको वाऽपि शक्त्यधीनमिद खलु । ३०० ॥ ११ स्वप्रशसेवान्यनिंदा सतां लज्जाकरी खलु ।३०१॥ १२ रामभद्रानपुत्रोऽपि मान्यो राजानुजीविनाम् ।३०४॥ १३ दन्तिना दन्तघातस्य स्थान नैरण्डपादप'। ३१७ ॥ १४ दूता हि प्रतिरूपाणि भूपाना सञ्चरन्त्यमी । ३२७ ॥ १५ यत उत्तिष्ठति शिखी निर्वाप्यस्तत एव हि । ३२८॥ १६ कवल शक्यत क्षेप्तु, नाकृष्टु हस्तिनो मुखात् । ३४० ॥ १७ इङ्गितज्ञा हि सेवका । ३४६ ॥ १८ उग्राणा स्वामिना ह्यग्रे कोऽन्यथा वक्तुमीश्वर । ३४७ ॥ १९ प्रमाद्यन्ति शुभात्मानो न हि ज्ञात्वा मनागपि । ४३० ॥ २० सर्वस्याप्यागतो गुरु । ४७० ॥ २१ दूतो हि प्रथमो नये। ४७२ ॥ २२ न शिरो नयने विना । ५०२ ॥ २३ प्रमाण स्वामिशासनम् । ५०९ ॥ २४ विचित्रा हि रणे गति । ५५० ॥ २५ महागजोऽपि ह्यज्ञात्वा धावन् पङ्के निमज्जति । ५५२ ॥ २६ मन्यान्तर्म धुनीव चेतनास्तु कुतो नृणाम् ? । ५५५ ॥ २७ प्रेमास्थानेऽपि भीप्रदम् । ५७५ ॥ २८ पुण्याकृष्ट स्वय सर्वं किं न स्याद् महा त्मनाम् । ५८८ ॥ २९ सर्पघर्पं हि, सर्पो जानाति नापर । ६१७ ॥ ३० श्रीछिद्रेऽनलेशोऽपि धौतस्य श्वेतवाससः । ६३६ ॥ ३१ धीरा अपि हि किं कुर्युर्भूचरा व्योमचारिषु ? । ६४२॥ ३२ निजेनैव हि चक्रेण हन्यन्ते प्रतिचक्रिण । ७४८॥ ३३ क्षत्रियाणा क्रमो ह्येप युद्ध स्वाम्याज्ञया खलु । ७५९ ॥ ३४ फलन्ति हि महात्मान' सेविता कल्पवृक्षवत् । ७६५ ॥ ३५ भक्तिमन्तोऽप्रमादेनायुक्तेभ्योऽप्यतिशेरते । ७९८ ॥ ३६ कर्मणां फलवत् पाको यदुपायात् स्वतोऽपि च । ८३० ॥ ३७ रज्य-

न्त्यन्येऽपि गीतेन किं पुनस्तद्विदग्रणीः ? । ८७० ॥ ३८ विषयाक्षिप्तमनसां गलेद्धि स्वामिशासनम् । ८७५ ॥ ३९ दुर्लङ्घ्यं
शासनं ह्युग्रशासनानां महीभुजाम् । ८८२ ॥ ४० अनुष्ठाने प्रवर्त्तन्ते ज्ञात्वा खलु महाशयाः । ९०५ ॥ द्वितीयः सर्गः—
१ कस्तृप्येदमृतस्य हि ? । ६६ ॥ २ प्राणान् रक्षेद् धनैरपि । १३६ ॥ ३ राज्ञां भवन्ति दूता हि यथावस्थितवादिनः । १६०॥
४ शूराणां ह्यभिगमनं सुहृदीवासुहृद्यपि । १६४ ॥ ५ तस्य श्रीर्यस्य विक्रमः । १८३ ॥ ६ सञ्जायते व्याधिरिव द्विषन् विपमु-
पेक्षितः । २२३ ॥ ७ सर्वोऽपि सापराधो हि छलमन्विष्यते यदा । २३० ॥ ८ ...जीवन्नरो भद्राणि पश्यति । २६९ ॥
तृतीयः सर्गः—१ पित्राज्ञा ह्यर्हतामपि । ५२ ॥ २ द्यूतान्धानां कुतो मतिः ? । ७८ ॥ ३ पक्षोद्गमः पीलिकानामिव पर्यन्त-
कारणम् । विपरीता मतिः पुंसां भवेद् दैवे पराङ्मुखे । ११९ ॥ ४ वीरभोग्या हि भूरियम् । १२९ ॥ ५ न हि केसरिबुत्कारं
श्रुत्वा तिष्ठन्ति वारणाः । १३९ ॥ ६ काकानां तस्कराणां च नश्यतां का ननु त्रपा । १५१ ॥ ७ नाऽभूत् पत्युः कलत्रं या सा
स्यादुपपतेः कथम् ? । १६४ ॥ चतुर्थः सर्गः—१ बहुरत्ना वसुन्धरा । १२३ ॥ २ ओजायन्तेऽनोजसोऽपि दूताः स्वाम्योजसा
खलु । २३८ ॥ ३ आदत्ते ह्यम्बु यद् भानुः पुनरुज्झति भूरि तत् । १४५ ॥ ४ श्रियः स्वामिनि रुष्टे हि न तिष्ठन्ति भयादिव
। १४६ ॥ ५ तेजः प्रमाणं वीराणां तेजसां कीदृशं वयः ? । १८१ ॥ ६ व्यालोऽपि गरलं मुक्त्वा शाम्येन्न पुनरन्यथा । १८२॥
पञ्चमः सर्गः—१ इष्टस्य दर्शनेनापि शं स्यात् स्पर्शेन किं पुनः ? । १०१ ॥ २ सर्वार्थसाधकः कायश्चलत्येव हि भोजनात् ।
१०७ ॥ ३ नदीमध्यस्थितानां हि किं करोति दवानलः ? । १४९ ॥ ४ रसान्तरेण हि रसो बाध्यते बलवानपि । १५१ ॥ ५
दोरपेक्षैव दोष्मताम् । १५७॥ ६ सहस्रधा हि फलति व्यवसायो महात्मनाम् ।१९०॥ ७ उपेक्ष्य लोष्टक्षेप्तारं लोष्टं दशति मंडलः
मृगारिः शरमुत्प्रेक्ष्य शरक्षेप्तारमृच्छति । २४३ ॥ ८ कुटिलादुद्विजन्ते हि जन्तवः पन्नगादिव । ३०१॥ ९ मूले लघीयांस्तल्लोभः

सराव इव वर्धते । ३१५॥ १० तरवोऽपि निधिं प्राप्य पादैः प्रच्छादयन्ति यत् । ३१७ ॥ सप्तम. सर्ग —१ जिनशासनबाह्याना विवक कीदृशो नृणाम् ? । ५७ ॥ २ हस्त्यश्वे राजपुत्राणां कौतुक सर्वतोऽधिकम् । ९० ॥ ३ सर्व ह्येकाशदर्शनात् । १२३॥ ४ बलिभ्योऽपि छल बलि । २२९॥ ५ भर्तृगृह्या हि योषितः । २६५ ॥ ६ क्षत्रिया हि रणप्रिया । २६६ ॥ ७ विक्रान्तो हि श्रियां पदम् । २८२ ॥ ८ याञ्चा ह्यमोघा महताममोघ च ऋपेर्वच । २९० ॥ ९ मिथ्या न खलु भापन्ते महात्मान. कदाचन । ३५४ ॥ १० क्षणिक सर्वमेव हि ।३६४

पञ्चम पर्व प्रथमः सर्गः

१ दुर्जेया विषयाः खलु । २८ ॥ २ प्रज्ञाया किं न गोचरम् ? । ३१॥ ३ विदेशो विदुषां हि क ? । ३३ ॥ ४ क्व नार्धन्त्युज्ज्वला गुणा । ३९ ॥ ५ आराध्योऽतिथिमात्रोऽपि किं पुन स पिताऽतिथि. ? । ६२ ॥ ६ महात्मानः प्रकृत्याऽपि शपथच्छेदकातराः । ६९ ॥ ७ दण्डसाध्यास्तु दुर्मदा । ८६ ॥ ८ न मनागपि जीवन्ति कुलनार्यं पतिं विना । ८९ ॥ ९ नोत्कण्ठा, विलम्ब सहते क्वचित् । १५९ ॥ १० पूजाऽर्होऽतिथिमात्रेऽपि । १७३ ॥ ११ निराम्नायस्य वचसि श्रद्धा न प्रत्यय विना । १८७ ॥ १२ विवेको हि, स्मरार्त्ताना कियच्चिरम् ? । १९५ ॥ १३ अवश्य भावी यो ह्यर्थो यत्र तत्र स नान्यथा । २०१ ॥ १४ न भावि क्वचिद् यथा । २१८ ॥ १५ निकाचितानामपि यत् कर्मणा तपसा क्षय. । २१९ ॥ १६ स्वाम्युदर्काय धीमन्तो यान्ति स्वाम्यन्तरेऽपि हि । २३१ ॥ १७ अभियोगो हि—योगाय क्षेमे सति विपश्चिताम् । २५३ ॥ १८ दैव हि बलवत् परम् । २६३ ॥ १९ धैर्य—वीर्यविहीनाना छलमेव हि पौरुषम् । ३१० ॥ २० न हीन्द्रकुलिशस्यापि

स्फूर्त्तिः केवलिपर्षदि । ३६७ ॥ २१ स्नेहोऽयं पूर्वसंस्कारो याति जन्मशतान्यपि । ४१७ ॥ २२ अन्तेऽप्यात्ता परिव्रज्या शुभव्रज्या निबन्धनम् । ४८५ ॥ २३ कौमुदी हि निशान्तेऽपि कुमुदामोदकारणम् । ४८५ ॥ द्वितीय सर्गः—१ विद्या हि प्राग्भवाभ्यस्ताः स्वयमायान्ति तादृशाम् । ३४ ॥ २ स्वकार्यमारब्धमपि सन्तोऽन्यार्थे त्यजन्ति हि । ४६ ॥ ३ ...संसर्गः, सद्भिरेव सतां यतः । ५३ ॥ ४ भक्तिमेव हि काङ्क्षन्ति न हि वस्तूनि तादृशाः । ६९ ॥ ५ . न लङ्घन्ते, पूज्यपूजां विवेकिनः । ९८ ॥ ६ गुणः श्रुतो जनश्रुत्याऽप्यनुरागाय तद्विदाम् । ११६ ॥ ७ अपूर्वस्य दिदृक्षा हि कालक्षेपं क्षमेत न । ११७ ॥ ८ यस्योदयः स वन्द्यो हि यथा हीन्दुर्यथा रविः । २४२ ॥ ९ दुर्वारा भवितव्यता । २८७ ॥ १० विपमल्पमपि प्सातं प्राणनाशाय जायते । ३०८ ॥ ११ महात्मभ्यः प्रदत्तं हि कोटिकोटिगुणं भवेत् । ३४० ॥ १२ स्थानं नैकत्र साधूनां निःसङ्गानां समीरवत् । ३४१ ॥ १३ नाशो नार्जितकर्मणाम् । ४०० ॥ १४ अपत्यस्नेहो बली खलु । ४०१ ॥ १५ महतामनुलग्नैर्हि महदासाद्यते फलम् । ४०४ ॥ १६ किं कम्पते क्वचिच्छैलो दन्तघातेन दन्तिनः ! ।४१९॥ तृतीयः सर्गः—१ न वन्ध्यं दर्शनं सताम् । ३१ ॥ २ ...उपचारः स्याद्, भाविन्यपि भूतवद् । ७२ ॥ ३ कृतज्ञा हि विवेकिनः ॥ १७५ ॥ ४ ...पक्षे सतां जनः । १८७ ॥ चतुर्थः सर्गः—१ सूर्योदय इवान्योपकृत्यै ज्ञानं भवादृशाम् । ११५ ॥ २ दुःस्थितेषु हि महतां वात्सल्यमतिरिच्यते । २३६ ॥ ३ क्षत्रियाणां न धर्मोऽयं शरणार्थी यदर्प्यते । २५९ ॥ ४ पित्ताग्निः शर्कराशम्यः पयसा किं न शाम्यति ? । २६५ ॥ ५ सर्वेष्वप्यनुकूला हि महान्तः करुणाधनाः । २६९ ॥ ६ सूनोः पुरुषकारो हि हर्षाय प्रथमं पितुः ।२९३ ॥ ७ लोभः कस्य न मृत्यवे ? । २९७ ॥ ८ सत्यो हि पतिवर्त्मगाः । ३३७ । पंचमः सर्गः—१...अर्हत्प्रभावस्यावधिर्न हि । ४८ ॥ २ शोभते समयोचितम् । १०६ ॥ ३ दयावीरा महात्मानः प्रसूतेऽन्य-

रसेऽपि हि । १०८ ॥ ४ पुनोद्वाहोत्सवाना हि न तृप्यन्ति महर्द्धय । ११० ॥ ५ महतामवतारो हि विश्वपालनहेतवे । ११२ ॥ ६ निकाचित भोगफल भोग्यं कर्मार्हतामपि । ११३ ॥ ७ पूजामाचारपूज्यस्य पूज्या अपि हि कुर्वते । १२७ ॥ ८ सर्वमप्यृजु दोष्मताम् । १७० ॥ ९ सर्वत्रास्खलितो मार्गो प्रभूणा स्रोतसामिव । १७२ ॥ १० विप वैरी ह्युपेक्षित' । १७९ ॥ ११ भक्तिग्राह्या हि देवता । २०९ ॥ १२ उन्मूढे हि सुते प्रायेणैक शरणमर्यमा । २१२ ॥ १३ दुष्कर नास्ति दोष्मताम् । २४६ ॥ १४ मूलेपु हि विशुष्केपु शुष्क एव महीरुह । ३२२ ॥ १५ हन्यते हैमन जाडय न विना ज्वलितानलम् । ३२३ ॥ १६ वीरैं ह्युत्टक पूर्वं वप्र कै कैर्न खण्डयते । ३२५ ॥ १७ पूर्वकर्मानुसारेण जायते जन्मिना हि धी ।३८६॥ १८ जीवन्त्यप्येरुदाऽऽसेन धान्यानि स्वातिशारिणा । ३९५ ॥ १९ अन्योऽन्यशुभचेष्टा हि शुभोदर्का द्वयोरपि । ४१२ ॥ २० सुलक्ष्य हि परस्वान्तमिङ्गिताकारवेदिभि । ४१३ ॥ २१ नहि मिथ्या कुलीनवाक् । ४३८ ॥ २२ प्रतिज्ञा च कुलीनाना न मुधा जातु जायते । ४३९ ॥ २३ शस्यमान हि, दु ख प्राय प्रशाम्यति । ४५३ ॥ २४ जीवन् हि, नरो भद्राणि पश्यति । ४५७ ॥ २५ प्रयाति सात्त्विकाना हि दैवमप्यनुकूलताम् । ४८३ ॥ २६ सुप्रयुक्तस्य दम्भस्य ब्रह्माऽप्यन्त न गच्छति । ५०५ ॥ २७ अन्य हि दु खित दृष्ट्वा समाश्वसिति दु'खित । ५२१ ॥

षष्ठ पर्वं प्रथमः सर्गः

१ यद्वोत्पन्ने तीर्थनाथे सदोत्सवमयं जगत् । ४९ ॥ २ महात्मानो हि कुर्वन्ति सेनकेष्वपि सत्कृतिम् । ५५ ॥ द्वितीयः सर्गः—१ आत्मनीनो हि सर्वोऽपि स्तोकेच्छु कोऽपि नात्मन । ११० ॥ २ तिष्ठन्ति न चिर जातु मानिन' श्वसुरौकसि ।

१२५ ॥ ३ धनं हि सुलभं वत्स! तद्योक्ता दुर्लभः सुतः। १४९ ॥ ४ गीतहार्या मृगा अपि। १८४ ॥ ५ बहुरत्ना हि भूरियम्। २०५ ॥ ६ आस्तामत्र सतां सङ्गः परलोकेऽपि शर्मणे। २३१ ॥ ७ स्त्रीणां प्रकृतिलोलानां परं स्थैर्यं न निश्चयः। २३३ ॥ ८ पुत्री–जामातृविरहः प्रायः कस्य न दुःसहः। २४२ ॥ ९ गतिः साहसिकानां हि समा स्थलजलाध्वनोः। २४३॥ १० मृत्युर्नात्रुटितायुषः। २४८ ॥ ११ एकाऽपि हि हरेच्चित्तं किं पुनः सकलाः कलाः ?। ३०७ ॥ १२ सेवकानां विना सेवां भज्यते खलु जीविका। ३४४ ॥ १३ ...प्रियोदन्ताहरः कस्य न वल्लभः ?। ३५९ ॥ १४ ...यत्र तत्र, पुण्यं ह्यनुचरं नृणाम्। ३७४ ॥ तृतीयः सर्गः—१ वीराणां हि रणं मुदे। ३३ ॥ चतुर्थः सर्गः—१ वृन्दं हि बलवत्तरम्। ३ ॥ २ धीराः सत्त्वाच्चलन्ति न। १७ ॥ ३ लोलेन्द्रिये यौवने हि यत्तपस्तत्तपो ननु। दारुणास्त्रे रणे यो हि शूरः शूरः स उच्यते। २५ ॥ ४ प्रेम्णो दूरे न किञ्चन। ५९ ॥ ५ कामः कामं निरङ्कुशः। ६० ॥ ६ स्त्रीणां लुब्धो जनः प्रायो दोषं न खलु वीक्षते। ६३ ॥ ७ किं यमस्य दवीयसि ?। ७४ ॥ ८ राज्यं हि विक्रमाधीनं न प्रमाणं क्रमाक्रमौ। ७५ ॥ ९ सदा वैरायमाणा हि शङ्कन्ते परतो मृतिम्। ८४ ॥ १० क्षात्रं तेजो हि दुर्धरम्। ९४ ॥ ११ किं न स्यात् पुण्यसंपदः ?। ९९ ॥ षष्ठः सर्गः—१ सामान्यपुण्यैर्नैवार्हन् देवः साक्षान्निरीक्ष्यते ।४४॥ २ केनेश्वरवचोयुक्तियुक्तं बाधितुमीश्यते ?। १३० ॥ सप्तमः सर्गः—१ असाधनीयं पुण्यानां मन्त्रतन्त्रविदां च किम् ?। ५० ॥ २ प्रायेण प्रेयसीप्राप्तिप्रत्याशाऽपि हि शर्मणे। ५७ ॥ ३ न मोघा देशनाऽर्हताम्। १९१ ॥ अष्टमः सर्गः—१ तपोलेशोऽपि नाफलः। ५ ॥ २ पाखण्डिनां हि पाण्डित्यं प्राकृतेष्वेव जृम्भते। २१ ॥ ३ ...स्थानं विदेशो हि, मानिनामपमानिनाम्। ३८ ॥ ४ अभ्यागतेऽन्यनृपतिप्रधाने ह्यर्थिनो नृपाः। ३९ ॥ ५ उपायं वचसा वक्तुं कातरा अपि पण्डिताः। ४४ ॥ ६ छद्मोऽपि क्वापि शोभते। ७५ ॥ ७ ...जीवन्मृता हीनवराः स्त्रियः

। ९५ ॥ ८ एकद्रव्याभिलापो हि महद् वैरस्य कारणम् । १०८ ॥ ९ साधूनां, लब्धिभोगोऽपदे न हि । १४१ ॥ १० न्यासवत् प्रतिपन्नस्य नास्ति नाशो महात्मसु ।१४४॥ ११ उपयोगोऽपि लब्धीनां सद्धकार्ये न दुष्यति । १५९ ॥ १२ स्वामिनो भृत्यदोषेण गृह्यन्त इति नीतिवाक् । १९२ ॥

सप्तम पर्व प्रथम सर्ग

१ कन्या ह्यवश्य दातव्या । २० ॥ २ प्रायो विचारचञ्चूनां कोप सुप्रशम' खलु । २३ ॥ ३ यथा राजा तथा प्रजा' । ३३ ॥ ४ असह्यो हि स्त्रीपराभव । ४६ ॥ ५ वन्दनीय सता साधुर्ह्युपकारी विशेषत । ४९ ॥ ६ निर्नाथाना कुत शौर्य? हत सैन्य ह्यनायकम् । ७६ ॥ ७ क्वाऽप्युपायोऽपसर्पणम । ८४ ॥ ८ मृत्यवे हि स्याद्, वैरि वैर चिरादपि । ९५ ॥ ९ नान्यो मन्त्रो हि दोष्मताम् । ११३ ॥ १० बलवानपि किं कुर्यात् ग्रास केशरिणा करी ? । १२३ ॥ ११ जयाभिप्रायिणा प्राय' प्राणा हि तृणसन्निभा । १२८ ॥ द्वितीय सर्ग —१ तालिका नैकहस्तिका । ३६ ॥ २ महतामपराद्धे हि प्रणिपात प्रतिक्रिया । ६९ ॥ ३ परैश्च भक्ष्यमानस्य मानिनो धिगवस्थितिम् । १२० ॥ ४ स्त्रीक विहाय वह्निष्णुर्न हि लज्जाऽऽस्पद पुमान् । १२१ ॥ आश्रयस्य हि दौर्बल्याद्, आश्रित परिभूयते । १४३ ॥ ६ महतामागमो ह्याशु क्लेशच्छेदाय कस्य न? । १४८ ॥ ७ दोष्मतां हि प्रियो युद्धातिथि खलु । २०५ ॥ ८ युज्यते न वध प्राणिमात्रस्यापि विवेकिनाम् । पञ्चेन्द्रियाणा हस्त्यादिजीनाना वत का कथा ? । २१० ॥ ९ दोष्मन्तो हि निजैरेव दोर्भिर्विजयकाङ्क्षिण । २११ ॥ १० रत्ने हि बहवोऽर्थिन' । २८२ ॥ ११ किमसाध्य महौजसाम् ? । ३१७ ॥ १२ व्रत ससारनाशनम् । ३५६ ॥ १३ नात्मीया' कस्यचिन्नृपा' ।

४१४ ॥ १४ सत्या वा यदि वा मिथ्या प्रसिद्धिर्जयिनी नृणाम् । ४१७ ॥ १५ न क्षोभः सत्यभाषिणाम् । ४२६ ॥ १६ अविमृश्य विधातारो भवन्ति विपदां पदम् । ४२८ ॥ १७ ...कृतस्य, करणं नहि विद्यते । ४२९ ॥ १८ पुत्रार्थे क्रियते न किम् ? ४३० ॥ १९ गुरुवद् गुरुपुत्रेऽपि वर्त्तितव्यमिति श्रुतेः । ४३३ ॥ २० प्राणैरप्युपकुर्वन्ति महान्तः किं पुनर्गिरा ? । ४३६ ॥ २१ प्राणाऽत्ययेऽपि शंसन्ति नाऽसत्यं सत्यभाषिणः । ४३७ ॥ २२ अन्यदप्यभिधातव्यं नाऽसत्यं पापभीरुणा । गुरुनागन्यथाकारे कूटसाक्ष्ये च का कथा ? । ४३८ ॥ २३ सत्याद् वर्षति पर्जन्यः सत्यात् सिध्यन्ति देवताः । ४४५ ॥ २४ प्राणा अपि हि दीयन्ते परस्मै न पुनः प्रियाः । ५३६ ॥ २५ न वाङ्मात्रं कलङ्काय विशुद्धमनसां नृणाम् । ५६६ ॥ २६ अर्थिनोऽर्थेषु न तथा दोष्मन्तो विजये यथा । ५७३ ॥ २७ ॥ एकान्तविक्रमः क्वाऽपि विपदेऽपि प्रजायते । ५८२ ॥ २८ वलीयसो वलिभ्योऽपि प्रसूते हि वसुन्धरा । ५८३ ॥ २९ वीरा हि न सहन्तेऽन्यवीराहङ्कारडम्बरम् । ६०५ ॥ ३० ...जिते नाथे, जिता एव पदातयः । ६२० ॥ ३१ तेजस्विनां हि निस्तेजो मृत्युतोऽप्यतिदुःसहम् । ६३२ ॥ ३२ कर्माण्यवश्यं सर्वस्य फलन्त्येव चिरादपि । आपुरन्दरमाकीटं संसारस्थितिरीदृशी । ६४७ ॥ तृतीयः सर्गः—१ वल्लभोत्कण्ठितानां हि घटिकाऽपि दिनायते । २१ स्तोकमप्यमृतं श्रेयो भारोऽपि न विषस्य तु । २८ ॥ ३ सापराधाऽप्यवध्यैव, स्त्री...। ३२ ॥ ४ भृत्योऽपि हि विरक्तः स्यादापदे किं पुनः प्रिया ? । ३५ ॥ ५ किं स्वादुनाऽपि भोज्येन ? रोचते न यदात्मने । ३६ ॥ ६ न युक्तं महतां यत् स्वप्रतिपन्नस्य लङ्घनम् । अनुल्लङ्घ्यैस्तु गुरुभिः प्रतिपन्नस्य का कथा ? । ३८ ॥ ७ विक्रीणते वा मूल्येन ददते वा प्रसादतः । गुरवो ह्रीत्यपि सतां प्रमाणं नापरा गतिः । ३९ ॥ ८ मानिनो ह्यवलेपं न विस्मरन्ति यतस्ततः । ४६ ॥ ९ विद्याधराणां विद्यैव सर्वसिद्धिषु कामधुक् । ७७ ॥ १० स्वदुःखाख्यानपात्रं हि नापरः सुहृदं विना । ८५ ॥ ११ रहःस्थयोर्हि

दम्पत्योर्न च्छेका पार्श्ववर्तिन । ११० ॥ १२ प्रतारणाप्रकारान् हि बहूजानन्ति पासुला । १२८ ॥ १३ स्वामिवत् स्वाम्यप-
त्येऽपि सेनका समवृत्तय । १३२ ॥ १४ स न सता न विपद विलोकयितुमीश्वरा' ? १३३ ॥ १५ अचिन्त्यं चरित स्त्रीणा
ही विपाको विधेरपि । १३८ ॥ १६ अज्ञनलेशोऽपि, दूषयत्यशुक शुचि । १३९ ॥ १७ अहिदष्टाऽङ्गुलि' किं न च्छिद्यते
बुद्धिशालिना ? । १४१ ॥ १८ श्वश्रूदु खे दुहितॄणा शरण शरण पितु । १४२ ॥ १९ निर्वासयेदपि क्रूरा दोषमुत्पाद्य कञ्चन ।
१४३ ॥ २० दु खिताना हि नारीणा माताऽऽश्वासनकारणम् । १५५॥ २१ सर्वथा स्त्री विना नाथ मेकाहमपि जीवतु । १५७
॥ २२ पुनर्नवीभवेत् प्रायो दु खमिष्टावलोकनात् । २०२ ॥ २३ अत्युग्रपुण्यपापानामिहैव ह्याप्यते फलम् । २३७ ॥ २४ धिग्
धिक् पतिमपण्डितम् । २४७ ॥ २५ पतिव्रता' पतिशोकात् प्रविशन्ति हुताशने । तासा विना हि भर्त्तार दु'खाय खलु जीवि
तम् । २६१ ॥ २, प्रहरेद् बाहुना को हि तीक्ष्णे प्रहरणे सति । २८४ ॥ २७ पौरुषावसरे प्राप्ते न प्रमाण वय' खलु ।
२८५ ॥ २८ सर्वत्र बलनच्छलम् । २९७ ॥ २९ प्रणिपातान्त', प्रकोपो हि महात्मनाम् । २९९ ॥ ३० दृष्टसारः स्वय
हीदृग् जामाता दुर्लभ खलु । ३०० ॥ चतुर्थ' सर्ग —१ नर्मोक्तिर्न हि सत्यैव प्रायो धवलगीतवत् । १८ ॥ २ सुन्दर
मर्त्यजन्मद्रो' फलं चारित्रलक्षणम् । २२ ॥ ३ कुलधर्म क्षत्रियाणा स्वसन्धापालन खलु । २५ ॥ ४ प्राप्तोदय हि तरणिं
तिरोधातुं क ईश्वर ? । ३६ ॥ ५ लोभाभिभूतमनसा विवेक स्यात् कियच्चिरम् ? । ४३ ॥ ६ किं सिंही हन्ति न
द्विपान् ? । ७४ ॥ ७ न ह्यसत् प्राप्यते क्वापि केनाऽप्याकाशपुष्पवत् । ८९ ॥ ८ नहि भीराज्ञया राज्ञाम न्यायकरणेऽपि हि
। ९५ ॥ ९ आप्ता हि स्फुटभाषिण । १२९ ॥ १० समयज्ञा हि धीमन्तो न तिष्ठन्ति यथा तथा । १७१ ॥ ११
राज्य सर्वत्र दोष्मताम् । १७३ ॥ १२ विशेषत' प्रीतये हि राज्ञा भू' स्वयमर्जिता । १७४ ॥ १३ को वा न जीवति

किं न कुर्यात् स्मरातुरः? । २१० ॥
हर्षे को नाम तृप्यति ? । १९१ ॥ १५ किं न कुर्यात् स्मरातुरः? । २१० ॥ १४ हर्षे को नाम तृप्यति ? । १९१ ॥ १५ ... । २३३॥ १८

सुखं पुरुषोत्तमजन्मनि? १८९ ॥ १४ हर्षे को नाम तृप्यति ? । १९१ ॥ १५ किं न कुर्यात् स्मरातुरः? । २१० ॥ १६ व्रते ह्येकाहमात्रेऽपि न स्वर्गादन्यतो गतिः । २१४ ॥ १७ कोपः शाम्यति महतां दीने क्षीणे ह्यरावपि । २३३॥ १८ शोको हर्षश्च संसारे नरमायाति याति च ।२५३॥ १९ सन्तः सतां परित्राणे विलम्बन्ते न जातुचित् ।२७२॥ २० आभरताद् जन्मसिद्धं नन्विक्ष्वाकुषु पौरुषम् ।२७४॥ २१ गुरूणां तादृगाख्यातुं कुलीनाः कथमीशते ? । ३०३ ॥ २२ दीयन्ते कन्यकाः सकृत् । ३१९ ॥ २३ स्वेच्छयैव वराऽऽदानं लोके न हि परेच्छया । ३२९ ॥ २४ ध्वस्ते माने हि दुःखाय जीवितं मरणादपि । ३६० ॥ २५ प्रस्तरोत्कीर्णरेखेव प्रतिज्ञा हि महात्मनाम् ।४२४॥ २६ महतां हि प्रतिज्ञा तु न चलत्यद्रिपादवत् । ४९४ ॥ पञ्चमः सर्गः—१ मायोपायो वलीयसि । १५ ॥ २ खलाः सर्वंकपाः खलु । १६ ॥ ३ जातु धर्ममधर्मं वा गणयन्ति न मानिनः । ३७ ॥ ४ भृत्ये कोपः शिक्षामात्रकृते शिष्ये गुरोरिव । ६३ ॥ ५ मन्त्रिणांना मन्त्रसामर्थ्यात् स्यादलीकेऽपि सत्यता । ९३ ॥ ६ शकुनं चाशकुनं च गणयन्ति हि दुर्बलाः । १०३ ॥ ७ सन्तो हि नतवत्सलाः । २२९ ॥ ८ सामान्योऽप्यतिथिः पूज्यः किं पुनः पुरुषोत्तमः । २५७ ॥ ९ साधर्मिके च वात्सल्यमुक्तं श्रेयस्करं जिनैः । ३७५ ॥ १० कामावेशः कामिनीनां शोकोद्रेकेऽपि कोऽप्यहो ! । ३९८ ॥ ११ महत्सु जायते जातु न वृथा प्रार्थनाऽर्थिनाम् । ४०६ ॥ षष्ठः सर्गः—१ न सिंहस्य सखा युधि । १२ ॥ २ ... विजयो ह्यन्यसाहाय्याद् दोष्मतां ह्रिये । १९ ॥ ३ ...यद्वात्या एव रिपवः स्वतोऽपि परतोऽपि वा । ८८ ॥ ४ सतां सङ्गो हि पुण्यतः । ९७ ॥ ५ क्षुते हि सर्वथा मूढे शरणं तरणिः खलु । १०१ ॥ ६ स्वकार्यादधिको यत्नः परकार्ये महीयसाम् । १०२ ॥ ७ रणाय नालसाः शूरा भोजनाय द्विजा इव । १०८ ॥ ८ न द्वितीया चपेटा हि हरेर्हरिणमारणे । ११४ ॥ ९ ...अहो ! कामाऽवस्था बलीयसी । १४२ ॥ १० किं करोति परं मन्त्रः प्रभौ

कामनशम्पदे ?। १७८ ॥ ११ महात्मनां न्यायभाजां क पक्ष नावलम्ब्यते ?। १७९ ॥ १२ अनागत हि पश्यन्ति मन्त्रिणो मन्त्रचक्षुषा। १८१ ॥ १३ आदौ प्रेष्यो द्विपां दूत इति नीतिमतां स्थिति'। २१७ ॥ १४ सन्देशहारकेणापि यदि सिध्येत् प्रयोजनम्। पर्याप्त स्वयमुद्योगकर्मणा भूभुजा तदा। २१९ ॥ १५ छलच्छेका खला खलु। २९१ ॥ १६ धिगहो! नीचसौहृदम्। ३०४ ॥ १७ सर्वमस्त्र बलीयसाम्। ३७१ ॥ १८ कौतुकाद् हि क्षण दत्ते शक्तो जयमपि द्विपाम्। ३८७ ॥ १९ अङ्गारान् परहस्तेन कर्षयन्ति हि धूर्तका। ३९२ ॥ २० सम्भाषोऽपि हि पापाय, परस्त्रीहारिण। ३९७ ॥ सप्तम सर्ग'— १ रिपावपि पराभूते महान्तो हि कृपालव। ९ ॥ २ आप्तेन मन्त्रिणा मन्त्र शुभोदर्को हि भूभुजाम्। २७ ॥ ३ न मुधा भवति क्वापि प्रणिपातो महात्मसु। ४४ ॥ ४ न ह्री. पूज्याद् हि बिभ्यताम्। १६४ ॥ ५ पर्यस्ते शकटे हन्त! किं कुर्वीत गणाधिप ?। २८३ ॥ ६.राजकार्येऽपि राजान उत्थाप्यन्ते ह्युपायत। २८६ ॥ ७ नाऽऽप्तस्याऽऽप्ते अरोचना। २८७ ॥ अष्टम सर्ग—१ वीरा हि, प्रजासु समदृष्टय। ४ ॥ २ विवेके हि न रौद्रता। १४८ ॥ ३ नैकत्र मुनय. स्थिरा'। २३५ ॥ ४ प्राय, प्रवदा लोकनिर्मिता। २६४ ॥ ५ अवश्यमेव भोक्तव्ये कर्माधीने सुखासुखे। २७३ ॥ ६ धर्म' शरणमापदि। २७३ ॥ ७ राजतेजो हि दुस्सहम्। २७८ ॥ ८ युक्ता हि यद् घटामेति श्रद्धेय तत् मनीषिणा। २८२ ॥ ९ प्राय प्रेमातिदुस्त्यजम्। २८७ ॥ १० न भक्ता क्वाप्युपेक्षका। २८८ ॥ ११ न रक्तो दोषमीक्षते। २९२ ॥ १२ यथा तथाऽपवादिता यद्वद्वमुखो जन। ३००॥ १३ सर्वलोकविरुद्ध तु त्याज्यमेव यशस्विन। ३०२ ॥ १४ शङ्कास्थाने हि सर्वोऽपि दिव्यानि लभते जन'। ३२१॥ नवम. सर्गः—१ एक धर्म प्रपन्ना हि सर्वे स्युर्बन्धवो मिथः। १३ ॥ २ स्त्रीणा पतिगृहादन्यत् स्थान भ्रातृनिकेतनम्। १४ ॥ ३ विधुरेषु हि मित्राणि स्मरणीयानि मन्त्रवत्। ५२ ॥ ४ पूज्ये हि विनयोऽर्हति। ९०

॥ ५ पुत्रात् पराजयो वंशोद्द्योतनाय न कस्य हि ? । १५० ॥ ६ दैवस्येव हि दिव्यस्य प्रायेण विषमा गतिः । २०६ ॥
दशमः सर्गः—१ ...कर्मणां विषमा गतिः । ११५ ॥ २ कर्मविपाको दुरतिक्रमः । १२३ ॥ ३ तत्परैः परलोकाय स्थातव्यं मूलतोऽपि हि । १३६ ॥ ४ प्रविशन्ति छिद्रशते नृणां भूतशतानि हि । १४१ ॥

अष्टम पर्व प्रथमः सर्गः

१ ....को हि, दीपे सत्यग्निमीक्षते ? । ६७ ॥ २ सोऽर्थः स्वभावसंसिद्धो न हि याञ्चामपेक्षते । ८४ ॥ द्वितीयः सर्गः—
१ शर्करातोऽपि मधुरा वार्त्ताऽर्थकथिना सती । ४५ ॥ २ सूत्थाना हि नरोत्तमाः । ६८ ॥ ३ ....दूत्ये हि मण्डनं वाग् । १२२ ॥ ४ महिषीचारणं ह्याद्यमाभीराणां कुलव्रतम् । २४७ ॥ ५ स्वयंवरोऽतिप्रौढानामनूढानां हि योषिताम् । ३१६ ॥
६ .....अतिथीनामुचितं ह्यदः । ३२० ॥ ७ स्वस्थानगमनोत्कण्ठा कस्य न स्याद् बलीयसी । ३७८ ॥ ८ विनाऽऽलोकेन लोको हि जीवन्नपि परासुवत् । ३८३ ॥ ९ न सिंहः सहतेऽन्यं हि गुहाद्वारोपसर्पिणम् । ४२२ ॥ १० निरीहस्य हि किं नृपः ? । ४३१ ॥ ११ ज्येष्ठो भ्राता पिता यथा । ४५८ ॥ १२ सतीनां नास्ति दुष्करम् । ४५९ ॥ १३ प्रमाणं नियतिः खलु । ४७५ ॥ १४ न हि स्थानमनुद्दिश्य प्रवृत्तिश्चेतनावताम् । ४८४ ॥ १५ कुर्यात् पुरुषकारः किं दैवे वक्रत्वमीयुषि ? । ४९९ ॥ १६ दुःखविस्मृतिसख्यसौ । ५०९ ॥ १७ श्वशुरः शरणं येषां नराणां ते नराधमाः । ५१८ ॥ शीलं सतीनां सर्वाङ्गरक्षामन्त्रो हि शाश्वतः । ५२० ॥ १९ दुर्दशापतितानां हि स्त्रीणां धैर्यगुणः कुतः ? । ५५१ ॥ २० न ह्यात्मीया कञ्चुलिका जातु भाराय भोगिनः । ५५२ ॥ २१ .....चिरं, न हि नर्मापि शर्मदम् । ५५३ ॥ २२ पतिं विनाऽपि

तद्देस्माभिभरायैव योपिताम् ।५६१ ॥ २३ सर्वत्र कुशल तासा स्त्रीणा या स्यु' पतिव्रता ।५६७ ॥ २४ सुलभा धनिनां हि भीः ।५७४ ॥ २५ जातस्य हि ध्रुव मृत्युरकृतार्थस्य मृत्युभी॰ ।५९८ ॥ २६ अवाप्तक्षीरपाणाय कस्मै रोचते काञ्जिका ? ।६३३ ॥ २७ तप क्लेशसहानां हि न मोक्षोऽपि दवीयसि ।६७२ ॥ २८ महामय प्राणभयं सर्वेपामपि देहिनाम् ।६९० ॥ २९ अप्येकाहपरिव्रज्याऽवश्य स्वर्गापवर्गदा ।६९१ ॥ ३० दैव दुर्वलघाति हि ।७०५ ॥ ३१ महद्र्य इवामोघवचना हि पतिव्रता ।७१३ ॥ ३२ प्रमाणमन्त करण खल्विष्टानिष्टनिर्णये ।७६९ ॥ ३३ कियत् क्षेम दुरात्मनाम् ? ।८०१ ॥ ३४ नारीणामातुरत्वे हि न दूरे नयनोदकम् ।८२१ ॥ ३५ न कश्चिद् वलवान् विधे ।८५३ ॥ ३६ इष्टे दृष्टे नवमिव दुख भवति दहिनाम् ।८७० ॥ ३७ जीवन् हि, प्राणी भद्राणि पश्यति ।८७३ ॥ ३८ न ह्यनारव्यातरोगस्य रोगिणोऽपि चिकित्सितम् ।९८९ ॥ ३९ भाग्ये हि विजयो नृणां पाणिपद्मे मरालति । १०५७ ॥ ४० स्नेहो हि, याति जन्मशतान्यपि ।१०७३ ॥ चतुर्थ' सर्ग.—१ पिता वाल्ये हि शासिता ।१७ ॥ २ मुदे हि स्वो गुणाधिक ।४० ॥ सप्तम सर्ग.—१ परेपामेव शस्त्राणि स्वकानि स्युर्महात्मनाम् ।४५६ ॥ नवम' सर्ग —१ महता प्रतिपन्न हि यावज्जीवमपि स्थिरम् ।२१७ ॥ २ धवलैर्गीयते यत्तद् न सर्व सत्य ।२२१ ॥ दशम' सर्ग'—१ प्रविशन्ति वर घोरे ज्वलितेऽपि हुताशने । वान्त भोक्तु न हीच्छन्ति कुले जाता अगन्धने ।२८१॥ एकादशम' सर्ग'–१ सुप्त–प्रमत्त–भ्रूणर्षि–स्त्रीपु हि प्रहरेत क ?।६

नवमपर्व प्रथम सर्गः

१ अपकारिष्वपि कृपा सता किं नोपकारिपु ? ।७ ॥ २ स्वर्गाय जायतेऽवश्यमप्येकाहकृत तपः ।१० ॥ ३ जनो हि

जीवितव्यार्थी तन्नास्ति न करोति यत् । २५ ॥ ४ ......भृगुपातेन वपुरेव हि शीर्यते । शीर्यते नाशुभं कर्म जन्मान्तरशताजितम् । ५७ ॥ ५ सम्भोगभूमयोऽपि स्युस्तपसे शान्तचेतसाम् । ६३ ॥ ६ उत्तिष्ठति यतो वह्निस्तत्र विध्यापयेत् सुधीः । ७४ ॥ ७ भवादृशाः समदृशो ह्यपकार्युपकारिषु । ७८ ॥ ८ शरीरं गत्वरमिदं ह्याहारेणापि पोषितम् । किमनेन शरीरेण किं वाऽऽहारेण योगिनाम् । ८४ ॥ ९ अर्च्चान्नार्चति यः सोऽपि पापः किमुत हन्ति यः । ८७ ॥ १० मान्यं हि गुरुशासनम् । ९३ ॥ ११ छलान्वेषी हि मन्मथः । ९६ ॥ १२ ...आधिपत्यं हि, प्रायोऽन्धङ्करणं नृणाम् । ११८ ॥ १३ दुर्वाराणीन्द्रियाणि हि । १२० ॥ १४ सत्यो हि विरलाः स्त्रियः । १२४ ॥ १५ धीमद्भ्यः को न शङ्कते ? । १४८ ॥ १६ कुतो निद्रा महात्मनाम् ? । १६० ॥ १७ तापसा ह्यतिथिप्रियाः । १९५ ॥ १८ अन्यथा चिन्तितं कार्यं दैवं घटयतेऽन्यथा । २३९ ॥ १९ नवीभवन्ति दुःखानि संजाते हीष्टदर्शने । २७१ ॥ २० अज्ञाता अपि पूज्यन्ते महान्तो मूर्त्तिदर्शनात् । ३५८ ॥ २१ बुद्धिः कर्मानुसारिणी । ३८५ ॥ २२ ......धनिनां, सर्वमीप्सकरं यतः । ४०० ॥ २३ आपो नार्यश्च नीचगाः । ५२६ ॥ २४ मायिन्यः खलु योषितः । ५४६ ॥ २५ गतयो भिन्नमार्गा हि कर्माधीनाः शरीरिणाम् । ५६७ ॥ २६ नाज्ञा लङ्घ्या विधेः खलु । ५८३ ॥ २७ अशुभं वा शुभं वाऽपि सर्वं हि महतां महत् । ५९६ ॥ द्वितीयः सर्गः—१ कुलीनानां, गुर्वाज्ञा हि बलीयसी । १६८ ॥ २ जैनर्षयो महात्मानो भाषन्ते न मृषा क्वचित् । २५३ ॥ तृतीयः सर्गः—१ फलप्राप्त्यनुसारेण प्रायेण हि मनोरथः । ९० ॥ चतुर्थः सर्गः—१ किं स्वल्पाम्भः संभविनो दुग्धे स्युः पूतराः क्वचित् ? । ११ ॥ २ गिरौ वर्षति पर्जन्यो लक्ष्मीः श्रयति निर्गुणम् । १३ ॥ ३ फलदो ह्युद्यमो नृणाम् । २१ ॥ ४ दुःखितो दुखितानां हि पीडां जानाति मानसीम् । १२७ ॥

१ अज्ञानजाद् दुर्विनयान्न कुप्यन्ति महाशया । १३३ ॥ द्वितीय' सर्ग —१ प्राज्य कर्मान्यथा कर्तुं यद्वाऽर्हन्तोऽपि नेशते । ११ ॥ २ गुरूणा किल ससर्गाद् गौरव स्याल्लघोरपि । ६९ ॥ ३ अर्हज्जन्म हि मोक्षाय भवभाजा भवादपि । ९१ ॥ तृतीय सर्ग —१ पूज्य' सर्वत्र पूज्यते । २१५ ॥ २ परेषामुपकाराय महतां हि प्रवृत्तय । २७० ॥ ३ वैर हि ऋणवत् पुसा जन्मान्तरशतानुगम् । २९८ ॥ ४ स्नेहे ह्यद्वैतमानिता । ३२६ ॥ ५ सेव्यस्य सेवाऽवसरः पुण्येनैव हि लभ्यते । ६ महान्तः क्व न वत्सला' ? । ४१२ ॥ ७ शुभध्यान हि कामधुक् । ४६९ ॥ ८ महान्तो हि न कुप्यन्ति । ४८६ ॥ ९ जन्मसार हि भोजनम् । ५०६ ॥ १० प्राणात्ययेऽपि जन्तूनां प्रकृति खलु दुस्त्यजा ? । ५३६ ॥ चतुर्थ' सर्ग'—१ सर्वस्यापि हि लोकस्य न प्राणेभ्योऽपर प्रियम् । ८२ ॥ २ अन्यपुत्रोऽप्यपुत्राणां भवत्यत्यन्तवल्लभ । ८४ ॥ ३ अज्ञा हि पशुवज्जना. । ९१ ॥ ४ यन्त्रेऽपि बहुश. क्षिप्त श्वपुच्छमनृजूभवेत् । ११६ ॥ ५ अत्यन्तघर्षणाद् दहनश्चन्दनादपि जायते । ११६ ॥ ७ पुंसां समानशीलाना सद्यो भवति सौहृदम् । १३६ ॥ ७ पुण्याधीनो हि विभव । ३९६ ॥ ८ भत्याकारे यदेकस्मिन् युगपन्न ह्यसिद्वयम् । ४०० ॥ ९ कार्यगतिर्विषमा च । ४०३ ॥ १० बलीयसाऽवरुद्धानां त्राण नान्यत् पलायनात् । ५१७ ॥ ११ विपद्यपि हि नार्हन्त परोपद्रवकारिण । ६४५ ॥ पञ्चमः सर्ग —१ देशाऽऽचारो हि न ह्रिये । ५४ ॥ २ माया जैत्री त्वमायिषु । ९६ ॥ षष्ठ' सर्ग.—१ प्राय. पापनिवासानां पापमेवातिथीयते । ३४ ॥ २ अदातुर्हि प्रियाऽऽलापोऽन्यत्र लाभान्तरायकृत् । ३५ ॥ ३ अर्हदाराधनैवैका सर्वकार्येषु कामधुक् । ६० ॥ ४ अपुत्रायाः, नान्यद् इष्टमतः परम् । ७५ ॥ ५


नान्यथा भवितव्यता । ८० ॥ ६ बलिष्ठा भवितव्यता । ८६ ॥ ७ बुद्धिसाध्येषु कार्येषु कुर्युरूर्जस्विनोऽपि किम् ? । १०१ ॥ ८ ....किं हि, दुःसाध्यं सुधियां धियः ? । १०३ ॥ ९ ....अग्निर्हि, न स्वः कस्यापि विप्रवत् । १०७ ॥ १० पुण्यपुंसां विदेशेऽपि सहचर्यो ननु श्रियः । १२४ ॥ ११ समये मुखरागो हि नृणामाख्याति पौरुषम् । १६१ ॥ १२ धीमद्भिः सुप्रयुक्तस्य किमुपायस्य दुष्करम् ? । १६६ ॥ १३ बन्धुरज्ञायमानोऽपि दृष्टो मोदयते मनः । १६८ ॥ १४ न कन्याप्रार्थनं जातु लज्जायै महतामपि । २२५ ॥ १५ पत्युः क्षेमाऽऽकाङ्क्षिणीनां किं पुत्रेणापरेण वा ? । ३०३ ॥ १६ मायिभिः को न वञ्च्यते । ३२८ ॥ १७ ....कौतुकिनः, सेनाङ्गेषु हि भूभुजः । ३४६ ॥ १८ किमसाध्यं मनुष्याणामभेद्यमिव पाथसाम् ? ।३४७॥ १९ सर्वत्र विभवाः पूज्याः । ३९० ॥ २० नाकाले फलति क्रिया । ४११ ॥ २१ नालं भोग्यफलं कर्माऽभुक्त्वा क्षेप्तुं जिना अपि । ४२२ ॥ सप्तमः सर्गः—१ दासीव वश्या प्रायेण निद्रा ह्यक्षुद्रचेतसाम् । २२ ॥ २ नदीपूर इवासह्यः कोपो हि प्रथमं प्रभोः । ३१ ॥ ३ कालक्षेपाद् यदि पुनः प्रभोः कोपो निवर्तते । ३२ ॥ ४ अधिकाः किङ्करेभ्योऽपि वाग्बद्धा देवयोनयः । ६२ ॥ ५ गुरौ विनयभाजां हि विद्या स्फुरति नान्यथा ।

अन्तिम मङ्गलम्

प्रशमरसनिमग्नं दृष्टियुग्मं प्रसन्नं, वदनकमलमंकः कामिनीसंगशून्यः ।
करयुगमपि यत्ते शस्त्रसंबन्धवन्ध्यं, तदसि जगति देवो वीतरागस्त्वमेव ॥ २ ॥
जयइ जगजीवजोणी, वियाणओ जगगुरु जगाणंदो, जगनाहो जगबंधू, जयइ जगप्पियामहो भयवं ॥ २ ॥
जयइ सुआणं पभवो, तित्थयराणं अपच्छिमो जयइ, जयइ गुरुलोगाणं, जयइ महप्पा महावीरो ॥३॥ नंदीसूत्रम्

तुभ्यं नम' प्रथितकीर्त्तियशोन्विताय । तुभ्य नमो जितहृषीकमुनीश्वराय ॥ ७ ॥
तुभ्य नम' प्रमितपुद्गलनिर्मिताय । तुभ्य नम' सकलवाङ्मयपारगाय ।
तुभ्यं नमो भविकचातकनीरदाय । तुभ्य नमश्वरणनैमनदायकाय । ॥ ८ ॥

जइ वि हु दिवसेण पयं धरइ पक्खेण वा सिलोगद्धं । उज्जोए मा मुचसु जइ इच्छसि सिक्खिउ नाणं ॥ १ ॥
ये लेखयन्ति जिनशासनपुस्तकानि, व्याख्यानयन्ति च पठन्ति च पाठयन्ति
शृन्वन्ति रक्षणविधौ च समाद्रियन्ते, ते मर्त्यदेवशिवशर्म नरा लभन्ते ॥ २ ॥
पठति पाठयते पठतामसौ, वसनभोजनपुस्तकवस्तुभि. । प्रतिदिनं कुरुते य उपग्रह, स इह सर्वविदेव भवेन्नर. ॥ ३ ॥



जैन सूक्तसंदोहः समाप्तः

॥ अथ वीतरागाऽष्टकम् ॥

तुभ्यं नमः समयधर्म्मनिवेदकाय ! तुभ्यं नमस्त्रिभुवनेश्वरशेखराय !
तुभ्यं नमः सुरनरामरसेविताय ! तुभ्यं नमो जिन ! जनार्चितपङ्कजाय ! ॥ १ ॥
तुभ्यं नमो विलसिते हरिचन्दनाय ! तुभ्यं नमो वरकुलाम्बरभास्कराय !
तुभ्यं नमः प्रणतदेवनराधिपाय ! तुभ्यं नमः प्रवररूपमनोहराय ! ॥ २ ॥
तुभ्यं नमो हरिणनायकनायकाय ! तुभ्यं नमो यतिपतिप्रतिपालकाय !
तुभ्यं नमो विकचनीरजलोचनाय ! तुभ्यं नमः स्तनितनादविराजिताय ! ॥ ३ ॥
तुभ्यं नमः कुशलमार्गविधायकाय ! तुभ्यं नमो विकटकष्टनिषेधकाय ! ।
तुभ्यं नमो दुरितरोगचिकित्सकाय ! तुभ्यं नमस्त्रिजगतो हृदि भूषणाय ! ॥ ४ ॥
तुभ्यं नमो दलितमोहतमोभराय ! तुभ्यं नमः कनकसन्निभभूघनाय ! ।
तुभ्यं नमोऽप्यखिलसद्गुणमन्दिराय ! तुभ्यं नमो मुखकलाधिकचन्द्रिकाय ! ॥ ५ ॥
तुभ्यं नमोऽतिशयराजिविभूषिताय ! तुभ्यं नमः कुमतितापसुभञ्जनाय ।
तुभ्यं नमो सुखपयोधिवहित्रकाय ! तुभ्यं नमो विगतकैतवमत्सराय ! ॥ ६ ॥
तुभ्यं नमो विदितभव्यजनाशयाय ! तुभ्यं नमो निखिलसंशयवारकाय !